PG SK S1 03 (DSC)

द्विवर्षीयस्नातकोत्तरः पाठ्यक्रमः

(चि. बि. चि. एच. एन. इ. पि. २०२० अनुसारम्)

प्रथमषाण्मासिकः

महाकाव्यम्

संस्कृतम्

पद्मनाथ-गोहाञिबरुवा-मानविकी-विद्या-अध्ययन-सत्रम्
कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

विषयविशेषज्ञाः

१) आचार्य प्रह्लादः रा. जोशी, कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी

२) अध्यापिका सुदेष्णा भट्टाचार्या, अध्यक्षा, संस्कृतविभागः, गुवाहाटी विश्वविद्यालयः

३) प्रो. जगदीश शर्मा, अध्यापकः, संस्कृतविभागः, गुवाहाटी विश्वविद्यालयः

पाठ्यक्रम-समन्वयकाः : डॉ. इन्द्रानी डेका, सहायकाचार्या, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः
पिङ्कु कलिता, सहायकाचार्यः, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

पाठ्यक्रम- प्रस्तुतकर्तारः

अध्यायाः	**प्रस्तुतकर्तारः**
१, २, ३, ४, ५, ६	पिङ्कु कलिता, सहायकाचार्यः, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः
७, ८, ९, १०, ११, १२, १३, १४	डॉ. इन्द्रानी डेका, सहायकाचार्या, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

सम्पादनसमितिः

विषयवस्तु-सम्पादना : डॉ. रातुल बुजर बरुवा, सहाचार्यः, संस्कृत-साहित्य-विभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी, (अध्यायाः १, २, ३, ४, ५, ६, ७)
डॉ. उदिता भट्टाचार्या, सहायकाचार्या, संस्कृतविभागः, गौहाटी विश्वविद्यालयः, (अध्यायाः ८, ९, १०, ११, १२, १३, १४)

प्रारूप-सम्पादना : डॉ. इन्द्रानी डेका, सहायकाचार्या, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः
पिङ्कु कलिता, सहायकाचार्यः, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

प्रथमप्रकाशः - मार्च, 2025

ISBN :978-93-7839-045-6

This Self Learning Material (SLM) of the Krishna Kanta Handiqui State University is made available under a Creative Commons Attribution-Non Commercial-ShareAlike 4.0 License (International) : http.//creativecommons.org/licenses/by-nc-sa/4.0

Printed and published by Registrar on behalf of the Krishna Kanta Handiqui State Open University.

Headquarters: Patgaon, Rani Gate, Guwahati-781017
City Office: NH 37, Resham Nagar, Khanapara, Guwahati-781022 Web: www.kkhsou.in

विषयपरिकल्पनम्

पृष्ठासंख्या

अध्यायः १ रघुवंशम् (सामान्याध्ययनम्) ५-२१

'रघुवंशम्' इति महाकाव्यस्य सामान्यपरिचयः, महाकाव्यस्य लक्षणम्, 'रघुवंशम्' इति महाकाव्यस्य स्रोतः, 'रघुवंशम्' इति महाकाव्यस्य टीका, 'रघुवंशम्' इति महाकाव्यस्य शीर्षकस्य तात्पर्यम्, कविः परिचयः, प्रत्येकानां सर्गानां सामान्यपरिचयः, रघुवंशस्य राजानः।

अध्यायः २ रघुवंशम् - प्रथमसर्गः, (श्लोकाः १-१०) २२-३४

प्रथमसर्गस्य सारांशः, 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य शीर्षकस्य तात्पर्यम्, प्रथमसर्गस्य प्रथमतो दशमश्लोकं यावत् (१-१०) श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणटिप्पणी।

अध्यायः ३ रघुवंशम् - प्रथमसर्गः, (श्लोकाः ११-३०) ३५-४९

प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत् (११-३०) श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणटिप्पणी।

अध्यायः ४ रघुवंशम् - प्रथमसर्गः, (श्लोकाः ३१-४८) ५०-६५

प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणटिप्पणी।

अध्यायः ५ रघुवंशम् - प्रथमसर्गः, (श्लोकाः ४९-७४) ६६-८५

प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणटिप्पणी।

अध्यायः ६ रघुवंशम् - प्रथमसर्गः, (श्लोकाः ७५-९५) ८६-१०२

प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणटिप्पणी।

अध्यायः ७ रघुवंशम्- चतुर्थसर्गः (श्लोकाः १-२५) १०३-११६

चतुर्थसर्गस्य श्लोकानाम् संस्कृतपाठः (१-२५), श्लोकानाम् अन्वयः, श्लोकानाम् अर्थः, श्लोकानाम् असमीयानुवादः, श्लोकानां व्याख्या, श्लोकानां व्याकरणांशाः(प्रकृतिप्रत्ययसमाससहितम्)।

अध्यायः ८ रघुवंशम्- चतुर्थसर्गः (श्लोकाः २६-५०) ११७-१२९

चतुर्थसर्गस्य सारांशः, चतुर्थसर्गस्य श्लोकाः (२६-५०), श्लोकानाम् अन्वयः, श्लोकानाम् अर्थः, श्लोकानाम् असमीयानुवादः, श्लोकानां व्याख्या, श्लोकानां व्याकरणांशाः (प्रकृतिप्रत्ययसमाससहितम्)।

अध्यायः ९ रघुवंशम् - चतुर्थसर्गः (श्लोकाः ५१-८०) १३०-१४४

श्लोकानां सारांशः (५२-८०), श्लोकाना सस्कृतपाठः (५२-८०), श्लोकानाम् अन्वयः, श्लोकानाम् अर्थः, श्लोकानाम् असमीयानुवादः, श्लोकानां व्याख्या, श्लोकानां व्याकरणांशाः (प्रकृतिप्रत्ययसमाससहितम्)।

अध्यायः १० रघुवंशम्-चतुर्थसर्गः (श्लोकाः ८१-८८) १४५-१५८

चतुर्थसर्गस्य संस्कृतपद्यानि(८१-८८), श्लोकानाम् अन्वयः, श्लोकानाम् अर्थः, श्लोकानाम् असमीयानुवादः, श्लोकानां मूलविषयः, व्याकरणात्मकटिप्पणी, महाकवि कालिदासस्य रचनाशैली, उपमा कालिदासस्य, चतुर्थसर्गस्य केषाञ्चन पद्यानां व्याख्या, चतुर्थसर्गस्य महत्वपूर्णवाक्यानां भावार्थः।

अध्यायः ११ किरातार्जुनीयम् (सामान्याध्ययनम्) १५९-१६८

महाकाव्यस्य लक्षणम्, किरातार्जुनीयम् महाकाव्यस्य परिचयः, शीर्षकस्य तात्पर्यम्, किरातार्जुनीयम् महाकाव्यस्य सर्गाणां सारांशः, किरातार्जुनीयम् महाकाव्यस्य सर्गाणां सारांशः (असमीया), महाकविभारवेः परिचयः, महाकविभारवेः कालः।

अध्यायः १२ किरातार्जुनीयम्-प्रथमसर्गः (श्लोकाः १-२५) १६९-१८४

प्रथमसर्गस्य पद्यानां (१-२५) संस्कृतपाठः, श्लोकानाम् अन्वयः, पद्यानां शाब्दार्थः, व्याकरणात्मकटिप्पणी, वनेचरस्य उक्तीनां सारांशः, असमीया अनुवादः (१-२५)।

अध्यायः १३ किरातार्जुनीयम्-प्रथमसर्गः (श्लोकाः २६-४६) १८५-१९९

पद्यानां संस्कृतपाठः (२६-४६), पद्यानाम् अन्वयः, पद्यानां शब्दार्थः, पद्यानां भावानुवादः, पद्यानां व्याकरणटिप्पणी, पद्यानां व्याख्या भावार्थश्च, पद्यानाम् असमीयानुवादः, द्रौपद्याः उक्तेः सारांशः।

अध्यायः १४ किरातार्जुनीयम् इति महाकाव्यस्य काव्यगत-आलोचनम् २००-२१३

महाकवेः भारवेः रचनाशैली, महाकवेः भारवेः रचनाशैली (असमीया), भारवेरर्थगौरवम्, भारवेरर्थगौरवम् (असमीया), नारिकेलफलसम्मितं वचो भारवेः (असमीया), प्रथमसर्गस्य महत्वपूर्णश्लोकानां व्याख्या भावार्थः च।

पाठ्यविषयस्य परिचयः : महाकाव्यम्

कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयेन गृहीतस्य स्नातकोत्तरपर्यायगतसंस्कृतविषयस्य प्रथमषाण्मासिके तृतीयपत्ररूपेण 'महाकाव्यम्' इति पाठ्यविषयः प्रस्तूयते। अस्मिन् पाठ्यविषये संस्कृतमहाकाव्यसन्दर्भे आलोच्यते। तस्मादेव अस्य पाठ्यविषयस्य नामकरणं वर्तते 'महाकाव्यम्' इति। पाठ्यविषयेऽस्मिन् चतुर्दशोऽध्यायाः सन्ति। ते अध्यायाः क्रमपूर्वकं यथा -

१) रघुवंशम् (सामान्याध्ययनम्)
२) रघुवंशम् - प्रथमसर्गः, (श्लोकाः १ - १०)
३) रघुवंशम् - प्रथमसर्गः, (श्लोकाः ११ - ३०)
४) रघुवंशम् - प्रथमसर्गः, (श्लोकाः ३१ - ४८)
५) रघुवंशम् - प्रथमसर्गः, (श्लोकाः ४९ - ७४)
६) रघुवंशम् - प्रथमसर्गः, (श्लोकाः ७५ - ९५)
७) रघुवंशम् - चतुर्थसर्गः (श्लोकाः १ - २५)
८) रघुवंशम् - चतुर्थसर्गः (श्लोकाः २६ - ५०)
९) रघुवंशम् - चतुर्थसर्गः (श्लोकाः ५१ - ८१)
१०) रघुवंशम् - चतुर्थसर्गः (श्लोकाः ८१ - ८८)
११) किरातार्जुनीयम् (सामान्याध्ययनम्)
१२) किरातार्जुनीयम् - प्रथमसर्गः, (श्लोकाः १ - २५)
१३) किरातार्जुनीयम् - प्रथमसर्गः, (श्लोकाः २६ - ४६)
१४) किरातार्जुनीयम् इति महाकाव्यस्य काव्यगत-आलोचनम्

पाठ्यविषयस्यास्य अध्ययनसमये मूलपाठेन सह वामपार्श्वे तथा दक्षिणपार्श्वे केचन चतुर्भुजाकृतिषु मञ्जुषासु विषयाः परिलक्ष्यन्ते। ते विषयाः मूलपाठेषु उल्लिखिताः महत्त्वपूर्णाः धारणाः सरलरूपेण अवबोधने सहायकं भविष्यन्ति। 'ज्ञातव्यम्' इत्यस्मिन् अंशे पाठेन सह सम्बद्धानां महत्त्वपूर्णानां तथ्यानां वर्णनं प्राप्यते। प्रत्येकं शाखाया अध्ययनान्ते 'अग्रगत्याः निरीक्षणम्' इत्यंशे प्रदीयमानाः प्रश्ना अध्ययनस्य प्रगतये सुविधां प्रदास्यन्ति। अध्ययनात्परं उद्धृतानां प्रश्नानाम् उत्तराणि विलिख्य पाठस्यान्तिमे प्रदीयमानः 'अग्रगत्याः निरूपणम्' इत्यस्मिन् अंशेन सह यदि सुमेलयिष्यन्ति तर्हि शिक्षार्थीनां कृते लाभप्रदायकं भविष्यन्ति। अध्यायेऽस्मिन् आलोचितानां विषयाणां विस्तृतरूपेण अध्ययनाय 'ज्ञानाधिक्यम्' इत्यस्मिन् अंशे उल्लिखिताः ग्रन्थाः सहायकाः भविष्यन्ति। अध्यायस्यान्तिमे केचन 'अभ्यासप्रश्नाः' प्रदीयन्ते। अन्तिमाध्यायस्यान्ते केषाञ्चन सहायकग्रन्थानां नामानि उल्लिख्यन्ते। तेषां ग्रन्थानां सहायेन अस्मिन् पाठ्यविषये उद्धृता अध्यायाः प्रस्तूयन्ते। यदि भवन्तो विस्तृतरूपेण कमपि विषयं ज्ञातुमिच्छन्ति तर्हि तान् ग्रन्थान् अध्ययनं कर्तुं शक्नुवन्ति ।

अध्यायः १ : रघुवंशम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

१.१ उद्देश्यम्

१.२ परिचयः

१.३ 'रघुवंशम्' इति महाकाव्यस्य सामान्यपरिचयः

१.३.१ महाकाव्यस्य लक्षणम्

१.३.२ 'रघुवंशम्' इति महाकाव्यस्य स्रोतः

१.३.३ 'रघुवंशम्' इति महाकाव्यस्य टीका

१.४ 'रघुवंशम्' इति महाकाव्यस्य शीर्षकस्य तात्पर्यम्

१.५ कविः परिचयः

१.६ प्रत्येकानां सर्गानां सामान्यपरिचयः

१.७ अध्यायस्य असमीयाभाषायां संक्षिप्तविवरणम्

१.८ रघुवंशस्य राजानः

१.९ अध्यायात् किमवगतम्

१.१० ज्ञानाधिक्यम्

१.११ अग्रगत्याः निरूपणम्

१.१२ अभ्यासप्रश्नाः

१.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- 'रघुवंशम्' इति महाकाव्यस्य परिचयप्राप्तुं शक्नुवन्ति।
- 'रघुवंशम्' इति महाकाव्यस्य स्रोतमवगन्तुं शक्नुवन्ति।
- 'रघुवंशम्' इति महाकाव्यस्य कवेः परिचयप्राप्तुं शक्नुवन्ति।
- अस्य महाकाव्यस्य 'रघुवंशम्' इति नाम्नः तात्पर्यं ज्ञातुं प्रभवन्ति।
- 'रघुवंशम्' इति महाकाव्यस्य प्रत्येकानां सर्गानां सामान्यपरिचयं ज्ञातुं शक्नुवन्ति।

१.२ परिचयः

संस्कृतसाहित्यजगति काव्यस्य द्वौ प्रकारौ स्तः दृश्यकाव्यं श्रव्यकाव्यञ्च। दृश्यकाव्येषु अभिनयादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं शक्यते। श्रव्यकाव्ये श्रवण–पठनादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं प्रभवति। श्रव्यकाव्यस्य पुनः त्रयो विभागाः सन्ति – महाकाव्यं, खण्डकायं, चम्पूकाव्यञ्चेति। महाकाव्येषु यथा रघुवंशम्, शिशुपालवधम्, कुमारसम्भवम्, किरातार्जुनीयम्,

नैषधीयचरितम् च। खण्डकाव्यं यथा मेघदूतम् ऋतुसंहारञ्च। चम्पूकाव्यं यथा नलचम्पूः, पारिजातहरणचम्पूश्च।

एवं संस्कृतसाहित्यजगति पञ्चषु महाकाव्येषु 'रघुवंशम्' इति अन्यतमं महाकाव्यम्। अस्मिन् अध्याये अस्य महाकाव्यस्य सामान्यपरिचयः प्राप्यते। अस्मिन् अध्याये 'रघुवंशम्' इति महाकाव्यस्य सामान्यपरिचयेन सह कवेः कालिदासस्य परिचयम्, महाकाव्यस्य लक्षणम्, 'रघुवंशम्' इति महाकाव्यस्य उत्सटीकादीनां वर्णनम्, अस्य महाकाव्यस्य प्रतिसर्गानां विषयवस्तु तथा च रघुवंशीयाणां नृपतीनां संक्षिप्तः परिचयः प्राप्यते।

१.३ 'रघुवंशम्' इति महाकाव्यस्य सामान्यपरिचयः

अस्मिन् क्रमे भवन्तो 'रघुवंशम्' इति महाकाव्यस्य संक्षिप्तं परिचयं ज्ञातुम् अर्हन्ति। 'रघुवंशम्' इति महाकाव्यं महाकविकालिदासस्य उत्कृष्टं महाकाव्यम्। अस्मिन् महाकाव्ये ऊणविंशतिः (१९) संर्गाः सन्ति। अत्र रघुवंशस्य राजादिलीपादारभ्य अग्निवर्णपर्यन्तम् ऊनत्रिंशत् राज्ञां वर्णनं प्राप्यते। काव्यमिदं वागर्थरूपाय परमेश्वर - पार्वती - वन्दनया प्रारभ्यते।

१.३.१ महाकाव्यस्य लक्षणम्

साहित्यदर्पणम् :
विश्वनाथकविराजेन विरचितम् अलङ्कारशास्त्रम्।

संस्कृतसाहित्यजगति रत्नस्वरूपमस्ति महाकाव्यम्। विश्वनाथकविराजेन साहित्यदर्पणस्य षष्ठपरिच्छेदे महाकाव्यस्य लक्षणं सुष्ठुरूपेण उल्लिख्यते। महाकाव्यस्य अध्यायान् सर्गरूपेणाभिधीयते। तत् अष्टाधिकसर्गेषु विभक्तव्यम्। अत्र एको नायकः क्षत्रियोऽथवा सुरवंशोद्भवो धीरोदात्तगुणसम्पन्नो भवेत्। श्रृंगारो वीरो वा एकः शान्तरसो भवेत्। अन्ये रसाः अङ्गानि स्वरूपाणि भवेयुः। सर्वे पञ्चसन्धयोऽत्र अवश्यमेव भवितव्यम्। विषयभागं तु ऐतिहासिकं वा तदतिरिच्य सज्जनाश्रयं, चतुर्वर्गेषु साधनफलेषु एकम्, आशीर्वादात्मकं नमस्क्रियात्मकं वस्तुनिर्देशात्मकं वा मङ्गलाचरणम्, सज्जनानां गुणानां प्रशंसा अथवा खलानां निन्दा, प्रतिसर्गान्ते भाविसर्गस्य सूचना, यथानुसारं सन्ध्या-सूर्योदय-रजनी-प्रातः-मध्याह्न-मृगया-सम्भोग-विप्रलम्भ-मन्त्र-पुत्रोदयादीनां सुष्ठुवर्णनं महाकाव्ये अवश्यमेव भवितव्यम्। महाकाव्यस्य नामकरणं वृत्तान्तस्य, कवेः, नायकस्य वा नाम्ना भवेत्, सर्गनाम तु सर्गानामुपादेयकथयैव भवेत्। एतादृशलक्षणयुक्तं महाकाव्यम् उत्कृष्टं महाकाव्यं भवतीति।

महाकाव्यस्य एतानि सर्वाणि लक्षणानि प्रतिफलितं दृश्यते। अस्य महाकाव्यस्य नायको उच्चवंशोद्भवः, प्रधानो रसो वर्तते शृङ्गारः। पुनः सहायकरसरूपेण वीर-करुणादयो अत्र व्यवह्रियन्ते। एवं महाकाव्यस्यास्य विषयवस्तु रामायणात् तथा विभिन्नेभ्यः पुराणेभ्य संगृह्यते। महाकाव्यस्यास्य नामकरणमपि रघुवंशीयप्रख्यातराज्ञो नामानुसारं कृतम्। सर्गानां नामकरणे विषयवस्तुनः तात्पर्येण सह सर्गान्ते भाविसर्गस्य सूचना अपि सम्प्राप्ता भवति। तस्मात् इदं महाकाव्यम् उत्कृष्टतमं महाकाव्यमिति वक्तुं शक्यते।

१.३.२ 'रघुवंशम्' इति महाकाव्यस्य स्त्रोतः

महाकविकालिदास अनेकात् स्त्रोतात् 'रघुवंशम्' इति महाकाव्यस्य विषयवस्तु स्वीकृत्य काव्यमिदं विरचितवान्। सः 'मन्दः कवियशः प्रार्थी' इत्यनेन घोषयित्वा वाल्मीकि-प्रभृतीनां कवीनां कृते सम्मानं प्रदर्श्य कथयति -

अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रममूत्कर्णे सूत्रस्येवास्ति मे गतिः।।

अनेन ज्ञायते यत् 'रघुवंशम्' इति महाकाव्यस्य प्रमुखः स्त्रोतः 'रामायणम्' इति। परन्तु, रामायणस्योपरि वायुपुराणात् विष्णुपुराणात् च विषयवस्तु संगृह्य इदं महाकाव्यं विरचितवान्। नवमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं वर्णितः रामकथायाः स्त्रोतः 'रामायणम्' इति तत्र कोऽपि सन्देहो न वर्तते। पुराणेषु अपि सूर्यवंशीयराज्ञां वंशावली वणितास्ति। रघु-दिलीपयोः मध्ये रामायणे द्वौ, वायुपुराणे ऊणविंशतिः, विष्णुपुराणे अष्टादशो राज्ञो नाम प्राप्यते। तस्मात् ज्ञायते यत् कविः तेषामेव वर्णनं काव्येऽस्मिन् उल्लिख्यते।

'रघुवंशम्' महाकाव्ये कालिदासेन भौगोलिक-ऐतिहासिकानां सर्वेषां विषयाणां वर्णनं क्रियते। अत्र रघोः दिग्विजये जयप्राप्तदेश-राज्य-नगराणां भौगोलिकं विवरणं प्राप्यते। एवं इन्दुमत्याः स्वयम्वरं प्रति समागतसूर्यवंशस्य राजपुरुषाणाम् ऐतिहासिकवृत्तान्तम्, सम्पूर्णे काव्ये वर्णितमस्ति। दिलीपादारभ्य अनुष्ठितस्य अश्वमेधयज्ञस्य विवरणम्, विश्वजित् यज्ञस्य विवरणम्, इन्दुमत्याः स्वयम्वरः, कुशस्य जलक्रीडा, अतिथे अभिषेकादीनां वर्णनमाध्यमेन प्राचीनभारतीयसंस्कृतेः परिचयं प्राप्यते।



ज्ञातव्यम्

पुराणम् : 'पुराणम्' इति शब्दस्य व्युत्पत्तिगतार्थोऽस्ति प्राचीनम्। पुराणानां रचकोऽस्ति वेदव्यासः।

१.३.३ 'रघुवंशम्' इति महाकाव्यस्य टीका

'रघुवंशम्' इति महाकाव्यस्योपरि अनेकाः टीकाः उपलभ्यन्ते। एवम् अस्य महाकाव्यस्योपरि ३२ मित संख्यकाः टीका उद्धृताः सन्ति। तथा द्वात्रिंशत् संख्यकानां टीकाकाराणां नामानि प्राप्यन्ते। एतासु टीकासु सुप्रसिद्धा टीकास्ति मल्लिनाथस्य 'संजीवनी' टीका। अन्ये टीकाकाराः यथा - हेमाद्रि - चरित्रवर्द्धन -बल्लभ - दिनकर - भरतसेन - अरुणगिरिनाथ - नारायण - सुमतिविजय - विजयगनि - विजयानन्द - दक्षिणार्वत - धर्ममेरु- नाथ - भोज - कृष्णभट्ट - विस्तरकार - गोपिनाथकविराज - प्रभाकरजनार्दन - त्रिविदाकर - उदयाकर - भगीरथ - वृहस्पतिमिश्र - कृष्णपतिशर्मा - भवदेवमिश्र

- गुणविनयगनि- रामचन्द्र - महेश्वर - समुद्रमूरिश्चेति। एतेषामुपरि तिस्रः टीकाः वर्तन्ते, यासां टीकाकाराणां नाम न प्राप्यते। ताः टीकाः यथा-अद्वैतसारस्वतसूत्रम्, कथाम्भूतिः, पदार्थदीपिका च।



ज्ञातव्यम्

टीका : कस्यापि ग्रन्थस्य अथवा विषयस्योपरि विरचितो व्याख्याग्रन्थः।

१.४ 'रघुवंशम्' इति महाकाव्यस्य शीर्षकस्य तात्पर्यम्

इदानीं भवन्तः 'रघुवंशम्' इति महाकाव्यस्य नाम्नः तात्पर्यं ज्ञातुं प्रभवन्ति। महाकविकालिदासेन मूलतो वाल्मीकेः रामायणेन प्रभावितो भूत्वा महाकाव्यस्यास्य विरचनं कृतम्। वाल्मीकेः 'रामायणम्' रघुवंशचरितमिति मन्यते। अत्र वर्णितेषु ऊणत्रिंशत्सु राजसु 'रघुः' अन्यतमः श्रेष्ठतमो राजा वर्तते। राजा रघु आसीत् सर्वगुणसम्पन्नः, पराक्रमयुक्तः, प्रजानुरञ्जकश्च। इक्षाकुवंशीयराजानरेव रघुकुलोत्पन्नाः राजानः सन्ति। रघुकुलशिरोमणिस्वरूपोऽस्ति राजा रघुः। तस्मादेव महाकविना कालिदासेन अस्य महाकाव्यस्य नाम 'रघुवंशम्' इति प्रदीयते। अतोऽस्य महाकाव्यस्य नामकरणस्य तात्पर्यं साफल्यं वर्तते।

१.५ कविः परिचयः

संस्कृतसाहित्यजगति कालिदासस्य स्थानं सर्वोपरि वर्तते। महाकविः कालिदासो राज्ञो विक्रमादित्यस्य राजसभायाः नवरत्नेषु अन्यतम आसीत्। श्लोके प्राप्यते यथा -

धन्वन्तरिः क्षपणकामरसिंह शंकुर्वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्णव विक्रमस्य।।


महाकविः कालिदासः कस्य समयस्य कवि आसीत् तत्तु स्पष्टरूपेण वक्तुं न शक्यते। सप्तमशताब्द्याः पूर्वार्धे द्वे प्रमाणे प्राप्येते, यत्र कालिदासस्य नामोल्लेखो दृश्यते। प्रथमे बाणभट्टस्य 'हर्षचरितम्' इत्यस्य काव्यस्य प्रारम्भे प्रदत्तं कालिदासप्रशस्तिरस्ति। बाणभट्टो हर्षवर्धनस्य (६०६-४८ ई.) सभाकविरासीत्। द्वितीये प्रमाणे कर्नाटकराज्ये प्राप्तः एहोल-शिलालेखरस्ति। यत्र जैनकविः रविकीर्तिः स्वयमेव कालिदासस्तथा भारविवत् विशिष्टकविरूपेण उद्घोषयति -

येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म।
स विजयतां रविकीर्तिः कविताश्रितकालिदास-भारवि-कीर्तिः॥ (पद्यसङ्ख्या - ३७)।।

अस्य शिलालेखस्य समयः ५५६ शकाब्दः अर्थात् ६३४ ई.। एतदतिरिक्त्य ४७३ ईशवीये उत्कीर्णः मन्दसोर-अभिलेखस्य भाषा-शैल्यां कालिदासस्य स्पष्टं प्रभावं सिद्धति। एवं कालिदासस्य समयः १५० ई. पूर्वतः ४५० ईशवीयः इति सिद्धति।

कालिदासस्य निवासस्थानमधिकृत्य अपि विदुषां मध्ये मतानैक्यं दृश्यते। तेषु काशी (विद्योत्तमया सह स्वयम्वरकथाम् आधारीकृत्य), बंगालः ('दास' इति उपाधिमधिकृत्य), विदर्भः ('पीटर्सन' महोदयस्य मतम्) अयोध्या ('रघुवंशम्' इत्यस्मिन् काव्ये अयोध्यां प्रति आकर्षणहेतुः), कश्मीरः (प्रो. लक्ष्मीधरकल्लामहोदयस्य मतम्), उज्जयिनी प्रभृतिः। वस्तुतस्तु आधुनिकपण्डितानां मतानुसारं कालिदासस्य जन्मस्थानं तु उज्जयिनी इति स्वीक्रियते।

संस्कृतसाहित्यजगति अस्य कालिदासस्य रचनं तु सर्वोत्कृष्टं मन्यते। कालिदासस्य काव्येषु 'रघुवंशम्', 'कुमारसम्भवम्' चेति महाकाव्यद्वयम्, 'मेघदूतम्', 'ऋतुसंहारम्' चेति खण्डकाव्यद्वयम्, 'अभिज्ञानशाकुन्तलम्', 'विक्रमोर्वशीयम्', 'मालविकाग्निमित्रम्' चेति नाटकत्रयं प्रभुखं स्थानं प्राप्यते।



अग्रगत्याः निरीक्षणम्

प्रश्नः १ – 'रघुवंशम्' इति महाकाव्यस्य कर्ता कः ?

.....

प्रश्नः २ – 'रघुवंशम्' इति महाकाव्ये कति सर्गाः सन्ति ?

.....

प्रश्नः ३ – 'रघुवंशम्' इति' महाकाव्ये कति संख्यकानां राज्ञां वर्णनं प्राप्यते ?

.....

प्रश्नः ४ – 'रघुवंशम्' इति महाकाव्यस्योपरि कति संख्यकाः टीकाः प्राप्यन्ते ?

.....

प्रश्नः ५ – 'रघुवंशम्' महाकाव्यस्य प्रसिद्धः टीकाकारः कः ?

.....

प्रश्नः ६ – 'रघुवंशम्' महाकाव्यस्य प्रसिद्धः टीकाग्रन्थः कः ?

.....

प्रश्नः ७ – महाकविकालिदासः कस्य राज्ञो राजसभायाः कविः आसीत् ?

.....

प्रश्नः ८ – कालिदासस्य अपरम् एकं महाकाव्यं किम् ?

.....

प्रश्नः ९ – महाकविना कालिदासेन कति खण्डकाव्यानि विरचितानि ?

.....

प्रश्नः १० – महाकविना कालिदासेन कति नाटकानि रचितानि ?

.....

१.६ प्रत्येकानां सर्गानां सामान्यपरिचयः

प्रथमसर्गस्य प्रारम्भे कविना रघुवंशीयराज्ञां गुणा उल्लिख्यन्ते। तेषां राज्ञां गुणेभ्यः प्रभावितो भूत्वा महारकविः कालिदासः 'रघुवंशम्' इति महाकाव्यं रचितुम् अनुप्रेरितम् अभवत्। सर्गेऽस्मिन् कालिदासो राज्ञो दिलीपस्य गुणानुकीर्तनं कृतवान्। दिलीपस्य पत्नी सुदक्षिणा निःसन्तान आसीत्। अतः तौ कुलगुरुवशिष्ठस्य आश्रमे तत् दुःखं व्यक्तं कृतवन्तौ। तदा ऋषिः वशिष्ठः राजानं कामधेनुपुत्रीं नन्दिनीं सेवां कर्तुम् उपदिष्टवान्। एवं प्रकारेण राजा राज्ञी च नन्दिनीसेवायां संलग्नम् अभवताम्।

द्वितीये सर्गे महाकविः दिलीप-सुदक्षिणयोः त्रयाणां सप्ताहानां गोसेवाव्रतस्य वर्णनम् उल्लिखितवान्। नन्दिनी राज्ञो दिलीपस्य भक्तिं परीक्षितुम् एकस्मिन् गह्वरे प्रविष्टवती। तदा राजा हिमालयस्य प्राकृतिकसौन्दर्योपभोगे निमग्न आसीत्। तस्मिन् समये नन्दिन्या उपरि एकः सिंह आक्रमणं कृतवान्, नन्दिनी राजानम् आश्रमं प्रति गन्तुमुपदिशति। परन्तु, राजा नन्दिन्याः स्थाने सिंहाय स्वकीयं शरीरम् अर्पयित्वा सिंहं प्रार्थनां कृतवान् यत् सः सिंहः नन्दिनीं त्यजेत्। राज्ञो दृढभक्तौ नन्दिनी सन्तुष्टा जाता तथा च पुत्रप्राप्तिहेतु आशीर्वादं दत्तवती। एवं राज्ञो मनोवाञ्छा पूर्णा जाता। पुनश्च ऋषेः वशिष्ठस्य अनुज्ञां प्राप्य राजा दिलीपः राज्ञी सुदक्षिणा च राजधानीं प्रति गतवन्तौ।

तृतीयसर्गे रघोः जन्म-संस्कारानुष्ठान-विद्यारम्भादयः दिलीपस्य अश्वमेधयज्ञानुष्ठानम्, इन्द्रेण अश्वापहरणहेतुः रघोः इन्द्रस्योपरि आक्रमणम्, इन्द्रस्य आशीर्वादस्तथा रघोः राज्याभिषेकं वर्णितमस्ति। दिलीपस्य वानप्रस्थधर्मपालनार्थं वनं प्रति गमनं वर्णितमस्ति।

चतुर्थसर्गे राज्ञो रघोः द्विग्विजयस्य शासनव्यावस्थायाः च परिचयः प्राप्यते। पूर्वदिशात् दिग्विजयं प्रारभ्य राजा रघु उत्कलदेशस्य मध्यभागेन कलिङ्गदेशम् अतिक्रम्य दक्षिणदिशं प्रति यात्रां कृतवान्। ततो दक्षिणस्य पाण्ड्यान् पराजितं कृत्वा सह्यपर्वतम् अतिक्रमितवान्। पारसी-हुन-कम्बोजानि सर्वानि राज्यानि पराजितं कृत्वा कामरूपपर्यन्तम् अधिकृतवान्। एवं बहूनि कनक-धनानि आहृत्य राजा रघुः राजधानीं प्रति गत्वा विश्वजित् यागं सम्पादितवान् तथा ब्राह्मणाय बहूनि कनक-धनानि दत्तवान्।

पञ्चमे सर्गे राज्ञो रघो असाधारणदानशीलतायाः वर्णनं प्राप्यते। राजा विश्वजित्यागं सम्पाद्य धनहीनमभवत्। तस्मिन् समये कौत्सनामकस्य एको ब्रह्मचारी चतुर्दशकौटिस्वर्णमुद्रा राज्ञः समीपे गुरुदक्षिणारूपेण प्रार्थितवान्। धनहीनो रघुः ब्रह्मचारीं प्रति धनदानाय असमर्थहेतुः कुवेरस्य कोषम् आक्रमितवान्, पुनश्च तस्य कोषः धनेन पूर्यते। एवं प्रसन्नः सन् कौत्सो रघुं पुत्रलाभाय आशीर्वादं दत्तवान्। तत्पश्चात् अजस्य जन्मोऽभवत्। स अपि पिता रघुसदृशमेव पराक्रमयुक्त आसीत्। विदर्भराजा भोजः स्वस्य अनुजाया इन्दुमत्याः स्वयम्वरं प्रति अजम् आह्वानं कृतवान्। राजा रघुः सेनया सह अजं विदर्भस्य राजधानीं प्रति प्रेषितवान्। मार्गे अजः एकं गजं कष्टं प्रदातुम् उद्दत आसीत्। स गजः शापग्रस्त एको गन्धर्व आसीत्। स गन्धर्व अजं सन्मोहनम् अस्त्रं प्रदत्तवान्। एवम् अज इन्दुमत्याः स्वयम्वरं प्रति गतवान्।

षष्ठे सर्गे इन्दुमत्याः स्वयम्वरस्य वर्णनं प्राप्यते। मगध-अङ्ग-अवन्ति-अनुप-शूरसेन-कलिङ्ग-नागपुरादीनां देशानां सर्वे राजकुमाराः स्वयम्वरे आगतवन्तः। इन्दुमत्याः परिचारिका सुनन्दा सर्वेषां परिचयं दत्तवती। अन्तिमे यदा अजस्य सम्मुखे उपस्थितम् अभवत्, तदा इन्दुमती अजमेव माल्यार्पणम् अकरोत्। तत्र उपस्थिता अन्ये राजकुमारा अपमानिता अभवन्।

सप्तमे सर्गे अज-इन्दुमत्योः विवाहानुष्ठानस्य वर्णनं प्राप्यते। प्रत्याख्याताः राजान अज-इन्दुमत्यौ अयोध्यागमने मार्गे आक्रमणम् अकुर्वन्। इन्दुमत्याः रक्षाय अमात्यान् दायित्वं प्रदाय अजः सन्मोहनास्त्रस्य प्रयोगं कृत्वा सर्वान् प्रतिहतं कृतवान्। तत्पश्चात् अज इन्दुमती च अयोध्यायाम् आगतवन्तौ। राजा रघुः अजं राज्यस्य दायित्वम् अर्पितवान्।

अष्टमे सर्गे रघुः वानप्रस्थाश्रमे प्रवेशं करोति। एवं केषाञ्चित् दिनानामनन्तरं रघोः मृत्युरभवत्। अजो रघोः शेषकृत्यानि उपयुक्तरूपेण सम्पादितवान्। यथासमये अज-इन्दुमत्योः पुत्रो दशरथ अजायत। एकस्मिन् दिवसे प्रमोदोद्याने अज इन्दुमती च विहारं कुर्वन् आस्ताम्, तस्मिन् समये इन्दुमत्याः शरीरे एका माला अपतत्। एवं तेन राज्ञी मृता जाता। अनया घटनया राज्ञो मनसि अतीव दुःखं जातम्। राज्ञो दुःखं न्यूनीकर्तुं वशिष्ठमुनि एकं शिष्यं प्रेषितवान्। सः शिष्य अकथयत् यत् - इन्दुमती एका शापयुक्ता अप्सरा आसीत्। तया मालया इन्दुमती शापमुक्ता जाता। यतो हि, जन्मवत् मृत्युरपि अनिवार्यम्, अत अजस्य कृते एवं शोकयुक्तं स्वभावं समीचिनं नास्ति। एवं यद्यपि अजः साधारणं जीवनं यापितवान् तथापि तत् दुःखं तस्य मनसि सर्वदा खेदमुत्पादयति। अष्टवर्षादनन्तरम् अजस्यापि मृत्युरजायत।

नवमे सर्गे दशरथस्य वर्णनं प्राप्यते। इन्द्रो रघोः परमं मित्रमासीत्। एकस्मिन् दिवसे वसन्तोत्सवोपभोगसमये राजा दशरथः तमसानदीतीरे कमपि शब्दं श्रुतवान्। सः शब्दो गजस्य शब्द इति चिन्तयित्वा सः शब्दभेदीबाणं निक्षेपितवान्। परन्तु, सः बाण एकस्य मुनिकुमारस्य शरीरे क्षिप्तवान्। अतः तस्य मुनिकुमारस्य मृत्युरभवत्। तस्मादेव अनाकाङ्क्षितभावेन जायमान अपराधवशात् मुनिकुमारस्य अन्ध-पिता-मात्रोः पुत्रशोकवशादेव दशरथस्यापि मृत्युः भविष्यतिरिति शापं लब्धवान्। पुत्रहीनो राजा दशरथः तं शापं वररूपेण स्वीकृतवान्।

दशमे सर्गे राज्ञो दशरथस्य पुत्रेष्टियागस्य वर्णनं प्राप्यते। तस्मिन् समये रावणस्य अत्याचारेण पीडितं भूत्वा देवताः विष्णोः समीपं गतवन्तः। विष्णु अकथयत् यत् ब्रह्माप्रदत्तवरेण दुःसाहसयुक्तं रावणं रामरूपेण जन्मं लब्ध्वा विनाशयिष्यति।

दशरथेन सम्पादितयज्ञीयाग्ने एकस्य दिव्यपुरुषस्य आविर्भावो जायते । पुनः सः पुरुषः राज्ञो हस्ते चरुः प्रदत्तवान्। दशरथः तस्य देवताया आशीर्वादं प्राप्य कौशल्या-कैकेयी-सुमित्रान् प्रति तस्य चरोः भागं प्रदत्तवान्। यथासमये तिसृणां राज्ञीणां गर्भेषु राम-भरत-लक्ष्मण-शत्रुघ्नानां चतुणां पुत्राणां जन्मोऽभवत्।

एकादशे सर्गे ऋषिः विश्वामित्रः राक्षसेभ्यो यज्ञरक्षणाय रामं लक्षणञ्च नेतुम् अयोध्यां प्रति आगतवान्। विश्वामित्रेण सह गमनमार्गे रामो राक्षसीं ताडकां हतवान्। आश्रमे सुबाहुं मारीचञ्च हतवान्। यज्ञान्ते राज्ञो जनकस्य आमन्त्रणं प्राप्य विश्वामित्रेण सह रामः लक्ष्मणश्च मिथिलां प्रति

गतवन्तौ। मार्गे राम अहल्यां शापमुक्तं कृतवान्। मिथिलाय आगत्य जनकराज्ञो हरधनुषं विभङ्ग्य रामः सीतां पत्नीरूपेण लब्धवान्। तत्पश्चात् दशरथमपि मिथिलां प्रति आमन्त्रितवान्। राम-सीतयोः विवाहस्य पश्चात् उर्मिला-लक्ष्मणयोः, माण्डवी-भरतयोः, श्रुतकीर्ति-शत्रुघ्नयोः विवाहसम्पन्नं जातम्। तदनन्तरम् अयोध्यां प्रति गमनमार्गे रामः परशुरामं मिलति। परशुरामः स्वकीयं धनुषं अर्जुनं प्रति समर्प्य तत्र बाणयोजयितुम् उपदिशति। राम अनायासेन परशुरामस्य अहङ्कारं विभङ्ग्य अयोध्यायां प्रविशति स्म।

द्वादशे सर्गे राजा दशरथो रामचन्द्रस्य अभिषेकस्य आयोजनं कृतवान्। परन्तु, कैकेयी पूर्वप्रतिश्रुतवरद्वयं प्रदातुं दशरथं प्रार्थितवती। तत्र एकेन वरेण रामस्य वनवासः, अपरेण वरेण भरतस्य अभिषेकः प्रार्थ्यते। एवं रामः, लक्ष्मणः, सीता च वनवासं प्रति गतवन्तः। पुत्रशोकवशात् दशरथस्य मृत्युरजायत। भरतो राजसिंहासनम् अलङ्कर्तुम् अस्वीकृतवान्। एवम् अन्तिमे भरतो रामस्य प्रतिनिधिरूपेण नन्दिग्रामात् राज्यशासनं प्रारब्धवान्। वनवासस्य समये रामो विराध-खर-दूषणादिराक्षसान् हतवान्।

लक्ष्मणो रावणस्य भगिन्याः शूर्पनखायाः अङ्गक्षतं कृतवान्। रावणः स्वकीयमायया सीताम् अपहृतवान्। रामः सुग्रीवस्य हनुमतश्च साहाय्यवशात् सेतुं निर्माय लङ्कायां प्रवेशम् अकरोत्। तथा च युद्धे रावणं हत्वा विभीषणं लङ्कायाः नृपतिपदं अर्पितवान्। अन्तिमे रामः पुष्पकविमानेन सीतया सह अयोध्यां प्रति प्रत्यावर्तनं कृतवान्।

त्रयोदशे सर्गे अयोध्याप्रत्यावर्तनसमये मार्गे प्राप्तानां स्थानानां मनोरमं वर्णनं प्राप्यते। समुद्र-जनस्थान-माल्यवानपर्वत-पम्पासरोवर-गोदावरीनदी-पञ्चवती-अगस्त्यशातकर्णि-शरभङ्गनादीनाम् ऋषिणाम् अश्रमाणां वर्णनं, चित्रकूटपर्वत-मन्दाकिनीनदी-गङ्गायमुनयोः सङ्गम-सरयूनदीनां वर्णनं सर्गेऽस्मिन् उपस्थाप्यते। भातृप्रेममपि सर्गेऽस्मिन् मनोरमपूर्वकम् उल्लिख्यते।

चतुर्दशे सर्गे राम-लक्ष्मणयोः मातुः दर्शनस्य वर्णनं प्राप्यते। एवं राम अयोध्यायाः नृपतिर्भवति। सुग्रीव-विभीषणयोः प्रस्थानसम्भाषणं समाप्य रामः पुष्पकविमानं कुवेराय सम्प्रेषयति। कतिपयानां दिनानाम् अनन्तरं सीता सन्तानसम्भवा जायते। तस्मात् प्रजाभ्यः सीतायाः निन्दा श्रूयते। लोकापवादभयात् रामः सीतां गङ्गातीरे वाल्मीकिमुनेः आश्रमे परित्यक्तुम् उपदिशति। सा वार्ता श्रुत्वा सीता शोकसन्तप्ता जाता। वाल्मीकिः सीतां स्वीयम् आश्रमं प्रति नीतवान्।

पञ्चदशे सर्गे रामस्यादेशानुसारं लक्ष्मणो लवनराक्षसं दमनार्थं मथुरां प्रति गच्छति। वाल्मीकिमुनेः आश्रमे निवासे प्रथमदिनाङ्के सीतायाः यमजसन्तानयोः लव-कुशयोः जन्मोऽभवताम्। वाल्मीकिः तौ विद्याप्रदानेन सह रामयणगीतं गातुं शिक्षयति। अस्मिन् विषये रामस्य ज्ञातार्थं रामस्य समक्षं किमपि न प्रोक्तम्। एतदनन्तरं रामः शम्बुकं हत्वा अश्वमेधयज्ञम् आयोजयति। वाल्मीकिरपि आमन्त्रितः सन् लव-कुशभ्यां सह तस्मिन् यज्ञे आगतवान्। लव-कुशयोः गीतं श्रुत्वा सर्वे मुग्धाः जाताः। वाल्मीकिमुनेः मुखात् राम उभयोः परिचयं ज्ञातवान्। रामः सीताया अग्निपरीक्षां कृत्वा तां सीतां स्वीकर्तुं सिद्धान्तं नीतवान्। परन्तु, सीता मातुः धरित्र्याः गर्भे आश्रयं स्वीकृत्य स्वकीयपवित्रतायाः प्रमाणं क्रियते। एवम् अन्तिमे रामो भ्राता-पुत्र-भ्रातृसुतेभ्यो राज्यं

समर्प्य स्वर्गारोहणं कृतवान्।

षोडशे सर्गे रामस्य पुत्रः कुशस्य वर्णनं प्राप्यते। कुशः कुशावतीं नगरीं शासयति स्म। कुशः कुशावतीं परित्याज्य पुन अयोध्यायां राजधानीं संस्थाप्य अयोध्यानगर्याः शोभावर्धनं कृतवान्। कुशस्य जल-विहारवर्णनं तथा आभूषणस्य लुप्तस्य चित्रणमत्र दृश्यते। नागराजा कुमुदः स्वीयं भगिनीं कुमुद्वतीं कुशाय समर्पयति। एवं बहुजाया सन् अपि कुशः कुमुद्वतीं विवाहं करोति।

सप्तदशसर्गे कुशस्य पुत्र अतिथेः वर्णनं सम्प्राप्नोति। कुशस्य मृत्योरनन्तरम् अतिथेः राज्याभिषेकं भवति। तत्र अतिथेः राज्यशासनस्य समयस्य आदर्शमयं वर्णनमत्र प्राप्यते। सर्गेऽस्मिन् राजनीतिविषयकानि बहूनि तथ्यानि उपलभ्यन्ते।

अष्टादशसर्गे अतिथे उत्तरवर्तीनाम् एकविंशतिसंख्यकानां राज्ञानां संक्षिप्तवर्णनं कविना प्रस्तूयते। ते यथा निषध-नल-नभ-पुण्डरीक-क्षेमधन्वा-देवानीक-अहीनगु-पारियात्र-शिल-उन्नाभ-वज्रणाभ-शंखण-व्युषिताश्वा-विश्वसह-हिरण्यनाभ-कौसल्या-ब्रह्मिष्ठ-पुत्र-पुष्य-ध्रुवसन्धि -सुदर्शनश्च। एतेषु राजसु सुदर्शनः षट्वर्षे एव राजा अभवत्। योवनप्राप्तेरनन्तरं तस्य विवाहकार्यं सम्पन्नं जातम्।

ऊणविंशतितमे सर्गे अथवा अन्तिमे सर्गे सुदर्शनस्य पुत्रस्य अग्निवर्णस्य वर्णनम् उद्धृयते। अग्निवर्णस्योपरि राज्यभारं समर्प्य सुदर्शनः सन्यासाश्रमे प्रवेशति। राजा अगिवर्ण अतीव कामभावसम्पन्नो राजा आसीत्। प्रजां सः कदापि दर्शनं न ददाति। अनेकराज्ञीभिः सह तस्य प्रेम्नः सम्पर्कवशात् क्षयरोगे तस्य राज्ञो मरणं सञ्जातम्। अग्निवर्णस्य मरणादनन्तरं तस्य गर्भवती राज्ञी सिंहासने उपविश्य राज्यभारं ग्रहणं करोति। एवं रघुवंशस्य समाप्तिर्जायते।

१.७ अध्यायस्य असमीयाभाषायां संक्षिप्तविवरणम्

প্ৰথম সৰ্গৰ আৰম্ভণিতে কবিয়ে ৰঘুবংশীয় ৰজাসকলৰ গুণৰ কথা কৈছে। সেই গুণসমূহেই কবিক ৰজাসকলৰ বিষয়ে লিখিবলৈ অনুপ্ৰেৰিত কৰিছিল। প্ৰথম সৰ্গত মহাকবি কালিদাসে ৰজা দিলীপৰ বৰ্ণনা দিছে। দিলীপৰ পত্নী সুদক্ষিণা নিঃসন্তান হৈ থকা বাবে কুলগুৰু বশিষ্ঠৰ আশ্ৰমলৈ গৈছিল। বশিষ্ঠই সন্তান লাভৰ বাবে সুৰভিধেনুৰ কন্যা নন্দিনীক শুশ্ৰূষা কৰিবলৈ উপদেশ দিছিল।

দ্বিতীয় সৰ্গত কবিয়ে ৰজা দিলীপ আৰু সুদক্ষিণাৰ তিনি সপ্তাহ কাল গোসেৱা ব্ৰতৰ কথা উল্লেখ কৰিছে। নন্দিনীয়ে ৰজা দিলীপৰ ভক্তিৰ পৰীক্ষা ল'বলৈ ইচ্ছা কৰি এটা গুহাত প্ৰৱেশ কৰিলে। ৰজাই হিমালয়ৰ প্ৰাকৃতিক সৌন্দৰ্য উপভোগ কৰি অন্যমনষ্ক হৈ থাকোঁতে এটি সিংহৰ চিঞৰ শুনিলে। সেই মায়াবী সিংহই নন্দিনীক ভক্ষণ কৰিবলৈ উদ্যত হ'ল। ৰজাই উপায়হীন হৈ নিজৰ শৰীৰটো সিংহক অৰ্পণ কৰি নন্দিনীক ৰক্ষা কৰিবলৈ চেষ্টা কৰিলে। বজাৰ দৃঢ়ভক্তিত নন্দিনী সন্তুষ্ট হ'ল আৰু পুত্ৰ লাভৰ বৰ দিলে। ৰজাৰ মনোবাঞ্ছা পূৰ্ণ হ'ল। ঋষিৰ আজ্ঞা অনুসৰি ৰজা দিলীপ আৰু সুদক্ষিণা ৰাজধানীলৈ উভতি আহিল।

তৃতীয় সৰ্গত ৰঘুৰ জন্ম বৰ্ণনা কৰা হৈছে। ৰঘুৰ শিক্ষা-দীক্ষা, অভিষেক আদিৰ বৰ্ণনাৰ লগতে দিলীপৰ অশ্বমেধ যজ্ঞৰ বৰ্ণনাও কৰা হৈছে। ৰজা দিলীপে শততম অশ্বমেধ যজ্ঞ শেষ নকৰাকৈয়ে ইন্দ্ৰৰ অনুগ্ৰহত তাৰ ফল লাভ কৰিলে। ৰঘুৰ হাতত ৰাজ্যভাৰ গতাই ৰাজদম্পতীয়ে বানপ্ৰস্থ গ্ৰহণ কৰিলে।

চতুৰ্থ সৰ্গত ৰঘুৰ দিগ্বিজয় আৰু শাসন ব্যৱস্থাৰ পৰিচয় পোৱা যায়। পূৰ্বদিশৰ পৰা দিগ্বিজয় আৰম্ভ কৰি ৰঘুৱে উৎকলদেশৰ মাজেৰে কলিঙ্গ দেশ পাৰ হৈ দক্ষিণ দিশলৈ যাত্ৰা কৰিলে। তাৰ পিছত তেওঁ দক্ষিণৰ পাণ্ড্যসকলক পৰাজিত কৰি সহ্যপৰ্বত অতিক্ৰম কৰিলে। পাৰসী, হুন, কম্বোজসকলকো পৰাভূত কৰি প্ৰাগজ্যোতিষ আৰু কামৰূপ পৰ্যন্ত ৰঘুৱে অধিকাৰ কৰিলে। বহু ধন-সোণ আৰু যশস্যা লৈ ৰঘুই ৰাজধানীলৈ উভতি আহিল। দিগ্বিজয়ী ৰজাই ৰাজ্যত বিশ্বজিত যজ্ঞ অনুষ্ঠিত কৰি ব্ৰাহ্মণসকলক বহুতো ধন সোণ দান কৰিলে।

পঞ্চম সৰ্গত ৰঘুৰ অসাধাৰণ দানশীলতাৰ বৰ্ণনা পোৱা যায়। ৰঘুৱে বিশ্বজিত যজ্ঞ সম্পাদন কৰি ধনহীন হৈ পৰিছিল। তেনে অৱস্থাত কৌৎস নামৰ ব্ৰহ্মচাৰী এজনে চৌধ্য কৌটি সোণৰ মোহৰ ৰজাৰ ওচৰত গুৰু দক্ষিণা হিচাপে বিচাৰে। ৰঘুৱে ব্ৰহ্মচাৰীক ধন দিবলৈ অপাৰগ হ'ল। সেয়েহে তেওঁ কুবেৰৰ ভঁৰাল আক্ৰমণ কৰিবলৈ মনস্থ কৰিলে। কিন্তু তাৰ আগতেই কুবেৰে ধন ৰঘুক অৰ্পণ কৰে। ব্ৰহ্মচাৰী কৌৎসই ধন লৈ ৰঘুক সাহসী আৰু বীৰপুত্ৰ লাভ কৰাৰ আশীৰ্বাদ দিয়ে। তাৰ পিছত ৰঘুৰ পুত্ৰ অজৰ জন্ম হ'ল। অজই ইন্দুমতীৰ স্বয়ম্বৰলৈ যোৱাৰ পথত এটা বনৰীয়া হাতীক আঘাত কৰিবলগীয়া হয়। সেই হাতীটো আছিল এটি শাপগ্ৰস্থ গন্ধৰ্ব। সেই গন্ধৰ্বই অজক সম্মোহন অস্ত্ৰ প্ৰদান কৰে। তাৰ পিছত অজ ইন্দুমতীৰ স্বয়ম্বৰ সভালৈ যায়।

ষষ্ঠ সৰ্গত ইন্দুমতীৰ স্বয়ম্বৰৰ বৰ্ণনা দিয়া হৈছে। মগধ, অঙ্গ, অৱন্তি, অনুপ, শূৰসেন, কলিঙ্গ, নাগপুৰ আদি সকলো দেশৰ ৰাজকুমাৰসকল স্বয়ম্বৰ সভাত উপস্থিত হৈছিল। ইন্দুমতীৰ পৰিচাৰিকা সুনন্দাই সকলোৰে পৰিচয় দিছিল। শেষত অজৰ সমুখত উপস্থিত হোৱাত ইন্দুমতীয়ে অজকেই বৰমাল্য অৰ্পণ কৰিছিল। উপস্থিত আন ৰাজকুমাৰসকলে অপমানিত বোধ কৰিলে।

সপ্তম সৰ্গত অজ আৰু ইন্দুমতীৰ বিবাহ অনুষ্ঠানৰ বৰ্ণনা পোৱা যায়। প্ৰত্যাখ্যাত ৰজাসকলে অজ আৰু ইন্দুমতী অযোধ্যালৈ উভতি যাওঁতে আক্ৰমণ কৰিলে। ইন্দুমতীৰ ৰক্ষাৰ ভাৰ মন্ত্ৰীসকলক দি অজই সম্মোহন অস্ত্ৰৰ প্ৰয়োগ কৰি আক্ৰমণকাৰীসকলক প্ৰতিহত কৰিলে। তাৰ পিছত অজ আৰু ইন্দুমতী অযোধ্যাত উপস্থিত হ'ল। ৰজা ৰঘুৱে অজক ৰাজ্যৰ দায়িত্ব অৰ্পণ কৰিলে।

অষ্টম সৰ্গত ৰঘুৱে বানপ্ৰস্থ অৱলম্বন কৰিলে। কিছুদিন পাছত বন্ধুৰ মৃত্যু হৈছিল। অজই ৰঘুৰ শেষকৃত্য উপযুক্ত ধৰণে সম্পন্ন কৰিলে। যথাসময়ত অজ আৰু ইন্দুমতীৰ পুত্ৰ দশৰথৰ জন্ম হ'ল। এদিন প্ৰমোদ উদ্যানত অজ আৰু ইন্দুমতীয়ে বিহাৰ কৰি থাকোতে এধানি ফুলৰ মালা ইন্দুমতীৰ শৰীৰত পৰিল। তাতেই ৰাণীৰ মৃত্যু ঘটিল। ৰজাই এই ঘটনাত অতি শোক পালে। ৰজাৰ শোক পাতলাবলৈ বশিষ্ঠ মুনিয়ে এজন শিষ্য পঠালে। সেই শিষ্যগৰাকীয়ে ৰজাক ক'লে যে ইন্দুমতী এগৰাকী শাপগ্ৰস্থা অপ্সৰা। সেই মালাধাৰীয়ে ইন্দুমতীক শাপমুক্তা

কৰিছে। মৃত্যু সকলোৰে ঘটিবই। সেয়েহে জ্ঞানীলোকে এইদৰে শোক কৰা উচিত নহয়। অজই দেখাত শান্ত হ'লেও পত্নীৰ মৃত্যুত ভাঙি পৰিছিল। আঠ বছৰৰ পাছত অজৰো মৃত্যু ঘটিছিল।

নৱম সৰ্গত দশৰথৰ বৰ্ণনা পোৱা যায়। ইন্দ্ৰ তেওঁৰ পৰম সখা আছিল। বসন্তোৎসৱৰ উপভোগ কৰি থাকোঁতে ৰজা দশৰথে এদিন তমসা নদীত শব্দ শুনিবলৈ পালে। সেয়া হাতীৰ শব্দ বুলি ভাবি শব্দভেদী বাণ নিক্ষেপ কৰিলে। সেই বানে এজন মুনিকুমাৰক বিন্ধিছিল। মুনিকুমাৰৰ মৃত্যু হোৱাত দশৰথে তেওঁৰ অন্ধ পিতৃ-মাতৃৰ ওচৰত অনিচ্ছাকৃতভাৱে কৰা অপৰাধৰ কথা নিবেদন কৰিলে। তেওঁলোকে ৰজাকো পুত্ৰশোকত প্ৰাণ হেৰুৱাব বুলি শাপ দিয়ে। তেতিয়ালৈ ৰজাৰ পুত্ৰ নথকাত তেওঁ সেই শাপ বৰ হিচাপেই গ্ৰহণ কৰিলে।

দশম সৰ্গত ৰজা দশৰথৰ পুত্ৰেষ্টি যাগৰ কথা পোৱা যায়। ইফালে ৰাৱণৰ অত্যাচাৰত দেৱতাসকল অতিষ্ঠ হৈ বিষ্ণুৰ ওচৰ চাপিল। বিষ্ণুৱে দেৱতাসকলক কৈছিল যে ব্ৰহ্মাৰ বৰত দুসাহসী হোৱা ৰাৱণক তেওঁ ৰাম হিচাপে জন্মলৈ বিনাশ কৰিব। যজ্ঞৰ হোমাগ্নিৰ পৰা এগৰাকী দিব্য পুৰুষৰ আৱিৰ্ভাব হ'ল আৰু এই পুৰুষজনে ৰজাৰ হাতত যজ্ঞৰ চৰু প্ৰদান কৰিলে। দশৰথে সেই দেৱতাৰ আশীৰ্বাদ গ্ৰহণ কৰি কৌশল্যা, কৈকেয়ী আৰু সুমিত্ৰাক তাৰ ভাগ দিয়ে। যথাসময়ত তিনিওগৰাকী ৰাণীৰ গৰ্ভত ৰাম, ভৰত, লক্ষ্মণ আৰু শত্ৰুঘ্ন নামেৰে চাৰিজন পুত্ৰৰ জন্ম হ'ল।

একাদশ সৰ্গত ঋষি বিশ্বামিত্ৰই ৰাক্ষসবোৰৰ পৰা যজ্ঞ ৰক্ষা কৰিবলৈ ৰাম আৰু লক্ষ্মণক নিবলৈ অযোধ্যালৈ আহিছিল। বিশ্বামিত্ৰৰ লগত যাওঁতে পথত ৰামে তাড়কা ৰাক্ষসীক বধ কৰিছিল। আশ্ৰমত সুবাহু আৰু মাৰীচকো বধ কৰিছিল। যজ্ঞৰ অন্তত ৰজা জনকৰ আমন্ত্ৰণ ক্ৰমে বিশ্বামিত্ৰৰ সৈতে ৰাম আৰু লক্ষ্মন মিথিলালৈ গ'ল। পথত ৰামে অহল্যাৰ শাপমুক্তি ঘটালে। মিথিলালৈ আহি জনক ৰজাৰ হৰধনু ভঙ্গ কৰি সীতাক পত্নীৰূপে ৰামে লাভ কৰিলে। তাৰ পিছত দশৰথকো মিথিলালৈ আমন্ত্ৰণ কৰি অনা হ'ল। ৰাম আৰু সীতাৰ বিবাহৰ পাছত ঊৰ্মিলা আৰু লক্ষ্মণ, মাণ্ডবী আৰু ভৰত, শ্ৰুতকীৰ্তি আৰু শত্ৰুঘ্নৰ বিবাহসম্পন্ন হ'ল। ইয়াৰ পিছত অযোধ্যালৈ উভতি যোৱাৰ পথত ৰামে পৰশুৰামক লগ পালে। পৰশুৰামে নিজৰ ধনুখন আগবঢ়াই তাত শৰ যোজন কৰিবলৈ ক'লে। ৰামে অনায়াসে পৰশুৰামৰ দৰ্পচূৰ্ণ কৰি অযোধ্যাত প্ৰৱেশ কৰিলে ।

দ্বাদশ সৰ্গত ৰজা দশৰথে ৰামচন্দ্ৰৰ অভিষেকৰ আয়োজন কৰিলে। কিন্তু কৈকেয়ীয়ে পূৰ্বতে প্ৰতিশ্ৰুত দুটা বৰ দিয়াৰ বাবে দশৰথক প্ৰাৰ্থনা জনালে। এটি বৰৰ দ্বাৰা ৰামৰ বনবাস আৰু আনটো বৰৰ দ্বাৰা ভৰতৰ অভিষেক বিচাৰিলে। ৰাম, লক্ষ্মণ আৰু সীতা বনবাসলৈ গ'ল। পুত্ৰশোকত দশৰথৰো মৃত্যু ঘটিল। ভৰতে ৰজা হ'বলৈ অমান্তি হ'ল। ৰামৰ প্ৰতিনিধি হিচাপে তেওঁ নন্দিগ্ৰামৰ পৰা ৰাজ্য শাসন কৰিবলৈ ধৰিলে। ৰামে বনবাসৰ কালছোৱাত বিৰাধ, খৰ, দূষণ আদি ৰাক্ষকসকলক বধ কৰিলে। লক্ষ্মণে ৰাৱণৰ ভনীয়েক শূৰ্পনখাৰ অঙ্গক্ষত কৰিলে। ৰাৱণে মায়াবলেৰে সীতাক হৰণ কৰিলে। ৰামে সুগ্ৰীব আৰু হনুমানৰ সহায়ত সমুদ্ৰত সেতু বান্ধি ৰাৱণৰ লঙ্কাত প্ৰৱেশ কৰিলে আৰু যুদ্ধত ৰাৱণক বধ কৰি বিভীষণক লঙ্কাৰ ৰজা পাতিলে। তাৰ পিছত ৰামচন্দ্ৰই পুষ্পক বিমানেৰে সীতাৰে সৈতে অযোধ্যালৈ প্ৰত্যাৱৰ্তন কৰিলে।

ত্ৰয়োদশ সৰ্গত অযোধ্যা প্ৰত্যাৱৰ্তনৰ সময়ত পথত পোৱা স্থানসমূহৰ সুন্দৰ বিৱৰণ

পোৱা যায়। সাগৰ, জনস্থান, মাল্যবান পর্বত, পম্পাসৰোৱৰ, গোদাৱৰী নদী, পঞ্চবটী, অগস্ত্য শাতকর্নি, শৰভঙ্গা আদি ঋষিসকলৰ আশ্রম। চিত্রকূট পর্বত, মন্দাকিনী নদী, গঙ্গা-যমুনাৰ সঙ্গম, সৰযু নদী আদিৰ বর্ণনা এই সর্গত উপস্থাপন কৰা হৈছে। ভৰত, কুলগুৰু বশিষ্ঠ আদিয়ে ৰামক আদৰি নিব আহিছিল। ভাতৃমিলনৰ দৃশ্য কবিয়ে বৰ সুন্দৰকৈ প্রকাশ কৰিছে। তাৰ পিছত তেওঁলোক অযোধ্যাৰ বাহিৰৰ এখন উদ্যানত উপস্থিত হৈছিল।

চতুর্দশ সর্গত ৰাম লক্ষ্মণৰ মাতৃদর্শণৰ বর্ণনা প্রথমতেই পোৱা যায়। তাৰ পিছত ৰাম অযোধ্যাৰ ৰজা হয়। সুগ্রীৱ আৰু বিভীষণক বিদায় দি পুষ্পকবিমান ৰামে কুবেৰলৈ উভতাই পঠালে। সময়ৰ লগে লগে সীতা সন্তান সম্ভৱা হ'ল। কিন্তু ৰামচন্দ্রই প্রজাৰ মুখত সীতাৰ নিন্দা শুনিলে। লোক অপবাদৰ ভয়ত ৰামে সীতাক গঙ্গাৰ পাৰত বাল্মীকি মুনিৰ আশ্রমত এৰি আহিবলৈ লক্ষ্মণক আদেশ দিলে। সীতাই সেই কথা গম পাই শোকাভিভূত হ'ল। বাল্মীকিয়ে সীতাক নিজৰ আশ্রমলৈ লৈ গ'ল।

পঞ্চদশ সর্গত শত্রুঘ্নই ৰামৰ আদেশমতে লৱন-ৰাক্ষসক দমন কৰিবলৈ মথুৰালৈ যায়। বাল্মীকিৰ আশ্রমত অৱস্থান কৰাৰ দিনাই সীতাৰ যমজ সন্তান লৱ আৰু কুশৰ জন্ম হয়। বাল্মীকিয়ে তেওঁলোকক সুশিক্ষিত কৰাৰ উপৰিও নিজে ৰচিত ৰামায়ণ গান কৰিবলৈ শিকাইছিল। শত্রুঘ্নই এই বিষয়ে ৰামক একোকে কোৱা নাছিল। তাৰ পিছত ৰামে শম্বুকক বধ কৰি অশ্বমেধ যজ্ঞৰ আয়োজন কৰে। বাল্মীকিও আমন্ত্রিত হৈ লৱ কুশৰে সৈতে এই যজ্ঞলৈ আহে। লৱ কুশৰ গীতত সকলো মুগ্ধ হয়। বাল্মীকিৰ পৰা ৰামে তেওঁলোক দুয়োজনৰ পৰিচয় পালে। ৰামচন্দ্রই সীতাকো আৰু এবাৰ অগ্নিপৰীক্ষাৰ পাছত গ্রহণ কৰিব বুলি ক'লে। কিন্তু সীতাই ধৰিত্রীৰ বুকুত আশ্রয় লৈ নিজৰ পৰিত্রতাৰ প্রমাণ দিলে। ইয়াৰ পাছত ৰামে ভাতৃ, পুত্র আৰু ভতিজাকসকলক ৰাজ্য অর্পণ কৰি স্বর্গাৰোহণ কৰিলে।

ষোড়শ সর্গত ৰামৰ পুত্র কুশৰ বর্ণনা পোৱা যায়। কুশই কুশাৱতী নগৰী শাসন কৰিছিল। অযোধ্যাৰ ৰাজলক্ষ্মীৰ অনুনয়ত পুনৰ অযোধ্যা নগৰী সমৃদ্ধ কৰি তুলিলে। এদিন সৰযূ নদীত তেওঁ ক্রীড়া কৰি থাকোঁতে হাতৰ কঙ্কন পানীত পৰিল। বহু অনুসন্ধান কৰা সত্ত্বেও পোৱা নগ'ল। তেনে সময়তে পাতালৰ নাগৰাজ কুমুদে সেই আভৰণ আনি কুশৰ হাতত অর্পণ কৰিলে। কুমুদ্বতীয়ে সেই অলঙ্কাৰ কৌতূহলী হৈ লুকাই ৰাখিছিল। নাগৰাজে কুশক কুমুদ্বতীক বিবাহ কৰাবলৈ অনুৰোধ জানলে। কুশেও আনন্দমনে কুমুদ্বতীক বিবাহ কৰালে।

সপ্তদশ সর্গত কুশৰ পুত্র অতিথিৰ বর্ণনা সবিস্তাৰে কৰা হৈছে। কুশৰ মৃত্যুৰ পাছত অতিথি ৰজা হৈছিল। দুর্জয় নামৰ ৰাক্ষস এটাৰ হাতত অতিথিৰ মৃত্যু হৈছিল। অতিথি ৰাজনীতিবিদ্যাত অতিশয় নিপুণ আছিল। এই দক্ষতাৰ বাবে প্রজাসকলো সুখী আছিল। সর্গটোত ৰাজনীতি শাস্ত্র বিষয়ক বহু তথ্য পোৱা যায়।


অষ্টাদশ সর্গত অতিথিৰ পিছত একৈশজন ৰজাৰ তালিকা দিয়া হৈছে। তেওঁলোক সকলোৱেই সুশাসক আছিল। একৈশজন ৰজাৰ ভিতৰত সুদর্শন মাত্র ছবছৰ বয়সত ৰজা হৈছিল। তেওঁ যৌৱনপ্রাপ্ত হোৱাত বিবাহ কৰাইছিল।

ঊনবিংশ সর্গত সুদর্শনৰ পুত্ৰ অগ্নিবর্ণৰ বর্ণনা পোৱা যায়। অগ্নিবর্ণৰ হাতত ৰাজ্যভাৰ অর্পণ কৰি সুদর্শনে সন্ন্যাস গ্রহণ কৰিলে। অগ্নিবর্ণ অত্যন্ত বিলাসী আৰু কামপৰায়ণ আছিল। তেনেকৈ যক্ষ্মাত ৰোগত অগ্নিবর্ণৰ মৃত্যু ঘটিল। সেই সময়ত ৰাণী গর্ভৱতী আছিল। ৰাণীয়ে সন্তানৰ কথা ভাবি ৰাজ্যক সুশাসন কৰিছিল। এইখিনিতেই 'ৰঘুবংশম্' মহাকাব্যৰ সামৰণি পৰে।

१.८ रघुवंशस्य राजानः

'रघुवंशम्' इति महाकाव्यं महाकवेः कालिदासस्य उत्कृष्टतमं रचनमस्ति। अस्मिन् महाकाव्ये ऊणत्रिंशत्संख्यकानां रघुवंशीयानां राज्ञां वर्णनं प्राप्यते। अत्र वर्णितेषु ऊनत्रिंशत्संख्यकेषु राजसु प्रथम आसीत् दिलीपः अन्तिमश्च अग्निवर्णः। पुराणेषु वर्णितानुसारं महाकाव्येऽस्मिन् दिलीपस्य पूर्वपुरुषाणां वर्णनं न विद्यते, अत्र तु केवलं दिलीपं वैवस्वतमनोः उत्तरपुरुषरूपेण स्वीक्रियते। राज्ञो दिलीपस्य पराक्रमी पुत्र आसीत् रघुः। रघोः पुत्रो वर्तते अजः, पुनः अज-इन्दुमत्योः पुत्रो दशरथरिति। राज्ञो दशरथस्य राम-भरत-लक्ष्मण-शत्रुघ्नश्चेति चत्वारः पुत्रा आसन्। एतेषु ज्येष्ठस्य रामस्य सन्तानो लवः, कुशश्च। कुश-कुमुद्वत्योः पुत्र आसीत् अतिथिः। अतिथेः पुत्र निषेध आसीत्। निषेधस्य पुत्र आसीत् नलः। नलस्य पुत्रो नभसः, नभसस्य पुत्र आसीत् पुण्डरीकः। क्षेमधन्वा आसीत् पुण्डरीकस्य पुत्रः। तस्य क्षेमधन्वाराज्ञः पुत्र आसीत् देवानीकः। देवानीकस्य पुत्रो वर्तते आहीनगुः। आहीनगोः पुत्रः परियात्रा, परियात्रायाः पुत्रः शीलः। शीलस्य पुत्रो वर्तते उन्नाभः। उन्नाभस्य पुत्रः बज्रनाभरिति। एवं बज्रनाभस्य पुत्र आसीत् शङ्खन इति।

शङ्खनस्य पश्चात् प्रत्येकस्य पुत्रः क्रमानुसारं रघुवंशस्य राजा अभवत्। एतेषां राज्ञां नामानि क्रमपूर्वकं यथा- व्युषिताश्व-विश्वसह-हिरण्यनाभ-कौशल्य-ब्रह्मिष्ठ-पुत्र-पुष्य-ध्रुवसिद्धि-सुदर्शन-अग्निवर्णश्चेति। एते एव वर्तन्ते ऊणत्रिंशत्संख्यकाः रघुवंशीयाः राजानः।



अग्रगत्याः निरीक्षणम्

प्रश्नः ११ - रघुवंशे वर्णितः प्रथमो राजा कः ?

.....

प्रश्नः १२ - रघुवंशे वर्णितोऽन्तिमो राजा कः ?

.....

प्रश्नः १३ - राज्ञो रघोः पिता च माता च कः ?

.....

प्रश्नः १४ - रघुवंशे वर्णितानुसारं राज्ञो रघोः पूर्वपुरुषः कः ?

.....



१.८ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- पञ्चषु महाकाव्येषु 'रघुवंशम्' इति महाकाव्यम् अन्यतमं श्रेष्ठतमं महाकाव्यम्।
- महाकाव्यस्य लक्षणविषये सम्यक् धारणां ज्ञातवन्तः।
- महाकाव्यस्यास्य मूलस्त्रोतं ज्ञातवन्तः।
- अस्य महाकाव्यस्य टीकाविषये ज्ञानं लब्धवन्तः।
- 'रघुवंशम्' इति महाकाव्यस्य प्रत्येकानां सर्गानां विषयवस्तुन उपरि सम्यक् ज्ञानं लब्धवन्तः।
- रघुवंशीयानां राज्ञां संक्षेपं परिचयं प्राप्तवन्तः।
- महाकविकालिदासस्य विषये संक्षेपरूपेण परिचयं लब्धवन्तः।



१.१० ज्ञानाधिक्यम्

१) डा., शर्मा, ऋषि, उमाशङ्कर (२०२१) : संस्कृत साहित्य का इतिहास; चौखम्भा भारती अकादमी, वाराणसी।

२) काले, एम. आर. (सम्पा.) : रघुवंशम् अव् कालिदास (१-५); मतिलाल वानारसीदास पाब्लिछार्च प्राइभेट लिमिटेड, दिल्ली।

३) नन्दर्गिकार, गोपाल रघुनाथ (१९८२) (सम्पा.): रघुवंशम् अव् कालिदास (१-५); मतिलाल वानारसीदास, दिल्ली।

४) शास्त्री, अशोकनाथ & भाञ्जा सरोजनाथ (१९५१) (सम्पा.) कालिदासस्य रघुवंशम्; मडार्ण वुक एजेन्सि।



१.११ अग्रगत्याः निरूपणम्

प्रश्नः १ – उत्तरम् – रघुवंशम्' इति महाकाव्यस्य कर्ता महाकविः कालिदासः।

प्रश्नः २ – उत्तरम् – 'रघुवंशम्' इति महाकाव्ये ऊणविंशतिः सर्गाः सन्ति।

प्रश्नः ३ – उत्तरम् – 'रघुवंशम्' इति महाकाव्ये ऊणत्रिंशत् संख्यकानां राज्ञां वर्णनं प्राप्यते।

प्रश्नः ४ – उत्तरम् – रघुवंशम्' इति महाकाव्यस्योपरि त्रयस्त्रिंशत् संख्यकाः टीकाः प्राप्यन्ते।

प्रश्नः ५– उत्तरम् – 'रघुवंशम्' महाकाव्यस्य प्रसिद्धः टीकाकारो मल्लिनाथः।

प्रश्नः ६ – उत्तरम् – 'रघुवंशम्' महाकाव्यस्य प्रसिद्धः टीकाग्रन्थः 'सञ्जीवनी' टीका।

प्रश्नः ७ – उत्तरम् – महाकविकालिदासः राज्ञो विक्रमादित्यस्य राजसभायाः कविः आसीत्।

प्रश्नः ८ – उत्तरम् – कालिदासप्रणीतः अपरम् एकं महाकाव्यमस्ति 'कुमारसम्भवम्'।

प्रश्नः ९ – उत्तरम् – महाकविना कालिदासेन खण्डकाव्यद्वयं विरचितम्– 'मेघदूतम्', 'ऋतुसंहारम्' च।

प्रश्नः १० – उत्तरम् – महाकविना कालिदासेन त्रीणि नाटकानि रचितानि – 'अभिज्ञानशाकुन्तलम्', 'विक्रमोर्वशीयम्', 'मालविकाग्निमित्रम्' चेति।

प्रश्नः ११ – उत्तरम् – रघुवंशे वर्णितः प्रथमो राजा दिलीपः।

प्रश्नः १२ – उत्तरम् – रघुवंशे वर्णितोऽन्तिमो राजा अग्निवर्णः।

प्रश्नः १३ – उत्तरम् – राज्ञो रघोः पिता दिलीपः, माता च सुदक्षिणा।

प्रश्नः १४ – उत्तरम् – रघुवंशे वर्णितानुसारं राज्ञो रघोः पूर्वपुरुषः वैवस्वतो मनुः।



१.१२ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)।

प्रश्नः – १ : महाकविकालिदासस्य प्रमुखाः रचनाः के ?

प्रश्नः – २ : 'रघुवंशम्' इति महाकाव्यस्य मुख्यानि स्त्रोतांसि कानि ?

प्रश्नः – ३ : 'रघुवंशम्' इति महाकाव्ये महाकाव्यस्य लक्षणानि केन प्रकारेण प्रतिफलितो दृश्यते ?

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)।

प्रश्नः – ४ : रघुवंशीयराज्ञां संक्षेपः परिचयो लिखन्तु।

प्रश्नः – ५ : 'रघुवंशम्' इति महाकाव्यस्य नामकरणस्य तात्पर्यं लिखन्तु।

ग) नातीदीर्घाः प्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००–५०० शब्देषु लिखन्तु)

प्रश्नः– १ : 'रघुवंशम्' इति महाकाव्यस्य प्रत्येकानां सर्गानां विषयवस्तुः संक्षेपेण लिखन्तु।

प्रश्नः– २ : महाकविकालिदासस्योपरि संक्षेपं परिचयं लिखन्तु।

*** ***** ***

अध्यायः २ : रघुवंशम् - प्रथमसर्गः (श्लोकाः १-१०)

अध्यायस्य संरचना

१.१ उद्देश्यम्

१.२ परिचयः

१.३ प्रथमसर्गस्य सारांशः

२.४ 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य शीर्षकस्य तात्पर्यम्

२.५ प्रथमसर्गस्य प्रथमतो दशमश्लोकं यावत् (१-१०) श्लोकानां संस्कृतपाठः

- २.५.१ श्लोकानाम् अन्वयः
- २.५.२ श्लोकानां शब्दार्थः
- २.५.३ श्लोकानाम् असमीयानुवादः
- २.५.४ व्याकरणटिप्पणी

२.६ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

२.७ प्रथमसर्गस्य प्रथमतो दशमश्लोकं यावत् (१-१०) कतिपयाणां श्लोकानां व्याख्या भावार्थश्च

२.८ अध्यायात् किमवगतम्

२.९ ज्ञानाधिक्यम्

२.१० अग्रगत्याः निरूपणम्

२.११ अभ्यासप्रश्नाः

२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन प्रथमसर्गस्य सारांशं ज्ञातुं प्रभवन्ति।
- अस्य पाठस्य अध्ययनेन प्रथमसर्गस्य प्रथमतो दशमश्लोकं यावत् विषयम् अवगन्तुं शक्नुवन्ति।
- प्रथमसर्गस्य प्रथमतः दशमश्लोकं यावत् श्लोकानाम् संस्कृतपाठ-शब्दार्थ-अनुवादाः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य प्रथमतः दशमश्लोकं यावत् श्लोकानां व्याकरणटिप्पण्यः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य प्रथमतः दशमश्लोकं यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च ज्ञातुं शक्नुवन्ति।

२.२ परिचयः

भवन्तः प्रथमाध्याये महाकविकालिदासविरचितस्य 'रघुवंशम्' इति महाकाव्यस्य संक्षेपं परिचयं प्राप्तवन्तः। तत्र भवन्तो रघुवंशस्य प्रत्येकानां सर्गानां विषयवस्तुमपि ज्ञातवन्तः। पुनश्च इक्ष्वाकुवंशीयानां राज्ञां परिचयमपि प्राप्तवन्तः। तेषु राजसु श्रेष्ठतमो राजा वर्तते राजा दिलीपः। 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गे राज्ञो दिलीपस्य वर्णनं प्राप्यते। अध्यायेऽस्मिन् भवन्तो 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य प्रथमतो दशमश्लोकं यावत् (१-१०) विषयवस्तुनः सम्यक् धारणां ज्ञास्यन्ति। रघुवंशीयानां राज्ञां गुणानां विषयेऽपि अध्यायेऽस्मिन् पठितुं शक्नुवन्ति। अध्यायेऽस्मिन् श्लोकानां संस्कृतपाठ-शब्दार्थ-असमीयानुवाद- व्याकरणटीप्पण्यः ज्ञातुं शक्नुवन्ति। एतदतिरिक्त्य कतिपयाणां महत्वपूर्णानां श्लोकानां व्याख्या भावार्थश्च ज्ञातुं प्रभवन्ति।

२.३ प्रथमसर्गस्य सारांशः

इदानीं भवन्तो 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य सारांशं ज्ञास्यन्ति। अस्य महाकाव्यस्य प्रारम्भे कविः निर्विघ्नपरिसमाप्तये मङ्गलाचरणे आदौ जगतोऽस्य माता-पितरौ स्वरूपौ शिव-पार्वत्यौ वन्दति। सूर्यात् उत्पद्यमानस्य अस्य वंशस्य वर्णनं कर्तुं कविः स्वकीयस्य योग्यताविषये सन्देहं प्रकाशयति। तथापि पूर्वकवीनां काव्यकृतिना अनुप्रेरितं भूत्वा इदं काव्यं रचयितुम् आग्रहं प्रकाशयति। कविकालिदासः सूर्यवंशीयराज्ञां माहात्म्यवर्णने असमर्थः सन् अपि तेभ्यो राजभ्यो गुणेभ्यः प्रभावितो भूत्वा अस्य वंशस्य राज्ञां चरित्राणां महित्त्ववर्णने निरतो भवति। रघुकुले जायमानाः राजान आजन्मशुद्धा-अध्यवसायमुक्ता-फलसिद्धिपर्यन्तकार्यरता-समुद्रपर्यन्तभूभागस्य शासकाश्च आसन्। ते तु विधिपूर्वकं यागं सम्पादितवन्तः। ते याचकान् प्रति पर्याप्तं दानमपि दत्तवन्तः। शास्त्रपूर्वकं दोषयुक्तान् दण्डविधानं दत्तवन्तः तथा च समयानुरूपं जाग्रतमासन्। दानार्थं करसंग्रहरूपेण अर्थसंग्रहम् अकुर्वन्। सत्यरक्षार्थं मितभाषी आसन्। यशलाभाय विजयकामनां सन्तानलाभाय विवाहं कृतवन्तः। शैशवे विद्याभ्यासः, यौवने विषयभोगः, वार्द्धक्ये वानप्रस्थजीवनयापनं सम्पाद्य अन्तिमे परमात्मनः ध्यानेन शरीरं त्याक्तवन्तः। एतेषु सर्वगुणसम्पन्नेषु राजसु प्रथमो राजा आसीत् मनुः। वैवस्ततमनो अस्मिन् वंशे एव राज्ञो दिलीपस्य जन्मोऽजायत। सर्वगुणसम्पन्नस्य राज्ञो दिलीपस्य पत्नी आसीत् दया-दाक्षिण्यादिगुणयुक्ता मगधराजकन्या सुदक्षिणा। विशालसाम्राज्यस्य अधिकारी सन् अपि राज्ञो दिलीपस्य मानसिकशान्तिः नासीत्। यतोहि तौ निःसन्तान आस्ताम्। तस्मात् सन्तानप्राप्ते उपायहेतुः तौ कुलगुरुवशिष्ठस्य आश्रमं प्रति यात्राम् अकुरुताम्। सन्ध्याकालस्य मनोरमपरिवेशे सुदक्षिणया सह राजा दिलीपो वशिष्ठमुने आश्रमे उपस्थितम् अभवत्। राजा राज्ञी च उभौ मुनिं वशिष्ठं भक्तियुक्तं प्रणामं कृतवन्तौ। मुनिः यदा राजानं दिलीपं कुशलवार्ता पृष्टवान् तदा राजा अपुत्रवशात् पितृणं परिशोधियितुम् असमर्थ इति खेदं प्रकटितवान्। त्रिकालद्रष्टा वशिष्ठो योगवलेन राज्ञः सन्तानहीनतायाः कारणं ज्ञातवान्। एकदा इन्द्रदेवं साहायं कृत्वा स्वर्गात् प्रत्यावर्तनसमये पत्न्याः चिन्तायां निमग्नो दिलीपः स्वर्गस्य कामधेनुं सुरभिम्

अभिवादयितुं विस्मृतवान्। तस्याः सुरभे अभिशापरेव दिलीपस्य सन्ताहीनतायाः कारणमिति। सुरभे अनुपस्थितौ अपि सुरभिकन्या-नन्दिन्याः सेवया राजा दिलीपः शापमुक्तं भवितुमर्हति इति राजानम् अवदत्। अतो वशिष्ठमुने आश्रमे स्थियमानां नन्दिनीं शुश्रुषां कर्तुं वशिष्ठो दिलीपं उपदिशति स्म। वशिष्ठस्य आश्रमे एव ब्रह्मचर्यव्रतमवलम्व्य दिलीपेन सुदक्षिणया सह कामधेनुनन्दिन्याः सेवायां निरतो जातः।

२.४ 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य शीर्षकस्य तात्पर्यम्

प्रथमसर्गस्य सारांशम् अध्ययनात्परं भवन्त अस्य नामकरणस्य तात्पर्यं ज्ञातुं शक्नुवन्ति। महाकाव्यस्य लक्षणानुसारं प्रत्येकस्य सर्गस्य नामकरणं भवेत्। तस्मात् कालिदासोऽपि रघुवंशस्य प्रत्येकस्य सर्गस्य पृथक्रूपेण नामकरणं कृतवान्। 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य नाम वर्तते 'वशिष्ठाश्रमाभिगमनम्' इति। रघुवंशीयराज्ञां कुलगुरु आसीत् ऋषिः वशिष्ठः। ऋषेः तपप्रभावादेव राजा दिलीपः सुष्ठुरूपेण राज्यशासनं कृतवान् तथा प्रजारपि सकलामङ्गलात् मुक्तम् अभवन्। अपुत्रवशात् राज्ञो दिलीपस्य सुखं कुत्रापि नासीत्। पितृर्णं परिशोधयितुम् असमर्थरिति भीतस्य राज्ञः कुलगुरुरेव आसीत् एकमेव उपायः। तस्मात् स्वपत्न्याः शुद्धिहेतुः राजा दिलीपो वशिष्ठमुने आश्रमं प्रति यात्रां कृतवान्। यात्रामार्गे प्रकृतिजगति मनोवाञ्छापूर्तेः पूर्वाभासं प्राप्य दिलीपः सुदक्षिणा च आश्रमे उपस्थितम् अभवताम्। तपोवने शान्तवातावरणे नन्दिन्याः शुश्रूषया स्वीयम् अभिलाषं पूर्तये अग्रेसरति। दिलीप-सुदक्षिणयो आश्रमप्राप्तेः तथा च उद्देश्यप्राप्तेः प्रथमप्रयासरूपेण प्रथमसर्गस्य नामकरणं समीचीनं वर्तते।



अग्रगत्याः निरीक्षणम्

प्रश्नः १ - 'रघुवंशम्' इति महाकाव्यस्य मङ्गलाचरणे कयोः वन्दना प्राप्यते ?

.....

प्रश्नः २ - रघुवंशस्य उत्पत्तिः कस्मात् जायते ?

.....

प्रश्नः ३ - 'रघुवंशम्' महाकाव्ये वर्णितः प्रथमो राजा कः ?

.....

प्रश्नः ४ - राज्ञो दिलोपस्य पत्नी का आसीत् ?

.....

प्रश्नः ५ - रघुवंशीयराज्ञां कुलगुरुः कः ?

.....

२.५ प्रथमसर्गस्य प्रथमतः दशमश्लोकं यावत्(१-१०) श्लोकानां संस्कृतपाठः

१) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

२) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

३) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

४) अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्व सूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥

५) सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आसमुद्रक्षितिशानामानाकरथवर्त्मनाम्॥

६) यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकाल प्रबोधिनाम् ॥

७) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥

८) शैशवेऽभ्यस्तविद्यानां यौवने विषयौषिणाम्।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

९) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्ममागत्य चापलाय प्रचोदितः॥

१०) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

२.५.१ श्लोकानाम् अन्वयः

१) वागर्थाविव सम्पृक्तौ जगतः पितरौ पार्वती परमेश्वरौ वागर्थप्रतिपत्तये वन्दे।

२) सूर्यप्रभवः वंशः क्व? अल्पविषया मतिश्च क्व? मोहात् उडुपेन दुस्तरं सागरं तितीर्षुः अस्मि।

३) मन्दः कवियशः प्रार्थी प्रांशुलभ्ये फले लोभात् उद्बाहुः, वामनः इव उपहास्यताम् गमिष्यामि।

४) अथवा पूर्वसूरिभिः कृतवाग्द्वारे अस्मिन्वंशे, वज्रसमुत्कीर्णे मणौ सूत्रस्य इव मे गतिः अस्ति।

५) सः अहम् आजन्मशुद्धानाम् आफलोदयकर्मणाम् आसमुद्रक्षितीशानाम्, आनाकरथवर्त्मनाम् 'रघूणामन्वयं वक्ष्ये' इति।

६) यथाविधिहुताग्नीनाम् यथाकामार्चितार्थिनाम्। यथापराध दण्डानाम्, यथाकाल प्रबोधिनाम्।

७) त्यागाय सम्भ्रतार्थानाम् सत्याय मितभाषिणाम्, यशसे विजिगीषूणाम् प्रजायै गृहमेधिनाम्।

८) शैशवे अभ्यस्तविद्यानाम् यौवने विषयौषिणाम् वार्द्धके मुनिवृत्तिनाम् अन्ते योगेन तनुत्यजाम्।

९) तनुवाग्विभवः अपि सन् तद्गुणैः कर्णम् आगत्य चापलाय प्रचोदितः रघूणाम् अन्वयम् वक्ष्ये।

१०) तम् सद् असद् व्यक्तिहेतवः सन्तः श्रोतुम् अर्हन्ति हि हेम्नः विशुद्धिः श्यामिका अपि वा अग्नौ संलक्ष्यते।

२.५.२ श्लोकानां शब्दार्थः

१) वागर्थाविव = शब्दार्थौ इव, सम्पृक्तौ = नित्यसम्बद्धयुक्तौ, जगतः = संसारस्य, पितरौ = माता च पिता च, पार्वती परमेश्वरौ = उमा-महेश्वरौ, वागर्थप्रतिपत्तये = शब्दार्थस्य ज्ञानाय, वन्दे = प्रणमामि।

२) सूर्यप्रभवः = सूर्योत्पन्नः, वंशः = अन्वयः, क्व = कुत्र, अल्पविषया = स्वल्पज्ञाः, मतिश्च = बुद्धिश्च, क्व = कुत्र, मोहात् = अज्ञानात्, उडुपेन = प्लवेन, दुस्तरं = तरितुम् अशक्यम्, सागरं = समुद्रम्, तितीर्षुः = तरितुम् इच्छुः, अस्मि = भवामि।

३) मन्दः = मूढः, कवियशः प्रार्थी = कवीनां यशम् इच्छन्, प्रांशुलभ्ये = उन्नत पुरुषेण प्राप्यम्, फले = फलविषये, लोभात् = फललिप्सया, उद्बाहु = औच्छ्रितहस्तः, वामनः इव = खर्व इव, उपहास्यताम् = उपहासविषयताम्।

४) अथवा = पक्षान्तरे, पूर्वसूरिभिः = पूर्वकविभिः वाल्मीक्यादिभिः, कृतवाग्द्वारे = वाग्रूपद्वारनिर्मिते, अस्मिन्वंशे = सूर्यप्रभवे कूले, वज्रसमुत्कीर्णे = मणिवेधकसूचीविशेषेण विद्धे, मणौ = रत्ने, सूत्रस्य इव = तन्तोः यथा, मे = मम, गतिः = सञ्चारः, अस्ति = वर्तते।

५-९) सः अहम् = कालिदासः, तनुवाग्विभवः अपि सन् = स्वल्पवाणीप्रसरोऽपि सन्, तद्गुणैः = तेषाम् आजन्मशुद्धादिभिः गुणैः, कर्णम् आगत्य = श्रोत्रमागत्य, चापलाय = चञ्चलभावाय, प्रचोदितः = प्रेरितः, आजन्मशुद्धानाम् = जन्मत आरम्भ्य शुद्धानाम्, आफलोदयकर्मणाम् = फलप्राप्तिपर्यन्तं कर्मरतानाम्, आसमुद्रक्षितीशानाम् = समुद्रपर्यन्तं पृथिवीं शासनकर्तानाम्, आनाकरथवर्त्मनाम् = स्वर्गपर्यन्तं रथमार्गम्, यथाविधिहुताग्नीनाम् = यथाविधि अग्नौ आहुतिप्रदानकारिणाम् , यथाकामार्चितार्थिनाम् = यथाभिलाषमत्कृतयाचकानाम्, यथापराध दण्डानाम् =

अपराधानुकुलदण्डानाम्, यथाकाल प्रबोधिनाम् = यथासमयजागरूकानाम्, त्यागाय = दानाय, सम्भ्रतार्थानाम् = सञ्चितार्थानाम्, सत्याय मितभाषिणाम् = सत्याय मितभाषण-शीलानाम्, यशसे विजिगीषूणाम् = कीर्तये विजेतुमिच्छुनाम्, प्रजायै गृहमेधिनाम् = सन्तानाय दारपरिग्रहानाम्, शैशवे अभ्यस्त विद्यानाम् = बाल्ये विद्याभ्यासकृतानाम्, यौवने विषयौषिणाम् = तारुण्ये भोगाभिलाषिणाम्, वार्द्धके मुनिवृत्तिनाम् = वृद्धत्वे मुनिजनानामाचारम्, अन्ते योगेन तनुत्यजाम् = अन्तिमे काले योगाभ्यासेन शरीरत्याजाम्, रघूणाम् = रघुवंशीयानाम्, अन्वयम् = वंशम्, वक्ष्ये = कथयिष्ये।

१०) सद् असद् व्यक्तिहेतवः = गुणदोषविचारनिपुणाः, सन्तः = सज्जनाः, तम् = रघुवंशम् महाकाव्यम्, श्रोतुम् = आकर्णयितुम्, अर्हन्ति = योग्या भवन्ति, हेम्नः = सुवर्णस्य, विशुद्धिः = निर्दोषस्वरूपम्, अपि वा = अथवा, श्यामिका = सदोषता, अग्नौ = वह्नौ, संलक्ष्यते = ज्ञायते।



ज्ञातव्यम्

पञ्चमश्लोकतः नवमश्लोकः – एते पञ्चश्लोकाः 'वक्ष्ये' इति एकया समापिकाक्रियया समाप्यते। तस्मात् एतान् पञ्चश्लोकान् आलङ्कारिकपरिभाषायाम् 'कुलकम्' इत्यनेन अभिधीयते। एवं यदि श्लोकद्वयं सम्मिलितं भवति, तर्हि 'यूग्मकम्', 'यदि श्लोकत्रयं मिलितं भवति, तर्हि 'सन्दानितकम्', यदि चतुःश्लोकानां मिलितं भवति तर्हि 'कलापकम्' इति कथ्यते। विश्वनाथकविराजस्य 'साहित्यदर्पणम्' इति ग्रन्थे प्राप्यते-

''द्वाभ्यान्तु यूग्मकं सन्दानितकं त्रिभिरिष्यते।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।।'' (साहित्यदर्पणम् ६/२८८)

२.५.३ श्लोकानाम् असमीयानुवादः

এতিয়া আপুনি 'ৰঘুবংশম্' মহাকাব্যৰ প্রথম সর্গৰ শ্লোক ☯🗁🗁🗁❁ সমূহৰ অসমীয়া অনুবাদ পঢ়িবলৈ পাব।

❁ শব্দ আৰু অর্থৰ সম্যক জ্ঞানৰ বাবে, শব্দ আৰু অর্থৰ দৰেই নিত্যসংযুক্ত জগতৰ মাতাপিতাস্বৰূপ পার্বতী আৰু পৰমেশ্বৰক মই বন্দনা কৰোঁ।


❁ ক'ত সেই সূর্য্য সম্ভূত বংশ আৰু ক'ত মোৰ অল্পবোধযুক্ত বুদ্ধি। মোহবশতঃ মই যেন ভূৰেৰে সাগৰ পাৰ হ'বলৈ ইচ্ছা কৰিছোঁ।

❁ ওখ মানুহে ঢুকি পোৱা ফল লাভৰ বাবে বাওনাই লোভত হাত মেলিলে যিদৰে উপহাসৰ পাত্র হয়, সেইদৰে কবিসকলৰ যশস্যা পাবলৈ ইচ্ছা কৰা মূর্খ ময়ো হাঁহিয়াতৰ পাত্র হ'ম।

অথবা বজ্রসূচীৰ দ্বাৰা ছিদ্ৰ কৰা মনিত যিদৰে সুতাডালৰ প্ৰৱেশ সহজ হয়, সেইদৰে পূৰ্বসূৰীসকলে ৰচনা কৰা কাব্যৰূপ দ্বাৰৰে মোৰ এই বংশত প্ৰৱেশ সহজ হ'ব।

ৰঘুবংশৰ যিসকল আজন্ম শুদ্ধ আছিল, ফলপ্ৰাপ্তি পৰ্যন্ত যিসকলে কৰ্ম কৰিছিল, যিসকল সসাগৰা পৃথিৱীৰ অধীশ্বৰ আছিল, যিসকলৰ ৰথৰ পথ স্বৰ্গপৰ্যন্ত বিস্তৃত আছিল, যিসকলে যথাবিধি যজ্ঞত আহুতি প্ৰদান কৰিছিল। ইচ্ছানুযায়ী যাচকসকলক সৎকাৰ কৰিছিল। অপৰাধ অনুসৰি দণ্ড প্ৰদান কৰিছিল। সময়ানুযায়ী সজাগ হৈছিল। যিসকলে দানৰ বাবেই অৰ্থসংগ্ৰহ কৰিছিল। সত্যৰ বাবেই মিতভাষী হৈছিল। যশস্যাৰ বাবে বিজয় কামনা কৰিছিল। সন্তানৰ বাবেই পাণিগ্ৰহণ কৰিছিল, যিসকলে শৈশৱত বিদ্যাভ্যাস, যৌৱনত বিষয়ভোগ আৰু বাৰ্দ্ধক্যত মুনিবৃত্তি গ্ৰহণ কৰি শেষত যোগবলেৰে দেহত্যাগ কৰিছিল। সেই পুৰুষসকলৰ গুণৰাশিৰ কথা শুনি শুনি মোৰ ক্ষুদ্ৰ বাক্ সম্পত্তি স্বত্বেও চাপল্যবশতঃ তেওঁলোকৰ কথা ক'বলৈ ওলাইছোঁ।

দোষ গুণ বিবেচক জ্ঞানীসকলহে সেই কথা শুনাৰ যোগ্য। কিয়নো সোণৰ শুদ্ধতা আৰু অশুদ্ধতা অগ্নিয়েহে পৰীক্ষা কৰিব পাৰে।



अग्रगत्या: निरीक्षणम्

प्रश्न: ६ - जगत: पितरौ कौ ?

.....

प्रश्न: ७ - रघुवंशीयराज्ञाम् एको गुणो लिखन्तु ?

.....

प्रश्न: ८ - स्वर्णस्य विशुद्धत्वं केन परीक्ष्यते ?

.....

२.५.४ व्याकरणटिप्पणी

१) पार्वती = पर्वतस्य अपत्यं स्त्री पार्वती।

सम्पृक्तौ = सम् + पृच् + क्त।

प्रतिपत्तये = प्रति + पद् + क्तिन् = चतुर्थीविभक्ति एकवचनम्।

पितरौ = माता च पिता च = द्वन्द्वसमास:।

वागर्थौ = वाक् च अर्थ:च = द्वन्द्वसमास:।

पार्वतीपरमेश्वरौ = पार्वती च परमेश्वरश्च = द्वन्द्वसमास:।

२) प्रभव: = प्र + भू + अप्।

दुस्तरम् = दुस् + तृ + खल्।

तितीर्षुः = तॄ + सन् + उ।

अस्मि = अस् + लट् + मि।

मोहात् = हेतौ पञ्चमी।

उडुपेन = करणे तृतीया।

सूर्यप्रभवः = सूर्यः प्रभवः यस्य सः = बहुव्रीहिसमासः।

अल्पविषया = अल्पः विषया यस्याः सा = बहुव्रीहिसमासः।

३) लभ्यम् = लभ् + यत्।

गमिष्यामि = गम् + लृट् + उत्तमपुरुष एकवचनम्।

फले = अधिकरणे सप्तमी।

कवियशः प्रार्थी = कवीनां यशः कवियशः तत् प्रार्थयतीति = षष्ठीतत्पुरुषः।

प्रांशुलभ्ये = प्रांशुना लभ्यं प्रांशुलभ्यम् = तृतीयातत्पुरुषः।

उद्बाहुः = उद्गतौ बाहू यस्य सः = बहुव्रीहिसमासः।

४) सूत्रस्य = सूत्र + ङस् = षष्ठी एकवचनम्।

अस्ति = भू + लट् प्रथमपुरुषः एकवचनम्।

वंशे = अधिकरणे सप्तमी।

पूर्वसूरिभिः = पूर्वाश्च ते सूरयः तैः = कर्मधारयसमासः।

कृतवाग्द्वारे = वाक् एव द्वारम् इति = कर्मधारयसमासः। कृतं वाग्द्वारं यस्य सः = बहुव्रीहिसमासः।

५) शुद्धानाम् = षष्ठी बहुवचनम्।

कर्मणाम् = षष्ठी बहुवचनम्।

क्षितीशानाम् = षष्ठी बहुवचनम्।

आफलोदय = फलस्य उदयः = षष्ठी तत्पुरुषसमासः।

आजन्मशुद्धानाम् = आजन्मः शुद्धाः तेषाम् = बहुव्रीहिसमासः।

६) अग्निनाम् = षष्ठी बहुवचनम्।

प्रबोधिनाम् = षष्ठी बहुवचनम्।

यथाविधिहुताग्नीनाम् = विधिम् अनतिक्रम्य हुतां अग्नयोः यैः तैषाम् = अव्ययीभावसमासः।

यथापराधदण्डानाम् = अपराधम् अनतिक्रम्य दण्डः येषां तेषाम् = बहुव्रीहिसमासः।

७) त्यागाय = चतुर्थी एकवचनम्।

मितभाषिणाम् = षष्ठी बहुवचनम्।

सम्भृतार्थानाम् = सम्भृतः संचितः अर्थः धनं यैः तेषाम् = बहुव्रीहिसमासः।

८) यौवने = सप्तमी एकवचनम्।

मुनिवृत्तीनाम् = मुनीनां वृत्तिरिव वृत्तिः येषां ते मुनिवृत्तयः तेषाम् =

बहुव्रीहिसमासः।

तनुत्यजाम् = तनुं देहं त्यजन्ति इति तनुत्यजः तेषाम् = बहुव्रीहिसमासः।

९) आगत्य = आ + गम् + ल्यप्।

तनुवाग्विभवः = वाचां विभवः = षष्ठी तत्पुरुषसमासः। तनुः वाग्विभवो यस्य सः = बहुव्रीहिसमासः।

१०) श्रोतुम् = श्रु + तुमुन्।

अर्हन्ति = अर्ह + लट् + अन्ति।

हेम्नः = शेषे षष्ठी।

विशुद्धिः = उक्ते कर्मणि प्रथमा।

श्यामिका = उक्ते कर्मणि प्रथमा।

हेतवः = प्रथमा बहुवचनम्।

अग्नौ = सप्तमी एकवचनम्।



ज्ञातव्यम्

अलङ्कारशास्त्रे निर्दिष्टस्य महाकाव्यस्य लक्षणानुसारं काव्यं मङ्गलाचरणमाध्यमेन प्रारम्भं कुर्यात्। तत्र मङ्गलाचरणस्य विभागत्रयं वर्तते- आशीर्वादात्मकम्, नमस्कारात्मकम्, वस्तुनिर्देशात्मकञ्च। 'रघुवंशम्' इति महाकाव्यं महाकविना नमस्कारात्मकमङ्गलाचरणेन प्रारभ्यते। महाकविना महाकाव्यमिदं शिव-पार्वत्योः वन्दनया प्रारभ्यते।

२.६ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

ৰঘুবংশম্ মহাকাব্যৰ প্ৰথমসৰ্গৰ প্ৰথমশ্লোকৰ পৰা দশমশ্লোকলৈ ☯🗁🗁🗁🗁❁ কবিয়ে বিষয়বস্তুৰ বৰ্ণনা কিদৰে কৰিছে তাকেই সংক্ষিপ্তভাবে এতিয়া আপোনাক জনোৱা হ'ব। কবি কালদাসে হৰগৌৰীৰ বন্দনাৰে মঙ্গলাচৰণ কৰিছে ☯🗁নং শ্লোক)। সূৰ্যসম্ভূত মহান বংশটিৰ বৰ্ণনা কৰাটো তেওঁৰ নিচিনা অল্পবুদ্ধিৰ কবিৰ পক্ষে ভূৰেৰে সাগৰ পাৰ হোৱাৰ নিচিনা কাম হ'ব বুলি নিজৰ বিনম্ৰতা প্ৰকাশ কৰিছে ☯🗎নং শ্লোক)। মহান কবিসকলে লাভ কৰা যশ কামনা কৰাটো হাস্যাস্পদ হ'ব বুলি কবিয়ে প্ৰকাশ কৰিছে ☯🗎নং শ্লোক)। তথাপিও পূৰ্বসূৰীসকলৰ পথ অনুকৰণ কৰি কবিয়ে উদ্দেশ্যত সফল হ'ব বুলি এই কৰ্মত প্ৰবৃত্ত হৈছে (🗐নং শ্লোক)। ৰঘুবংশীয় ৰজাসকল আজন্ম শুদ্ধ, ফলপ্ৰাপ্তিপৰ্যন্ত কাৰ্যৰত। সমুদ্ৰপৰ্যন্ত পৃথিৰীৰ অধীশ্বৰ আছিল আৰু স্বৰ্গপৰ্যন্ত মুক্তভাৱে গমন কৰিছিল (🗏নং শ্লোক)। তেওঁলোকে যথাবিধি যাগযজ্ঞ কৰিছিল। যাচকসকলক সৎকাৰ, অপৰাধীক যথাযোগ্য দণ্ড প্ৰদান কৰিছিল আৰু উপযুক্ত সময়ত জাগ্ৰত আছিল (🗏নং শ্লোক)। সেই ৰজাসকলে ত্যাগৰ বাবে অৰ্থসংগ্ৰহ কৰিছিল। সত্যৰ বাবেই মিতভাষী, যশৰ বাবে বিজয় ইচ্ছুক আৰু সন্তানৰ বাবেই পত্নী গ্ৰহণ কৰিছিল (⌨নং শ্লোক) ৰঘুবংশীয় ৰজাসকলে

শৈশৱত বিদ্যাভ্যাস, যৌৱনত বিষয় অভিলাষ আৰু বার্দ্ধক্যত মুনিৰ নিচিনা জীৱন-যাপন কৰি শেষত যোগেৰে দেহত্যাগ কৰিছিল (৺নং শ্লোক)। ভাষা বৈদগ্ধ্য নথকা সত্বেও তেওঁলোকৰ গুণগৰিমাৰে প্রভাৱান্বিত হৈ এই লোকবন্দিত ৰঘুবংশৰ গুণকীর্ত্তন কৰিবলৈ ওলাইছোঁ (৭৯নং শ্লোক) দোষ গুণ বিচাৰ কৰিব পৰা জ্ঞানীজনেহে এই কাব্যপাঠৰ অধিকাৰী (🗁🗀নং শ্লোক)।

२.७ प्रथमसर्गस्य प्रथमतः दशमश्लोकं यावत् (१-१०) कतिपयाणां श्लोकानां व्याख्या भावार्थश्च

अधुना भवन्तः अध्यायेऽस्मिन् केषाञ्चन् महत्वपूर्णानां श्लोकानां व्याख्या भावार्थश्च ज्ञातुमर्हन्ति।

१) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

श्लोकोऽयं महाकविकालिदासस्य 'रघुवंशम्' इति महाकाव्यस्य प्रथमे सर्गे प्राप्यते।

श्लोकोऽयं 'रघुवंशम्' महाकाव्यस्य मङ्गलाचरणं वर्तते।

काव्यस्य प्रारम्भे निर्विघ्नसमाप्तये कविः सर्वदा मङ्गलाचरणं करोति। एवं 'रघुवंशम्' महाकाव्यस्य प्रारम्भे कविः मङ्गलाचरणरूपेण नमस्कारात्मकं मङ्गलाचरणं करोति। अत्र कविना जगतः पितरौ स्वरूपौ शिव-पार्वत्यौ स्तुयेते। कविः शिव-पार्वत्यौ शब्द-अर्थाभ्यां सह उपमीयते। शब्दार्थयोः वास्तविकज्ञानलाभाय यथा शब्दार्थयोः समानता आवश्यकता भवति, तथैव संसारस्यास्य नित्यसम्बद्धौ मातृपितृरूपौ गौरी-शंकरयोः वन्दनां करोति कविः।

श्लोकेऽस्मिन् उपमालङ्कारो वर्तते, छन्दस्तु अनुष्टुप्।

२) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

श्लोकोऽयं महाकविकालिदासस्य 'रघुवंशम्' इति महाकाव्यस्य प्रथमे सर्गे प्राप्यते।

सूर्यवंशोद्भवस्य रघुवंशस्य माहात्म्यं सर्वत्र प्रसिद्धं वर्तते। प्रख्याताः राजानो दिलीप-रघु-दशरथ-रामादयो वंशेऽस्मिन् जन्मो लभ्यन्ते। तेषां गुणानुकीर्तनं तु साधारणजनैः वर्णितुं न शक्यन्ते। 'रघुवंशम्' इति महाकाव्यस्य रचनप्रसङ्गे महाकविना अस्य वंशस्य महिमावर्णने प्रवृत्तो जातः। अतः संस्कृतसाहित्यस्य मूर्द्धन्यविद्वान् कालिदासः सूर्यवंशीयरघुकुलं प्रशंसयन् कथयति यत् यथा उडुपेन दुस्तरं सागरं तरितुं न शक्यते तथैव सूर्यप्रभववंश अल्पविषयबुद्धिना कथं वर्णितुं शक्यते। तथापि स्वयमेव मूढो इति मत्वा कालिदासः तस्मिन् वंशे जायमानानां राज्ञां गुणान् वर्णितुम् इच्छति।

प्रस्तुतेऽस्मिन् पद्ये निदर्शना अलङ्कारोऽस्ति, छन्दस्तु अनुष्टुप्।

३) हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा॥

स्वर्णस्य विशुद्धत्वम् अग्नौ एव परीक्ष्यते। यदा स्वर्णस्य अग्नौ दहनं क्रियते तदा तत्र अविशुद्धानां पदार्थानां प्रमाणं जायते। एवं कविप्रणीतकाव्यस्य गुण-दोषान् पाठका एव निरीक्षणं

कर्तुं शक्नुवन्ति। वाल्मीकिप्रणीतं 'रामायणम्' आधारीकृत्य महाकविना कालिदासेन 'रघुवंशम्' इति महाकाव्यं रचनं कृतम्। 'रामायणम्' तु आदिकाव्यरूपेण जनेषु सर्वदा प्रचलितमस्ति। अतो 'रघुवंशम्' इति महाकाव्यमपि पाठकाः सर्वदा स्वीकुर्युः। स्वर्णस्य अग्नौ परीक्षणं कृत्वा यथा अशुद्धं पदार्थं वर्जयित्वा शुद्धं पदार्थं संरक्षति, तथैव कालिदासकृतस्य रघुवंशस्य गुण-दोषान् विचार्य पाठकाः दोषान् परिहारयेयुः। अस्मिन्नेव प्रसङ्गे महाकविना 'मालविकाग्निमित्रम्' इति नाटकस्य द्वितीयेऽङ्के उल्लिख्यते -

'उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः।
श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु॥

श्लोके अस्मिन् अर्थान्तरन्यासालङ्कारः तथा अनुष्टुप्छन्दो वर्तते।



अग्रगत्याः निरीक्षणम्

प्रश्नः ९ - 'पितरौ' इत्यस्मिन् पदे कः समासः ?

.....

प्रश्नः १० - 'वागर्थौ' इत्यस्मिन् पदे कः समासः ?

.....

प्रश्नः ११ - 'वन्दे' इति पदस्य का व्युत्पत्तिः ?

.....



२.८ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- रघुवंशम्' इति महाकाव्यस्य 'वशिष्ठाश्रमाभिगमनः' शीर्षकस्य प्रथमसर्गस्य सारांशं ज्ञातवन्तः।
- रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य 'वशिष्ठाश्रमाभिगमनः' इति शीर्षकस्य तात्पर्यं ज्ञातवन्तः।
- रघुवंशीयराज्ञां गुणानां विषये परिचयं प्राप्तवन्तः।
- प्रथमश्लोकतो दशमश्लोकं यावत् श्लोकानां संस्कृतपाठ-अन्वय-शब्दार्थ-व्याकरणगतटिप्पणी-असमीयानुवादादीन् ज्ञातवन्तः।
- महत्वपूर्णानां श्लोकानां व्याख्यां भावार्थञ्च ज्ञातवन्तः।



२.९ ज्ञानाधिक्यम्

१) काले, एम. आर. (सम्पा.) : रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास पाब्लिछार्च प्राइभेट लिमिटेड।

२) नन्दर्गिकार, गोपाल रघुनाथ (१९८२) (सम्पा.) : रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास।

३) शास्त्री, अशोकनाथ & भाञ्जा सरोजनाथ (१९५१) (सम्पा.) कालिदासस्य रघुवंशम्; मडार्ण वुक एजेन्सि।



२.१० अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : 'रघुवंशम्' महाकाव्यस्य मङ्गलाचरणे शिव-पार्वत्योः वन्दना क्रियते।

प्रश्नः २ : उत्तरम् : रघुवंशस्य उत्पत्तिः सूर्यात् जायते।

प्रश्नः ३ : उत्तरम् : 'रघुवंशम्' महाकाव्ये वर्णितः प्रथमो राजा अस्ति दिलीपः।

प्रश्नः ४ : उत्तरम् : राज्ञो दिलीपस्य पत्नी अस्ति सुदक्षिणा।

प्रश्नः ५ : उत्तरम् : रघुवंशस्य कुलगुरुः वशिष्ठः अस्ति।

प्रश्नः ६ : उत्तरम् : जगतः पितरौ शिवः, पार्वती च।

प्रश्नः ७ : उत्तरम् : रघुवंशीयराज्ञाम् एको गुणो भवति आजन्मशुद्धः।

प्रश्नः ८ : उत्तरम् : स्वर्णस्य विशुद्धत्वं अग्निना परीक्ष्यते।

प्रश्नः ९ : उत्तरम् : 'पितरौ' इत्यस्मिन् पदे द्वन्द्वसमासः।

प्रश्नः १० : उत्तरम् : 'वागर्थौ' इत्यस्मिन् पदे द्वन्द्वसमासः।

प्रश्नः ११ : उत्तरम् : 'वन्दे' इति पदस्य व्युत्पत्तिः यथा- वन्द् + लिट् ए।



२.११ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः - १ : 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य नामकरणस्य तात्पर्यं लिखन्तु।

प्रश्नः - २ : 'रघुवंराम्' इति महाकाव्यस्य मङ्गलाचरणस्य तात्पर्यं लिखन्तु।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

व्याख्या भावार्थः च लेखनीयः

१) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

२) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

३) हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा॥

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः १ : 'रघुवंशम्' महाकाव्यस्य प्रथमसर्गस्य सारांशं लिखन्तु।

प्रश्नः २ : महाकविकालिदासेन 'रघुवंशम्' महाकाव्यस्य प्रारम्भे स्वकीयं विनम्रस्वभावं केन प्रकारेण प्रकाश्यते लिखन्तु।

*** ***** ***

अध्यायः ३ : रघुवंशम् - प्रथमसर्गः, (श्लोकाः ११-३०)

अध्यायस्य संरचना

३.१ उद्देश्यम्

३.२ परिचयः

३.३ प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत् (११-३०) श्लोकानां संस्कृतपाठः

- ३.३.१ श्लोकानाम् अन्वयः
- ३.३.२ श्लोकानां शब्दार्थः
- ३.३.३ श्लोकानाम् असमीयानुवादः
- ३.३.४ व्याकरणटिप्पणी

३.४ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

३.५ प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत् (११ - ३०) कतिपयाणां श्लोकानां व्याख्या

३.६ अध्यायात् किमवगतम्

३.७ ज्ञानाधिक्यम्

३.८ अग्रगत्याः निरूपणम्

३.९ अभ्यासप्रश्नाः

३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत् विषयम् अवगन्तुं शक्नुवन्ति।
- प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत्श्लोकानां संस्कृतपाठ-शब्दार्थ-अनुवादाः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत्श्लोकानां व्याकरणटिप्पण्यः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च ज्ञातुं शक्नुवन्ति।

३.२ परिचयः

द्वितीयेऽध्याये भवन्तः 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य प्रथमतः दशमश्लोकपर्यन्तम् (१-१०) अध्ययनं कृतवन्तः। तत्र 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य प्रथमतः दशमश्लोकपर्यन्तम् (१-१०) अध्यनेन महाकविकालिदासस्य विनयस्वभावस्तथा रघुवंशीयराज्ञां गुणानां विषये ज्ञातवन्तः। अध्यायेऽस्मिन् भवन्तः एकादशतः त्रिंशत्तमं श्लोकं

यावत् (११-३०) श्लोकानां संस्कृतपाठ-शब्दार्थ-व्याकरणगतटिप्पणी-व्याख्या - भावार्थादीन् पठितुं शक्नुवन्ति। एतेषां श्लोकानाम् अध्ययनात्परं भवन्तो राज्ञो दिलीपस्य विषयं ज्ञातुमर्हन्ति।

३.३ प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत् (११-३०) श्लोकानां संस्कृतपाठः

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ ११ ॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीर निधाविव ॥ १२ ॥
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३।।
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना।। १४।।
आकार सदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भः आरम्भसदृशोदयः।। १५ ॥
भीमकान्तैर्नृपगुणैः स वभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १६ ॥
रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः।। १७।।
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणामुत्स्रष्टुमादत्ते हि रसं रविः ॥ १८ ॥
सेना परिच्छदस्तस्यद्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिमौर्वी धनुषि चातता।। १९।।
तस्य संवृतमन्त्रस्य गूढ़ाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।। २०।।
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्।। २१।।
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।। २२।।
अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना।। २३।।
प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्म हेतवः।। २४॥

स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।। २५।।
दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।। २६।।
न किलानुययुस्तस्य राजानो रक्षितुर्यशः।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता।। २७॥
द्वेष्योऽपि संमतः शिष्टतस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता।। २८।।
तं वेधा विदये नूनं महाभूतसमाधिना।
तथाहि सर्वे तस्यासन्परार्थैकफलागुणाः।। २९।।
स वेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्वी शशासैकपुरीमिव ॥ ३०॥

३.३.१ श्लोकानाम् अन्वयः

११) छन्दसां प्रणव इव मनीषिणां माननीयः महीक्षिताम् आद्यः वैवस्वतः नाम मनुः आसीत्।

१२) शुद्धमति तदन्वये शुद्धिमत्तरः राजेन्दु दिलीपः इति क्षीरनिधौ इन्दुः इव प्रसूतः।

१३) व्यूढोरस्कः वृषस्कन्धः शालप्रांशुः महाभुजः आत्मकर्मक्षमम् देहम् आश्रित क्षात्रः धर्म इव।

१४) सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविता। सर्वोन्नतेन आत्मना मेरुः इव उर्वीम् क्रान्त्वा स्थितः।

१५) आकार सदृश प्रज्ञः प्रज्ञया सदृशागमः आगमैः सादृशारम्भः आरम्भ सदृशोदयः।

१६) भीमकान्तैः नृपगुणैः उपजीविनाम् स यादोरत्नैः अर्णव इव अधृष्यः च अभिगम्यः च बभूव।

१७) नियन्तुः तस्य नेमिवृत्तयः प्रजाः आमनोः क्षुण्णात् वर्त्मनः परम् रेखामात्रम् अपि न व्यतीयुः।

१८) सः प्रजानाम् भूत्यर्थम् एव ताभ्यः बलिम् अग्रहीत् हिं रविः सहस्रगुणम् उत्स्रष्टुम् रसम् आदत्ते।

१९) तस्य सेना परिच्छदः अर्थसाधनम् द्वयम् एव शास्त्रेषु अकुण्ठिता बुद्धिः च धनुषि आतता मौर्वी।

२०) संवृत्त मंत्रस्य च गूढाकारेङ्गितस्य तस्य प्रारम्भाः प्राक्तनाः संस्कारा इव फलानुमेयाः।

२१) सः अत्रस्तः आत्मानम् जुगोप अनातुरः धर्मम् भेजे अगृध्नुः अर्थम् आददे असक्तः सुखम् अन्बभूत।



तदन्वये= तद् + अन्वये।

सर्वतेजोऽभिभावित = सर्वतेजः+अभिभाविता।।

२२) ज्ञाने मौनं शक्तौ क्षमा त्यागे श्लाघा विपर्ययः तस्य गुणा गुणानुबन्धित्वात् सप्रसवाः इव।

२३) विषयैः अनाकृष्टस्य विद्यानाम् पारदृश्वनः धर्मरतेः तस्य जरसा विना वृद्धत्वम् आसीत्।

२४) प्रजानां विनयाधानाद् रक्षणात् भरणात् अपि सः पिता तासां पितरः जन्महेतवः केवलम्।

२५) स्थित्यै दण्ड्यान् दण्डयतः प्रसूतये परिणेतुः मनीषिणः तस्य अर्थकामौ अपि धर्म एव आस्ताम्।

२६) सः यज्ञाय गाम् दुदोह मघवा सस्याय दिवम् उभौ संपद् विनिमयेन भुवनद्वयम् दधतुः।

२७) राजानः रक्षितः तस्य यशः न अनुययुः किल यत् तस्करता परस्वेभ्यः व्यावृत्ता श्रुतौ स्थिता।

२८) शिष्टः द्वेष्यः अपि आर्तस्य औषधं यथा तस्य सम्मतः आसीत् दुष्टः प्रियः अपि उरगक्षता अङ्गुली इव त्याज्यः।

२९) वेधाः तममहाभूतसमाधिना तम् विदधे नूनम् तथाहि तस्य सर्वे गुणाः परार्धैकफला आसन्।

३०) सः वेलावप्रबलयाम् परिखीकृतसागराम् अन्यशासनाम् उर्वीम् एकपुरीम् इव शशास।

३.३.२ श्लोकानां शब्दार्थः

११) छन्दसाम् = वेदानाम्, प्रणवमिव = औङ्कारमिव, मनीषिणाम् = पण्डितानाम्, माननीयः = पूज्यः, महीक्षिताम् = राज्ञाम्, आद्यः = प्रथमः, वैवस्वतः = सूर्यस्य पुत्रः, नाम = नामकः, मनुः = मनुः, आसीत् = बभूव।

१२) शुद्धमति = दोषरहिते, तदन्वये = तस्य मनोरन्वये वंशे वा, शुद्धिमत्तरः = अतिशयेन शुद्धिमान्, राजेन्दु = राजश्रेष्ठः, दिलीपः इति = दिलीपः नाम्ना प्रसिद्धः, क्षीरनिधौ = क्षीरसमुद्रे, इन्दुः इव = चन्द्रः यथा, प्रसूतः = जातः।

१३) व्यूढोरस्कः = विशालवक्षस्थलसम्पन्नः, वृषस्कन्धः = वृषस्य समानं स्कन्धः, शालप्रांशुः = शालवृक्षः समानः उन्नतः, महाभुजः = आजानुलम्बितः बाहुयुक्तः, आत्मकर्मक्षमम् = स्वव्यापारानुरूपम्, देहम् = शरीरम्, आश्रित = प्राप्तम्, क्षात्रः = क्षत्रियसम्बन्धितः, धर्म इव = स्वभावः यथा।

१४) सर्वातिरिक्तसारेण = समस्तेभ्यः अधिकवलयुक्तेन, सर्वतेजोऽभिभाविता = सर्वान् जनान् स्वप्रतापेन तिरस्करोति, सर्वोन्नतेन = सर्वेभ्यः उन्नतेन, आत्मना = शरीरेण, मेरुः इव = सुमेरुपर्वतः यथा, उर्वीम् = पृथिवीम्, क्रान्त्वा = व्याप्य, स्थितः = विराजितः।

१५) आकारसदृशप्रज्ञः = आकृतिः अनुरूपा बुद्धिः, प्रज्ञया = बुद्ध्या, सदृशागमः = अनुरूपं शास्त्रज्ञानम्, आगमैः = शास्त्रज्ञानैः, सादृशारम्भः = अनुरूपकर्मानुष्ठानः, आरम्भसदृशोदयः = कर्मानुष्ठानसदृशः फलप्राप्तिः।

१६) भीमकान्तैः = भयङ्करैः मनोहरैः च , नृपगुणैः = तेजप्रतापदयादाक्षिण्यादिराजगुणैः, उपजीविनाम् = आश्रितजनानाम्, स = दिलीपः, यादोरत्नैः = यादोभिर्जलजीवैः रत्नैः च, अर्णवः = समुद्रः, इव = यथा,अधृष्यः = अनभिभवनीयः, अभिगम्यः च = आश्रयणीयः च, बभूव = जातः।

१७) नियन्तुः = नियामकस्य शिक्षकस्य, तस्य = दिलीपस्य, नेमिवृत्तयः = चक्रधाराणां वृत्तयः वर्तनं व्यापारो वा, प्रजाः = लोकाः, आमनोः = मनुमारभ्य, क्षुण्णात् = अभ्यस्तात्, वर्त्मनः = आचारपद्धतेः, मार्गाच्च, परम् = अधिकम्, रेखामात्रम् अपि = रेखाप्रमाणम् ईषदपि, न व्यतीयुः = न अतिक्रान्तवत्यः।

१८) सः = राजा दिलीपः, प्रजानाम् = लोकानाम्, भूत्यर्थम् एव = कल्याणार्थम् एव, ताभ्यः = प्रजाभ्यः, बलिम् = षष्ठांशरूपं करम्, अग्रहीत् = जग्राह, हिं = यतः, रविः = सूर्यः, सहस्रगुणम् = सहस्रधा, उत्स्रष्टुम् = दातुम्, रसम् = जलम्, आदत्ते = गृह्णाति।

१९) तस्य = राज्ञो दिलीपस्य, सेना = वलम्, परिच्छदः = अलङ्कारमात्रम्, अर्थसाधनम् = प्रयोजनस्य निवर्तकम्, द्वयम् एव = उभयमेव, शास्त्रेषु = आगमेषु, अकुण्ठिता = अव्याहता, बुद्धिः = मतिः, धनुषि च = चापे च, आतता = आरोपिता, मौर्वी = ज्या (बभूव)।

२०) संवृत्त मंत्रस्य = गुप्तविचारस्य, च गूढाकारेङ्गितस्य = अप्रकाशितस्य इङ्गितस्य, तस्य = दिलीपस्य, प्रारम्भाः = सामाद्युपायप्रयोगाः, प्राक्तनाः = पूर्वजन्मभवाः, संस्कारा = पूर्वकर्मवासनाः, इव = यथा, फलानुमेयाः = कार्येण अनुमेयाः।

२१) सः = दिलीपः, अत्रस्तः = अभीतः, आत्मानम् = स्वयम्, जुगोप = ररक्ष, अनातुरः = अरुग्नः, धर्मम् = सुकृतम्, भेजे = अर्जितवान्, अगृध्नुः = अलुब्धः, अर्थम् = धनम्, आददे = स्वीकृतवान्, असक्तः = आसक्तिरहितः, सुखम् = आनन्दम्, अन्बभूत = अनुभूतवान्।

२२) ज्ञाने = परवृत्तान्तज्ञानेऽपि, मौनं = वाङ्नियमनम्, शक्तौ = प्रतिकारसामर्थेऽपि, क्षमा = शान्तिः, दाने = त्यागे, श्लाघाविपर्ययः = विकत्थनस्य विपर्ययः, तस्य = राज्ञः, गुणा = ज्ञानादयाः, गुणानुबन्धित्वात् = विरुद्धैः गुणैः सहचारित्वात्, सप्रसवाः = सहोदराः, इव = यथा।

२३) विषयैः = शब्दादिभिः, अनाकृष्टस्य = अवशीकृतस्य, विद्यानाम् = वेद-वेदाङ्गादीनाम्, पारदृश्वनः = पारदर्शिनः, धर्मरतेः = धर्मानुरक्तः, तस्य = राज्ञः, जरसा = जरया वृद्धावस्थया वा, विना = अन्तरेण, वृद्धत्वम् = वार्द्धक्यम्,

आसीत् = बभूव।

२४) प्रजानां = जनानाम्, विनयाधानाद् = सन्मार्गे प्रवर्तनात्, रक्षणात् = चौरादिभरहेतुभ्यस्त्रानात्, भरणात् अपि = अन्नपानादिदानेन पोषणादपि, सः = दिलीपः, पिता = पालकः, तासां = प्रजानाम्, पितरः = जनकाः, जन्महेतवः = जन्ममात्रकर्तारः, केवलम् = मात्रम्।

२५) स्थित्यै = लोकप्रतिष्ठायै, दण्ड्यान् = दण्डयोग्यान् अपराधिन्, दण्डयतः = शिक्षयतः, प्रसूतये = सन्तानाय, परिणेतुः = दारान् प्रतिगृह्णतः, मनीषिणः = विदुषः, तस्य = दिलीपस्य, अर्थकामौ = धनं विषयेच्छा चेति, अपि धर्म = सुकृतमेव, एव आस्ताम् = जातौ।

२६) सः = राजा दिलीपः, यज्ञाय = यज्ञं कर्तुम्, गाम् = पृथिवीम्, दुदोह = अदुहत्, मघवा = इन्द्रः, सस्याय = धान्याय, दिवम् = स्वर्गम्, उभौ = इन्द्र-दिलीपौ, संपद् = सस्यवृष्टिरूपस्य सम्पदः, विनिमयेन = परस्परादानप्रदानेन, भुवनद्वयम् = स्वर्ग-भूलोकयोः, दधतुः = पुपुषतुः।

२७) राजानः = अन्ये भूपालाः, रक्षितः = पालयितः, तस्य = राज्ञो दिलीपस्य, यशः = कीर्तिम्, न अनुययुः = न अनुचक्रुः, किल = खलु, यत् = यस्मात् कारणात्, तस्करता = चौर्यम्, परस्वेभ्यः = परधनेभ्यः, व्यावृत्ता = निवृत्ता, श्रुतौ = कर्णे, स्थिता = अस्थात्।

२८) शिष्टः = सज्जनः, द्वेष्यः अपि = शत्रुरपि, आर्तस्य = पीडितस्य, औषधं = भेषजम्, यथा = इव, तस्य = दिलीपस्य, सम्मतः = अनुमतः, आसीत् = दुष्टः = दुर्जनः, प्रियः अपि = मित्रमपि, उरगक्षता = सर्पदष्टा, अङ्गुली इव = करशाखा यथा, त्याज्यः = त्यक्तुं योग्यः, (बभूव)।

२९) वेधाः = स्त्रष्टा, तममहाभूतसमाधिना = पञ्चमहाभूतानाम् उपादानेन, तम् = दिलीपम्, विदधे = सृष्टवान्, नूनम् = ध्रुवम्, तथाहि = यतः, तस्य = दिलीपस्य, सर्वे गुणाः = सम्पूर्णाः दया-दाक्षिण्यादिगुणाः, परस्य = अन्यस्य, अर्थः = प्रयोजनम्, एकम् = मुख्यम्, फलम् = परिणामः, आसन् = अभवन्।

३०) सः = दिलीपः, वेलावप्रबलयाम् = समुद्रकुलमेव प्राकारवेष्टनम्, परिखीकृतसागराम् = दुर्गवेष्टनीकृतां सागरम्, अन्यशासनाम् = अन्यस्य शासनरहितम्, उर्वीम् = पृथिवीम्, एकपुरीम् इव = एकनगरीमेव, शशास = शासितवान्।



ज्ञातव्यम्

उद्धृतेषु श्लोकेषु केषाञ्चन विशेषसंस्कृतपदानां संक्षिप्तः परिचयः -

११ तमः श्लोकः :- वैवस्वतः = सूर्यपूत्रः।

प्रणवः = ओंकारः। 'अ', 'उ', 'म' एतेषां त्रयाणां वर्णानां समाहाररेव ओंकारः प्रणवः वा।

छन्दः = वेदः।

१४ तमः श्लोकः :- मेरुः = पौराणिकभौगोलिकसीमानुसारं पृथिव्याः मध्यभागेऽवस्थित एकः पर्वतः। देवतानां निवासस्थानम्।

१८ तमः श्लोकः :- वलिः = षष्ठांशरूपं करम्। पृथिवीपालनहेतुः पृथिव्यात् समुत्पन्नस्य द्रव्यस्य षष्ठांशं राज्ञः प्राप्यः।

२० तमः श्लोकः :- प्रारम्भः = साम-दान-दण्ड-भेदाः - एतेषां चतुर्णाम् उपायाणां प्रयोगं प्रारम्भ इत्युच्यते।

२३ तमः श्लोकः :- वृद्धत्व = वृद्धत्व चतुर्प्रकाराः - वैराग्यम्, ज्ञानम्, शीलम्, वयश्च। राज्ञो दिलीपस्य गुणेषु प्रारम्भिकः त्रयः विराजमानमासीत्।

विद्या = विद्या चतुर्दशप्रकाराः - अङ्गानि वेदाश्चत्वारो मीमांसान्यविस्तरः। धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दशः (मनुस्मृतिः)।

२९ तमः श्लोकः :- महाभूत् = क्षिति-अप-तेज-मरुत्-व्योमश्चेति एतानि पञ्चमहाभूतानि जगतो निर्माणस्य उपादानम्।

३.३.३ श्लोकानाम् असमीयानुवादः

इदानीं भवन्तः प्रथमसर्गस्य एकादशतः त्रिंशत् श्लोकं यावत् (११-३०) श्लोकानाम् असमीयानुवादः ज्ञातुं प्रभवन्ति।

- বেদসমূহৰ ভিতৰত (আদিভূত) প্রণৱৰ নিচিনা মনীষিসকলৰ পূজনীয় বৈবস্বত নামৰ মনু ৰজাসকলৰ ভিতৰত অগ্রণী আছিল।
- ক্ষীৰসমুদ্রত যিদৰে চন্দ্রৰ জন্ম হৈছিল, সেইদৰে তেওঁৰ (মনুৰ) পবিত্র বংশত দিলীপ নামেৰে পৰিত্রতম শ্রেষ্ঠ ৰজাৰ জন্ম হৈছিল।
- তেওঁৰ বিশাল বক্ষস্থল। বৃষৰ দৰে স্কন্ধদেশ, শালগছৰ দৰে ওখ শৰীৰ, দীর্ঘবাহু আৰু স্বকার্য সাধনোপযোগী শৰীৰ যেন ক্ষত্রিয় ধর্মৰ আশ্রয়স্থলহে আছিল।
- সকলোতকৈ বলবান, সকলো শক্তিৰ অভিভবকাৰী, উচ্চতাৰে সকলোকে পৰাজিত কৰি, মেৰু পর্বতৰ দৰে বিৰাজমান আছিল।
- তেওঁৰ আকৃতিৰ অনুৰূপ আছিল প্রজ্ঞা। প্রজ্ঞাৰ অনুৰূপ আছিল শাস্ত্রজ্ঞান,

শাস্ত্রজ্ঞানৰ অনুৰূপ আছিল তেওঁৰ কর্মানুষ্ঠান আৰু কার্যানুষ্ঠানৰ অনুৰূপ আছিল ফলপ্রাপ্তি।

- শক্তি, প্রতাপ আদিৰে ভীষণ, দয়া-দাক্ষিণ্য আদি কমনীয় ৰাজগুণসমূহৰ বাবে তেওঁ (ৰজা দিলীপ) আশ্রয়ত থকাসকলৰ বাবে জলজন্তু আৰু ৰত্নৰাজি থকা সাগৰৰ দৰে দুষ্প্রৰেশ্য আৰু অনভিভৱনীয় হৈছিল।
- সাৰথিয়ে চালনা কৰা ৰথৰ চকা যিদৰে চকাৰ চিনৰ পৰা বিন্দুমাত্রও আঁতৰি নাযায় সেইদৰে তেওঁৰ প্রজাসকলো মনুৱে প্রদর্শিত পথৰ পৰা ৰেখামাত্রও বিচলিত হোৱা নাছিল।
- তেওঁ প্রজাৰ কল্যাণৰ বাবে তেওঁলোকৰ পৰা কৰ সংগ্রহ কৰিছিল। কাৰণ সহস্রগুণে বৰষুণ দিবৰ বাবেই সূর্যই পৃথিৱীৰ পৰা জল গ্রহণ কৰে।
- চতুৰঙ্গ সৈন্যবল তেওঁৰ পৰিচ্ছদ বা উপকৰণ স্বৰূপহে আছিল। কিয়নো শাস্ত্রত অপ্রতিহত বুদ্ধি আৰু ধনুত আৰোপিত জ্যা- এই দুয়োবিধৰ দ্বাৰাই তেওঁৰ প্রয়োজন সিদ্ধি হৈছিল। তেওঁ অত্যন্ত গোপনে মন্ত্রণা কৰিছিল। আকাৰ বা ইঙ্গিতেৰে হৃদয়ৰ ভাব প্রকাশ নাপাইছিল। জন্মান্তৰৰ সংস্কাৰৰ দৰে সেই ৰজাৰ কার্যাৱলী ফলৰ দ্বাৰাহে অনুমান কৰিব পৰা হৈছিল।
- তেওঁ ভীত নহৈ নিজ ৰক্ষা কৰিছিল। নিৰোগী হৈয়ো ধর্মাচৰণ কৰিছিল। নির্লোভ হৈয়ো অর্থগ্রহণ কৰিছিল। অনাসক্ত হৈয়ো বিষয়সুখ উপভোগ কৰিছিল।
- তেওঁ জ্ঞানী হৈয়ো মৌন। শক্তিশালী হৈয়ো ক্ষমাশীল, দানী হৈও আত্মশ্লাঘা নকৰিছিল- তেওঁৰ মাজত এই পৰস্পৰবিৰোধী গুণসমূহ সহোদৰৰ দৰেই অবস্থান কৰিছিল।
- বিষয়ভোগৰ প্রতি অনাসক্ত, সমস্ত বিদ্যাত পাৰদর্শী, ধর্মানুৰক্ত তেওঁ জৰা অবিহনেই (যৌৱনকালতে বুদ্ধিত) বার্দ্ধক্য অর্জন কৰিছিল।
- শিক্ষা, ৰক্ষণাৱেক্ষণ আৰু ভৰণ-পোষণ আদিৰ বাবেই তেওঁ প্রজাসকলৰ পিতৃ আছিল। তেওঁলোকৰ প্রকৃত পিতৃসকল কেৱল জন্মদাতাহে আছিল।
- তেওঁ লোকস্থিতিৰ বাবে দণ্ডৰ যোগ্যসকলক দণ্ডপ্রদান কৰিছিল। সন্তান লাভৰ বাবে পত্নীগ্রহণ কৰিছিল। সেয়েহে সেই মনীষীৰ অর্থ আৰু কামসাধনো ধর্মস্বৰূপ হৈছিল।
- তেওঁ যজ্ঞৰ বাবে পৃথিৱীক দোহন কৰিছিল আৰু ইন্দ্রই শস্য-সম্পদৰ বাবে স্বর্গক দোহন কৰিছিল। এইদৰে উভয়ে সম্পদ বিনিময়ৰ দ্বাৰা দুয়োলোকৰ সমৃদ্ধি সাধন কৰিছিল।
- আন ৰজাসকলে সেই পৰিত্রাতা ৰজা দিলীপৰ যশস্যাৰ অনুকৰণ কৰিব নোৱাৰিলে। কাৰণ চৌর্য্যবৃত্তি পৰধনৰ পৰা আঁতৰি কেৱল শুনিবলৈহে পোৱা গৈছিল।

- ৰোগীৰ ওচৰত ঔষধ যিদৰে প্ৰিয়, শত্ৰু হ'লেও সজ্জন তেওঁৰ প্ৰিয়পাত্ৰ আছিল। কিন্তু দুষ্ট ব্যক্তি প্ৰিয় হ'লেও সাপে খোঁটা আঙুলিৰ দৰেই পৰিত্যাগ কৰিছিল।
- বিধাতাই নিশ্চয় তেওঁক পঞ্চ মহাভূতনির্মাণৰ উপাদানেৰে সৃষ্টি কৰিছে। কাৰণ তেওঁৰ সকলো গুণ পৰোপকাৰৰ বাবেই নিয়োজিত হয়।
- সমুদ্ৰতীৰৰূপ প্ৰাচীৰ আৰু সাগৰৰূপ পৰিখাৰে আবৃত অন্যৰ শাসনৰহিত এই পৃথিৱীক তেওঁ এখন নগৰীৰ নিচিনাকৈ শাসন কৰিছিল।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: वैवस्वतः कः ?

.....

प्रश्नः २: 'छन्दस्' शब्दस्य कोऽर्थः ?

.....

प्रश्नः ३: 'बलि' इति शब्दस्य कोऽर्थः

.....

प्रश्नः ४: 'मधवा' इत्यनेन शब्देन को बोध्यते ?

.....

प्रश्नः ५: 'उर्वी' इति शब्दस्य एकः प्रतिशब्दो लिखन्तु ?

.....

३.३.४ व्याकरणटिप्पणी

११) वैवस्वतः = विवस्वतः अपत्यं पुमानिति विवस्व + अण्।
आसीत् = अस् लङ् द।
महीक्षिताम् = महीक्षि + क्विप्, षष्ठी बहुवचनम्।
माननीयः = मान + अनीयर्।
मनुः = प्रातिपदिकार्थे प्रथमा।
मनीषिणीम् = मनसः इषिणः तेषाम्।

१२) प्रसूतः = प्र सू + क्त (कर्तरि)।
तदन्वये = तस्य अन्वयः।
राजेन्दुः = राज्ञाम् + इन्दुः।
तदन्वये = अधिकरणे सप्तमी।
क्षीरनिधौ = क्षीरस्य निधौ षष्ठीतत्पुरुषसमासः।

१३) आश्रितः = आ - श्रि + क्त।
व्यूढ = वि + वह क्त।

व्यूढोरस्कः = व्यूढं विपुलं उरः यस्य सः = बहुव्रीहिसमासः।

वृषस्कन्धः = वृषस्य स्कन्ध इव स्कन्धो यस्य सः = बहुव्रीहिसमासः।

महाभुजः = महान्तौ भुजौ यस्य सः = बहुव्रीहिसमासः।

आत्मकर्मक्षमम् = आत्मनः कर्म तस्मिन्क्षमः तम्।

१४) स्थितः = स्था + क्त (कर्तरि)।

आत्मना = करणे तृतीया।

सर्वातिरिक्तसारेण = सर्वेभ्यः अतिरिक्तः सारः यस्य सः तेन = बहुव्रीहिसमासः।

सर्वतेजोभिभाविना = सर्वाणि भूतानि तेजसा अभिभवति तेन।

१५) आरम्भः = आ - रभ् + घञ्।

उदयः = उत् - इ + अच्।

आकारसदृशप्रज्ञः = आकारेण सदृशी प्रज्ञा यस्य सः = बहुव्रीहिसमासः।

प्रज्ञया सदृशागमः = प्रज्ञया सदृशः आगमः यस्य सः = बहुव्रीहिसमासः।

आगमैर्सदृशारम्भः = आगमैः सदृशः आरम्भः यस्य सः = बहुव्रीहिसमासः।

१६) बभूव = भू + लिट् अ।

अभिगम्यः = अभिगम् + ल्यप्।

भीमकान्तैः = भीमाः च कान्ताः च = द्वन्द्वसमासः।

नृपगुणैः = नृपाणां गुणाः तैः = कर्मधारयसमासः।

१७) क्षुण्णाद् = क्षुद् + क्त (कर्मणि), तस्मात्।

वर्त्मन् = वृत् + मनिन्।

नियन्तुः = शेषे षष्ठी।

नेमिवृत्तयः = नेमीनां वृत्तिरिव वृत्तिः यासां ताः = बहुव्रीहिसमासः।

१८) अग्रहीत् = ग्रह् + लुङ् द।

उत्स्रष्टुम् = उत् - सृज् + तुमुन्।

प्रजानाम् = षष्ठीबहुवचनम्।

सहस्रगुणम् = सहस्रं गुणा यस्मिन् कर्मणि यथा स्यात्तथा।

१९) मौर्वी = मूर्वा + अण् + ङीप्।

शास्त्रेषु = अधिकरणे सप्तमी।

धनुषि = अधिकरणे सप्तमी।

अर्थसाधनम् = अर्थस्य साधनम् = षष्ठी तत्पुरुषसमासः।

अकुण्ठिता = न कुण्ठिता = नञ्तत्पुरुषसमासः।

२०) संवृत्त = सम् वृत् क्त।

संवृत्तमन्त्रस्य = संवृतः मन्त्रः येन स तस्य = बहुव्रीहिसमासः।

गूढाकारेङ्गितस्य = गूढैः आकारेङ्गिते यस्य सः तस्य = बहुव्रीहिसमासः।

२१) आददे = आ – दा + लिट् ए।

अन्वभूत् = अनु – भू + लुङ् द।

अत्रस्तः = न त्रस्तः = नञ् तत्पुरुषसमासः।

अनातुरः = न आतुरः = नञ् तत्पुरुषसमासः।

२२) ज्ञानम् = ज्ञा + ल्युट् करणे, तस्मिन्।

त्यागे = त्यज् + घञ्, तस्मिन्।

गुणानुबन्धित्वात् = गुणान् अनुबन्धं शीलं येषां ते इति गुणानुबन्धिनः = बहुव्रीहिसमासः।

श्लाघाविपर्ययः = श्लाघायाः विपर्यय = षष्ठीतत्पुरुषसमासः।

२३) आकृष्टः = आ – कृष् + क्त।

विषयैः = करणे तृतीया।

आसीत् = अस् लङ्प्रथमपुरुष एकवचनम्।

धर्मरतेः = धर्मे रति यस्य तस्य = बहुव्रीहिसमासः।

अनाकृष्टस्य = न आकृष्टस्य = नञ् तत्पुरुषसमासः।

२४) विनयः = वि + नी + अच्।

आधानम् = आ + धा + ल्युट्।

प्रजानाम् = शेषे षष्ठी।

रक्षणात् = हेतौ पञ्चमी।

जन्महेतवः = जन्मनः हेतवः।

विनयाधानात् = विनयस्य आधानात् तस्मात्।

२५) दण्डयतः = दण्ड + शतृ, षष्ठी एकवचनम्।

परिणेतुः = परि – नी + तृच्, षष्ठी एकवचनम्।

अर्थकामौ = अर्थः च कामः च = द्वन्द्वसमासः।

२६) दुदोह = दुह् + लिट् + णल्।

शस्याय = तुमर्थे चतुर्थी।

यज्ञाय = चतुर्थी एकवचन।

सम्पद्विनिमयेन = सम्पदः विनिमयः तेन = षष्ठी तत्पुरुषसमासः।

२७) अनुययुः = अनु – या + लिट् उस्।

व्यावृत्त = वि आ वृत् क्त।

परस्वेभ्यः = परेषां स्वानि तेभ्यः = पंचमी तत्पुरुषसमासः।

२८) द्वेष्यः = द्विष् + ण्यत्।

सम्मतः = सम् – मन् + क्त।

शिष्टः = शिष् + क्त।

त्यज्य: = त्यज् + ण्यत्।

आसीत् = भू लङ्लकार: प्रथमपुरुष: एकवचनम्।

उरगक्षता = उरगेण क्षता = तृतीया तत्पुरुषसमास:।

२९) विदधे = वि - धा + लिट् ए।

आसन् = अस् + लङ् अण्।

महाभूतसमाधिना = करणे तृतीया।

परार्थकफला: = परेषाम् अर्थ: परार्थ: स: एव एकं फलं एषां ते = बहुव्रीहिसमास:।

३०) शशास = शास् + लिट् णल्।

वेलावप्रबलयाम् = वेला: एव प्रबला: यस्या: ताम् = बहुव्रीहिसमास:।

३.४ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

মহাকবি কালিদাস ৰচিত ৰঘুবংশম্ মহাকাব্যৰ প্ৰথম সৰ্গৰ আৰম্ভণিতে কবিয়ে শিৱ-পাৰ্বতীক প্ৰণিপাত জনাইছে। নিজৰ অহঙ্কাৰ ত্যাগ কৰি পূৰ্বসূৰিসকলৰ পথ অনুকৰণ কৰি ৰঘুবংশৰ বৰ্ণনা কৰিবলৈ ইচ্ছা প্ৰকট কৰিছে। ৰঘুবংশীয় ৰজাসকলৰ গুণ বৰ্ণনা কৰি কাব্যখনৰ কাব্যত্ব বিচাৰৰ ভাৰ সুধীজনৰ হাতত অৰ্পণ কৰিছে। বিবস্বত্ মনুৰ পৰাই ৰঘুকুলৰ উৎপত্তি (নং শ্লোক)। ক্ষীৰসমুদ্ৰত চন্দ্ৰৰ আৱিৰ্ভাব হোৱাৰ দৰেই সেই বংশত দিলীপৰ জন্ম হৈছিল (নং শ্লোক)। বিভিন্ন দৈহিক সুষমাৰে মণ্ডিত দিলীপৰ শৰীৰ যেন ক্ষত্ৰিয়ধৰ্মৰ আশ্ৰয়স্থলহে আছিল (নং শ্লোক)। সমস্ত শক্তিৰে, দীপ্তিৰে আৰু উচ্চতাৰে সকলোকে পৰাভূত কৰি মেৰুপৰ্বতৰ দৰে বিৰাজমান আছিল (নং শ্লোক)। ৰজা দিলীপৰ, জ্ঞান, বিদ্যা কৰ্মানুষ্ঠান আৰু সিদ্ধি সকলো সমানুপাতিক আছিল (নং শ্লোক)। ভীষণ আৰু কমনীয় গুণৰ দ্বাৰা ৰজা দিলীপ জলজন্তু আৰু ৰত্নেৰে পৰিপূৰ্ণ সাগৰৰ দৰেই অনুজীৱিসকলৰ বাবে দুষ্প্ৰৰেশ্য আৰু আশ্ৰয়নীয় আছিল (নং শ্লোক) সাৰথিচালিত ৰথৰ চকাৰ যিদৰে হেৰফেৰ নহয়, দিলীপৰ শাসনকালতো, প্ৰজাসকলে মনু প্ৰদৰ্শিত পথৰ পৰা বিচলিত হোৱা নাছিল (নং শ্লোক)। সূৰ্যই জলবৰ্ষণৰ বাবে জল আকৰ্ষণ কৰাৰ দৰেই দিলীপেও প্ৰজাৰ পৰা কৰ গ্ৰহণ কৰিছিল (নং শ্লোক)। সৈন্যবল তেওঁৰ কাৰণে ভূষণ স্ৱৰূপহে আছিল; শাস্ত্ৰজ্ঞান আৰু ধনুশৰেই প্ৰয়োজন সিদ্ধিৰ বাবে যথেষ্ট আছিল (নং শ্লোক)। ৰজা দিলীপে মন্ত্ৰণাৰ গোপনীয়তা ৰক্ষা কৰিছিল। তেওঁৰ কাৰ্যপদ্ধতি ফলৰ দ্বাৰাহে অনুমেয় আছিল (নং শ্লোক)। তেওঁ ভীত নহ'লেও আত্মৰক্ষা, নিৰোগী হৈয়ো ধৰ্মাচৰণ, লোভহীন হৈয়ো অৰ্থগ্ৰহণ আৰু অনাসক্ত হৈয়ো সুখ ভোগ কৰিছিল (নং শ্লোক) তেওঁ জ্ঞানী হৈয়ো মৌন। শক্তিশালী হ'লেও ক্ষমাশীল, ত্যাগী হৈয়ো নিৰহংকাৰী আছিল (নং শ্লোক) বিষয়সুখত উদাসীন, সকলো বিদ্যাত পাৰদৰ্শী, ধৰ্মাণুৰক্ত হোৱা বাবে বৃদ্ধকাল নোপোৱাকৈয়ে (বুদ্ধিত) বৃদ্ধত্বপ্ৰাপ্ত হৈছিল (নং শ্লোক)। প্ৰজাসকলৰ শিক্ষাবিধান, ৰক্ষণাবেক্ষণ আৰু ভৰণ-পোষণৰ বাবে তেওঁ প্ৰজাসকলৰ পিতৃস্ৱৰূপ আছিল (নং শ্লোক)। সামাজিক স্থিতিৰ বাবে দণ্ডবিধান কৰি, সন্তানপ্ৰাপ্তিৰ বাবে বিবাহকাৰ্য কৰা বাবে ৰজা দিলীপৰ

অর্থ আৰু কামো ধর্মাচৰণ কৰাৰ দৰেই আছিল (নং শ্লোক)। তেওঁ যজ্ঞৰ বাবে পৃথিৱীক আৰু ইন্দ্রই শস্যবৃদ্ধিৰ বাবে স্বর্গক দোহন কৰি উভয়ে উভয়ৰ সম্পদ বৃদ্ধি কৰিছিল (নং শ্লোক)। আন ৰজাসকলে দিলীপৰ যশস্যা অনুকৰণ কৰিব নোৱাৰিছিল। তেওঁৰ ৰাজত্বকালত চৌর্যাদিবৃত্তি কেৱল শুনিবলৈ পোৱা গৈছিল প্রচলন নাছিল (নং শ্লোক)। শিষ্ট ব্যক্তিক শত্রু হ'লেও গ্রহণ আৰু দুর্জনক প্রিয় হ'লেও সততে পৰিত্যাগ কৰিছিল (নং শ্লোক)। জগৎ সৃষ্টিৰ উপকৰণ পঞ্চ মহাভূতৰ দৰে ৰজা দিলীপৰ গুণসমূহ পৰোপকাৰৰ বাবেই নিয়োজিত হৈছিল (নং শ্লোক)। সমুদ্র আৰু সমুদ্রতীৰৰূপ প্রাচীৰ আৰু পৰিখাৰে আবৃত এই পৃথিৱীক তেওঁ এখন নগৰীৰ দৰেই শাসন কৰিছিল (নং শ্লোক)।

३.५ प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं यावत् (११-३०) कतिपयाणां श्लोकानां व्याख्या भावार्थश्च

प्रथमसर्गस्य (११-३०) महत्वपूर्णानां श्लोकानां व्याख्या भावार्थश्च भवन्तः इदानीं पठितुं शक्नुवन्ति।

१) सहस्रगुणामुत्स्रष्टुमादत्ते हि रसं रविः॥

महाकविः कालिदासः प्राचीनकालस्य करव्यवस्थामुल्लिख्य करव्यवस्थायाः समुचितं कारणम् उद्धृतवान्। राजा मुख्यतो राज्यव्यवस्थां परिचालनार्थं करसंग्रहव्यवस्थां करोति। एवं मनोः नीतिम् अनुसृत्य राजा दिलीपो राज्यं शासयति। सः सदैव प्रजानां हिताय एव चिन्तयति। प्रजानां कामनां पुरणार्थं स सदैव कार्यं करोति। राज्यपरिचालनार्थं करव्यवस्था अन्यतमा व्यवस्था भवति। राजा दिलीपोऽपि प्रजाहिताय एव प्रजाभ्यः करसंग्रहं कृत्वा प्रजानां प्रयोजननिमित्ताय एव तत् धनमुपयोगं करोति। महाकविना कालिदासेन राज्ञो दिलीपस्य इमं करसंग्रहव्यवस्थां सूर्यस्य कार्येण सह तुलनां करोति। सूर्यः स्वकीयया रश्मिना पृथिव्यात् जलमाहरणं कृत्वा प्रयोजनानुसारं तत् जलं वृष्टिद्वारा पृथिवीं प्रति प्रेरयति। पुनः तेन क्रमेण पृथिवी फल-पुष्पैः समृध्दाः जायन्ते। तथा च पृथिव्यां निवर्तमानाः सर्वे जीवाः तेन एव जलेन जीवन्ति। सूर्यकिरणात् जलं वाष्पीभूत्वा मेघस्य सृष्टिर्जायते। पुनः तस्मात् मेघात् वृष्टिः भूत्वा पृथिवी परिपूर्णा भवति। सूर्यस्य सदृशमेव राजा दिलीपोऽपि दानाय करसंग्रहणं कृत्वा प्रजानां कल्याणाय एव उपयोजयति।

२) स पिता पितरस्तासां केवलं जन्महेतवः।।

राज्ञः प्रमुखो धर्मोऽस्ति प्रजानुरञ्जकत्वमिति। अस्य धर्मस्य पालने दिलीपः सदैव यत्नपरायणम् आसीत्। प्रत्येकानां राज्ञां धर्मो भवति यत् प्रजायाः सुष्ठुरूपेण पालनं पोषणञ्च। अस्य धर्मस्य पालने राजा दिलीपः सर्वदा श्रेष्ठं प्रतिभाति। राजा सदैव प्रजान् माता-पितावत् पालयति पोषयति च। शिक्षाविधानं, रक्षणं, पालनं च यः करोति सः एव पिता भवति। प्राप्यते च - 'स पिता यस्तु पोषकः'। राजा दिलीपोऽपि विनम्रः, शक्तिशाली, रक्षकश्च गुणयुक्तमासीत्। अतः स प्रजान् अपि विनम्रादयः शिक्षाप्रदानम्, आत्मरक्षणस्योपायाः सर्वदा शिक्षयति। राजा दिलीपः स्वीयान् प्रजान् पात्ररूपेण निर्णेतुं सदैव इच्छति। तस्मात् एव राजा दिलीपः सुशिक्षां प्रदाय पितृस्थानं

भजति। प्रजानां स्वकीयो जन्मदाता पिता केवलं जन्महेतवरेव आसीत्। जन्मस्यानन्तरं पितृकर्तव्यानि राजा दिलीपरेव सम्पादयति।

३) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।

श्लोकोऽयं महाकविकालिदासस्य 'रघुवंशम्' इति महाकाव्यस्य प्रथमे सर्गे प्राप्यते। श्लोकेऽस्मिन् महाकविना राज्ञो दिलीपस्य गुणो वर्ण्यते।

अस्मिन् श्लोके कालिदासः सर्वगुणसम्पन्नस्य राज्ञो दिलीपस्य गुणान् वर्णयित्वा सः कीदृशेन सामान्यराजारूपेण निवसति, तत् स्वरूपं प्रदर्शयति। साधारणतो ये जनाः गुणसम्पन्नाः भवन्ति ते तु स्वकीयगुणवशात् स्वाभिमानयुक्ताः भवन्ति। य अधिको बलवान् भवति, स तु अन्यस्योपरि स्वकीयस्य शक्तेः प्रयोगमपि करोति। पुनो यो दानं करोति सः प्रसिद्धिमपि इच्छति। परन्तु, राजा दिलीप एतद्भिन्नोऽस्ति। सः ज्ञानवान् भूत्वापि, स्वकीयं ज्ञानं सर्वेषां सम्मुखे प्रदर्शितं न करोति। बलवान् सन् अपि क्षमावान् अस्ति। सः तु सर्वेषां प्रति दानमपि यथासाध्यानुसारं करोति, परन्तु तस्य कृते कदापि आत्मप्रशंसां नेच्छति। एवं गुणयुक्तो राजा दिलीपः ज्ञान - शक्ति - गुणादिभ्यो युक्तः सन् अपि मौनगुणयुक्तं भूत्वा सर्वेषां प्रति प्रायः सहोदरभावम् आचरति।

पद्येऽस्मिन् अनुष्टुप् छन्दो वर्तते।



३.६ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- 'रघुवंशम्' महाकाव्यस्य प्रथमसर्गस्य विषयवस्तु ज्ञातवन्तः।
- श्लोकेभ्यो रघुवंशस्य उत्पत्तिविषये ज्ञातवन्तः।
- राज्ञो दिलीपस्य गुणान् ज्ञातवन्तः।
- निर्दिष्टानां श्लोकानां संस्कृतपाठः, शब्दार्थः, असमीयानुवादादयः ज्ञातवन्तः।
- निर्दिष्टानां श्लोकानां व्याकरणटिप्पणी ज्ञातवन्तः।



३.७ ज्ञानाधिक्यम्

१) काले, एम. आर. (सम्पा.): रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास पाब्लिछार्च प्राइभेट लिमिटेड।

२) नन्दर्गिकार, गोपाल रघुनाथ (१९८२) (सम्पा.) : रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास।

३) शास्त्री, अशोकनाथ & भाज्ञा सरोजनाथ (१९५१) (सम्पा.) कालिदासस्य रघुवंशम्; मडार्ण वुक एजेन्सि।



३.८ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : वैवस्वतो भवति सूर्यपुत्रः।

प्रश्नः २ : उत्तरम् : 'छन्दस्'शब्दस्य अर्थः वेदः।

प्रश्नः ३ : उत्तरम् : 'बलि'शब्दस्य अर्थः करः।

प्रश्नः ४ : उत्तरम् : 'मघवा' इति शब्देन इन्द्रो बोध्यते।

प्रश्नः ५ : उत्तरम् : 'उर्वी' इति शब्दस्य प्रतिशब्दः 'पृथिवी' इति।



३.९ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

अधौ उल्लिखितानां पदानां व्याकरणटिप्पणी लिखन्तु :

माननीयः, व्यूढोरस्कः, वृषस्कन्धः, महाभुजः, भीमकान्तैः, नृपगुणैः, नेमिवृत्तयः, विनयः, अर्थकामौ, परार्थकफलाः।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५०-३०० शब्देषु लिखन्तु)।

व्याख्या भावार्थः च लेखनीयः

१) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।

२) सहस्रगुणामुत्स्रष्टुमादत्ते हि रसं रविः ॥

३) स पिता पितरस्तासां केवलं जन्म हेतवः।।

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३००-५०० शब्देषु लिखन्तु)।

प्रश्नः १ : राज्ञो दिलीपस्य चारित्रिकवैशिष्ट्यम् अधिकृत्य एको निबन्धो लिखन्तु।

*** ***** ***

अध्यायः ४ : रघुवंशम् - प्रथमसर्गः, (श्लोकाः ३१-४८)

अध्यायस्य संरचना

४.१ उद्देश्यम्

४.२ परिचयः

४.३ प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् श्लोकानां संस्कृतपाठः

- ४.३.१ श्लोकानाम् अन्वयः
- ४.३.२ श्लोकानां शब्दार्थः
- ४.३.३ श्लोकानाम् असमीयानुवादः
- ४.३.४ व्याकरणटिप्पणी

४.४ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

४.५ प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च

४.६ अध्यायात् किमवगतम्

४.७ ज्ञानाधिक्यम्

४.८ अग्रगत्याः निरूपणम्

४.९ अभ्यासप्रश्नाः

४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् विषयम् अवगन्तुं शक्नुवन्ति।
- प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् श्लोकानां संस्कृतपाठ-शब्दार्थ-अनुवादाः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् श्लोकानां व्याकरणटिप्पण्यः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च ज्ञातुं शक्नुवन्ति।

४.२ परिचयः

तृतीयेऽध्याये भवन्तः 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य एकादशतः त्रिंशत्श्लोकं (११-३०) पर्यन्तम् अध्ययनं कृतवन्तः। तत्र 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य एकादशतः

त्रिंशत्श्लोकं (११-३०) पर्यन्तम् श्लोकानां संस्कृतपाठ-शब्दार्थ-व्याकरणगतटिप्पणी-व्याख्या-भावार्थादीन् पठितवन्तः। अध्यायेऽस्मिन् भवन्तः एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् श्लोकानां संस्कृतपाठ-शब्दार्थ-व्याकरणगतटिप्पणी-व्याख्या-भावार्थादीन् पठितुं शक्नुवन्ति। एतेषां श्लोकानाम् अध्ययनात्परं भवन्तः पत्न्या सह राज्ञो दिलीपस्य वशिष्ठमुनेः आश्रमं प्रति यात्राविषये ज्ञातुमर्हन्ति।

४.३ प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१ - ४८) यावत् श्लोकानां संस्कृतपाठः

१) तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।। ३१।।

२) कलत्रवन्तमात्मानमवरोधे महत्यपि।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ ३२।।

३) तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥ ३३।।

४) सन्तानार्थाय विधये स्वभुजादवतारिता।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥ ३४।।

५) अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥ ३५॥

६) स्निग्ध गम्भीर निर्घोषमेकं स्यन्दनमास्थितौ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ ३६॥

७) माभूदाश्रमपीडेति परिमेयपुरः सरौ।
अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७।।

८) सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः।
पुष्परेणूत्किरैर्वातैराधूत वनराजिभिः ॥ ३८।।

९) मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखंडिभिः ॥ ३९॥

१०) परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु।। ४०।।

११) श्रेणीबन्धाद्वितन्वद्भिरतम्भां तोरणस्रजम्।
सारसैः कलानिर्ह्रादैः क्वचिदुन्नमिताननौ।। ४१।।

१२) पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः।
रजोभिः तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ।। ४२।।

१३) सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।
आमोदमुपजिघ्नन्तौ स्वनिःश्वासानुकारिणम्।। ४३ ॥

१४) ग्रामेषु आत्मविसृष्टेषु यूपचिह्नेषु यज्वनाम्।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः।। ४४।।

१५) हैयंगवीनमादाय घोषवृद्धानुपस्थितान्।
नामधेयानि पुच्छन्तौ वन्यानां मार्गशाखिनाम् ॥ ४५।।

१६) काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।। ४६।।

१७) तत्तद्भूमिपतिः पत्न्यै दर्शयान्प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः।। ४७।।

१८) सा दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।
सायं संयमिनस्तस्य महर्षे र्महिषी सखः ॥ ४८।।

४.३.१ श्लोकानाम् अन्वयः

१) तस्य मगधवंशजा दाक्षिण्यरूढेन नाम्ना अध्वरस्य पत्नी दक्षिणा इव सुदक्षिणा इति आसीत्।

२) वसुधाधिपः अवरोधे अपि महति मनस्विन्या तया लक्ष्म्या च आत्मानम् कलत्रवन्तम् मेने।

३) सः आत्माऽनुरूपायाम् तस्याम् आत्मजन्म समुत्सुकः विलम्बितफलैः मनोरथैः कालम् निनाय।

४) तेन सन्तानार्थाय विधये स्वभुजात् अवतारिता जगतः गुर्वी धूः सचिवेषु निचिक्षिपे।

५) अथ पुत्रकाम्यया प्रयतौ तौ दम्पती विधातारम् अभ्यर्च्य गुरोः वसिष्ठस्य आश्रमं जग्मतुः।

६) स्निग्धगम्भीरनिर्घोषम् एकम् स्यन्दनम् प्रावृषेण्यम् पयोवाहम् विद्युदैरावतौ इव आस्थितौ।

७) आश्रमपीडा मा भूत् इति परिमेयपुरः सरौ, अनुभावविशेषात् तु सेनापरिवृतौ इव।

८) सुखस्पर्शैः शालानिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवन राजिभिः वातैः सेव्यमानौ।

९) रथनेमिस्वनोन्मुखैः शिखण्डिभिः द्विधा भिन्नाः षड्जसंवादिनीः मनोभिरामाः केकाः शृण्वन्तौ।

१०) अदूरोज्झितवर्त्मसु स्यन्दनाबद्ध दृष्टिषु मृगद्वन्द्वेषु परस्पराक्षिसादृश्यम् पश्यन्तौ।

११) श्रेणीबन्धात् अस्तम्भात् तोरणस्रजम् वितन्वद्भिः कलनिर्ह्यदैः सारसैः क्वचित् उन्नमिताननौ।

१२) प्रार्थनासिद्धि शंसिनः पवनस्य अनुकूलत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टालक वेष्टनौ।

१३) सरसीषु वीचिविक्षोभशीतलम् स्वनिःश्वासानुकारिणम् अरविन्दानां आमोदम् उपजिघ्रन्तौ।

१४) आत्मविसृष्टेषु यूपाचिह्नेषु ग्रामेषु यज्वनाम् अर्घ्यानुपदम् अमोघा आशिषः प्रतिगृह्णन्तौ।

१५) हैयंगवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानाम् मार्गशाखिनाम् नामधेयानि पृच्छन्तौ।

१६) ब्रजतो शुद्ध वेषयोः तयोः हिमनिर्मुक्तयोः चित्राचन्द्रमसौः इव योगे कापि अभिख्या आसीत्।

१७) प्रियदर्शनः बुधोपमः भूमिपतिः पत्न्यै तत्तत् दर्शयन् लंघितम् अपि अध्वानन् न बुबुधे।

१८) दुष्प्रापयशा श्रान्तवाहनः महिषीसखः सः सायं संयमिनः तस्य महर्षेः आश्रमं प्रापत्।

४.३.२ श्लोकानां शब्दार्थः

१) तस्य = राज्ञो दिलीपस्य, मगधवंशजा = मगधवंशे जाता, दाक्षिण्यरूढेन नाम्ना = दाक्षिण्यादिगुणेन लब्धप्रतिष्ठा, अध्वरस्य = यज्ञस्य, पत्नी दक्षिणा इव = दक्षिणाख्या पत्नी इव, सुदक्षिणा इति = सुदक्षिणा इति भार्या, आसीत् = अभूत्।

२) वसुधाधिपः = नृपः, अवरोधे अपि = अन्तः पुरवर्गे अपि, महति = अधिके, मनस्विन्या = दृढचित्तया, तया = सुदक्षिणया, लक्ष्म्या च = राज्यश्रिया च, आत्मानम् = स्वम्, कलत्रवन्तम् = भार्यावन्तम्, मेने = मन्यते स्म।

३) सः = राजा दिलीपः, आत्माऽनुरूपायाम् = स्वसादृशायाम्, तस्याम् = सुदक्षिणायाम्, आत्मजन्म समुत्सुकः = पुत्रलाभे उत्कण्ठितः, विलम्बितफलैः = विलम्बितं पुत्रप्राप्तिरूपं फलैः, मनोरथैः = आशाभिः, कालम् = समयम्, निनाय = पातयामास।

४) तेन = राज्ञा दिलीपेन, सन्तानार्थाय = पुत्रप्राप्त्यर्थम्, विधये = अनुष्ठानाय, स्वभुजात् = निजबाहोः, अवतारिता = अवरोपिता, जगतः = संसारस्य, गुर्वी = गुरुः, धूः = भारः, सचिवेषु = मन्त्रिषु, निचिक्षिपे = निहिता।

५) अथ = अनन्तरम्, पुत्रकाम्यया = पुत्रेच्छया, प्रयतौ = पूतौ, तौ = सुदक्षिणा - दिलीपौ, दम्पती = जायापती, विधातारम् = ब्रह्माणम्, अभ्यर्च्य = सम्पूज्य, गुरोः = कुलगुरोः, वसिष्ठस्य = वसिष्ठमुनेः, आश्रमं = वासस्थानम्, जग्मतुः = यात्रां कृतवन्तौ।

६) स्निग्धगम्भीरनिर्घोषम् = मधुर-गम्भीर-ध्वनियुक्तम्, एकम् स्यन्दनम् = एकं रथम्, प्रावृषेण्यम् = वर्षाकालिनम्, पयोवाहम् = मेघम्, विद्युदैरावतौ इव = तडित्मेघौ यथा, आस्थितौ = आरूढौ।

७) आश्रमपीडा = आश्रमवासिजनस्य कष्टम्, मा भूत् = न भवतु, इति = हेतोः, परिमेयपुरः सरौ = परिमितपरिचालकौ, अनुभावविशेषात् = प्रभावविशेषात्, तु = किन्तु, सेनापरिवृतौ इव = सैन्यवेष्टितौ यथा।

८) सुखस्पर्शैः = सुखप्रदष्पर्शैः, शालानिर्यासगन्धिभिः = सर्जतरुनिस्यन्दगन्धवद्भिः, पुष्परेणूत्किरैः = पुष्पपरागविक्षिप्तैः, आधूतवन राजिभिः = इषत्कम्पितैः वनराजिभिः, वातैः = पवनैः, सेव्यमानौ = परिचर्यमानौ।

९) रथनेमिस्वनोन्मुखैः = रथस्य चक्रप्रान्तस्य निनादेन और्धाननैः, शिखण्डिभिः = मयूरपुच्छैः, द्विधा = शुद्धविकृतभेदेन द्विप्रकाराः, भिन्नाः = भेदमापन्नाः, षड्जसंवादिनीः = षड्भ्यः स्थानेभ्यः जाता स्वरसदृशीः, मनोभिरामाः = मनसः प्रियाः, केकाः = मयुरवाण्यः, शृण्वन्तौ = आकर्णयन्तौ।

१०) अदूरोज्झितवर्त्मसु = मार्गं त्यक्त्वा समीपे स्थितासु, स्यन्दनाबद्ध दृष्टिषु = कौतुकवशाद् रथावद्धदृष्टिषु, मृगद्वन्द्वेषु = हरिणयुगलेषु, परस्पराक्षिसादृश्यम् = परस्परस्य नेत्रसादृश्यम्, पश्यन्तौ = अवलोकयन्तौ।

११) श्रेणीबन्धात् = पंक्तिबन्धनाद्, अस्तम्भात् = आधारस्तम्भरहिताम्, तोरणस्रजम् = वर्हिद्वारमालाम्, वितन्वद्भिः = कुर्वद्भिः, कलनिर्ह्यदैः = अव्यक्तमधुरध्वनिभिः, सारसैः = पक्षिविशेषैः, क्वचित् = कुत्रचित् स्थाने, उन्नमिताननौ = ऊर्ध्वकृतमुखौ।

१२) प्रार्थनासिद्धिशंसिनः = मनोरथसिद्धिसूचकः, पवनस्य = वायोः, अनुकूलत्वात् = अभिमुखत्वात्, तुरगोत्कीर्णैः = अश्वैः उत्क्षिप्तैः, रजोभिः = धूलिभिः, अस्पृष्टालक वेष्टनौ = असंस्पृष्टा-कुन्तलाञ्चीनौ।

१३) सरसीषु = सरोवरेषु, वीचिविक्षोभशीतलम् = ऊमिसङ्घटनेन शीतलम्, स्वनिःश्वासानुकारिणम् = स्वकीयश्वासानुकारिणम्, अरविन्दानां = कमलानाम्, आमोदम् = सुगन्धिम्, उपजिघ्रन्तौ = घ्राणेन गृह्णन्तौ।

१४) आत्मविसृष्टेषु = स्वदत्तेषु, यूपाचिह्नेषु = यज्ञार्थं संस्कृतदारुविशेषेषु, ग्रामेषु = संवसथेषु, यज्वनाम् = याजकानाम्, अर्घ्यानुपदम् = पूजाविधेः अनन्तरम्, अमोघाः = सफलाः, आशिषः = आशीर्वादान्, प्रतिगृह्णन्तौ = स्वीकुर्वन्तौ।

१५) हैयंगवीनम् आदाय = सद्योघृतं गृहित्वा, उपस्थितान् = समागतान्, घोषवृद्धान् = आभीरपल्ल्याः वृद्धजनाम्, वन्यानाम् = वन्योद्भवानाम्, मार्गशाखिनाम् = मार्गस्थितानां वृक्षाणाम्, नामधेयानि = नामानि, पृच्छन्तौ = जिज्ञासमानौ।

१६) ब्रजतो = गच्छतौः, शुद्ध वेषयोः = उज्ज्वलनेपथ्ययोः, तयोः = सुदक्षिणा-दिलीपयोः, हिमनिर्मुक्तयोः = तुषारविनिर्मुक्तयोः, चित्राचन्द्रमसौः = चित्रानक्षत्रस्य

पूर्णचन्द्रस्य चेति, इव = यथा, योगे = सङ्गतौ, कापि = अनिर्वचनीया, अभिख्या = शोभा, आसीत् = अभवत्।

१७) प्रियदर्शनः = दर्शनीयः, बुधोपमः = बुधसदृशः, भूमिपतिः = राजा दिलीपः, पत्न्यै = भार्यायै, तत्तत् = अद्भुतं दर्शनीयं वस्तुम्, दर्शयन् = दर्शयित्वा, लंघितम् अपि = अतिक्रान्तमपि, अध्वानन् = मार्गम्, न बुबुधे = न ज्ञातवान्।

१८) दुष्प्रापयशा = अन्यादुर्लभकीर्तिः, श्रान्तवाहनः = दूरोपगमनात् क्लान्तः अश्वः इव, महिषीसखः = सुदक्षिणायाः सखा, सः = राजा दिलीपः, सायं = सन्ध्याकाले, संयमिनः = नियमतेः, तस्य महर्षेः = वशिष्ठस्य, आश्रमं = निवासस्थानम्, प्रापत् = प्राप्तवान्।



ज्ञातव्यम्

श्लोकः - ३१

दक्षिणा - यज्ञान्ते यज्ञस्य पुरोहितं प्रति यदा सामग्री-अर्थादयः प्रदीयते तान् दक्षिणा इति कथ्यते। वेदेषु दक्षिणां यज्ञपत्नीरूपेण उल्लिख्यते। विभिन्नेषु पुराणेषु प्रजापतेः कन्यारूपेणापि दक्षिणाया उल्लेखः प्राप्यते।

श्लोकः - ३६

ऐरावतः - मेघस्य ऊर्ध्वतमस्तरस्य यो मेघः तम् 'ऐरावतः' इत्युच्यते। इन्द्रस्य गजरूपेण य ऐरावतः प्रसिद्धः, प्रकृततः सः तु मेघरेव। ऋग्वेदादिषु इन्द्रो जलवर्षकरूपेण वर्ण्यते। इन्द्रः वृत्रं (मेघं) हत्वा पृथिव्याम् उपरि जलवर्षणं करोति। तस्मादेव इन्द्रस्य वाहनम् 'ऐरावतः' अर्थात् मेघरिति। विद्युत् मेघस्य कान्ता इति प्रसिद्धिः वर्तते। तस्मादेव विद्युतः अपराभिधानम् 'ऐरावती' इति।

श्लोकः - ३९

षड्जः - तन्त्री-कण्ठाभ्याम् उच्चारितं स्वरविशेषकं 'षड्जः' इति कथ्यते। नासिका-कण्ठ-वक्ष-तालु-जिह्वा-दन्तश्च एतानि षट् स्थानानि स्पर्शं कृत्वा 'षड्जः' स्वरः निगद्यते तस्मात् अस्य नाम 'षड्जः' (मल्लिनाथः) इति। सप्तस्वरेषु प्रथमः स्वरो वर्तते 'षड्जः'। सप्तस्वराः यथा - षड्जः(सा), ऋषभः(रे), गान्धारः (गा), मध्यमः(मा), पञ्चमः(पा), धैवतः(धा), निषादः(नि) चेति। भारतीयसङ्गीतशास्त्रज्ञानां मतानुसारं सर्वे स्वराः प्रकृतेः सृष्टपदार्थात् उत्पद्यन्ते। तत्र मयुरात् 'षड्जः', चातकात् 'ऋषभः', अजायाः 'गान्धारः', क्रौञ्चात् 'मध्यमः', कोकिलात् 'पञ्चमः', मण्डुकात् 'धैवतः', गजात् 'निषादः' च स्वर उत्पद्यते।


द्विधा - मल्लिनाथस्य मतानुसारं शुद्ध-विस्तृतभेदेन अथवा च्युत-अच्युतभेदेन षड्जस्वरस्य भेदद्वयम्। पुनश्च टीकाकारस्य नारायणस्य मतानुसारं स्निग्ध-दीप्तभेदेन षड्जस्वरस्य भेदद्वयम्। केषाञ्चन व्याख्याकर्तृणां मतानुसारं तु स्त्री-पुरुषभेदेन भेदद्वयं प्राप्यते।

৪.৩.৩ শ্লোকানাম্ অসমীয়ানুবাদঃ

এতিয়া 'ৰঘুবংশম্' মহাকাব্যৰ প্ৰথম সৰ্গৰ শ্লোকৰ অসমীয়া অনুবাদ পঢ়িবলৈ পাব।

- যজ্ঞৰ পত্নী দক্ষিণাৰ নিচিনা, তেওঁৰ (দিলীপৰ) দাক্ষিণ্যাদি গুণৰ বাবে প্ৰসিদ্ধ মগধবংশোদ্ভূত সুদক্ষিণা নামে পত্নী আছিল।
- বহু পত্নী থকা সত্ত্বেও পৃথিৱীপতিয়ে (দিলীপে) সেই মনস্বিনী (সুদক্ষিণা) আৰু ৰাজলক্ষ্মীৰ দ্বাৰা নিজকে ভাৰ্য্যাৱান্ বুলি গণ্য কৰিছিল।
- নিজৰ অনুৰূপিনী পত্নীত পুত্ৰৰূপে আত্মজন্মৰ আশাত উৎসুক হৈ বিলম্বিত ফলৰ বাবে মনোৰথেৰেই কাল কটাইছিল।
- তেওঁ সন্তান প্ৰাপ্তিৰ বাবে বৈধ কৰ্মানুষ্ঠানৰ বাবে জগতৰ গুৰুভাৰ নিজৰ পৰা মন্ত্ৰীসকলত অৰ্পণ কৰিলে।
- তাৰ পিছত সেই দম্পতীয়ে পুত্ৰ প্ৰাপ্তিৰ কামনাৰে শুদ্ধ হৈ বিধাতাৰ পূজা অৰ্চনা কৰি গুৰু বশিষ্ঠৰ আশ্ৰমলৈ গ'ল।
- মধুৰ আৰু গম্ভীৰ শব্দ কৰা একেখন ৰথত উঠি তেওঁলোক দুয়োজনে বৰ্ষাকালীন (মধুৰ আৰু গভীৰ ধ্বনিযুক্ত) মেঘত অৱস্থান কৰা বিদ্যুৎ আৰু ঐৰাৱতৰ দৰে শোভা পালে।
- আশ্ৰমৰ শান্তিভঙ্গ নহওক এই বিবেচনা কৰি কেইজনমান অনুচৰৰ সৈতে যোৱা সত্ত্বেও প্ৰতাপ আৰু তেজস্বিতাৰ বাবে তেওঁলোকক সৈন্যৰে আবৃত যেন দেখা গৈছিল।
- মুখস্পৰ্শী, শালগছৰ নিৰ্য্যাসৰ গোন্ধেৰে আমোদিত, পুষ্পৰেণু বিক্ষেপকাৰী আৰু বনৰাজিক সামান্য কঁপাই থৈ যোৱা বায়ুয়ে তেওঁলোক দুয়োৰে সেৱা কৰিলে।
- তেওঁলোক দুয়োয়ে ৰথৰ চকাৰ শব্দত উন্মুখ হৈ পৰা ময়ূৰবিলাকৰ দ্বিধাবিভক্ত ষড়জস্বৰৰ দৰে মনোৰম কেকা ধ্বনি শুনিবলৈ ধৰিলে।
- পথৰ অনতিদূৰত থিয় হৈ ৰথৰ ফালে চাই থকা হৰিণযুটিৰ চকুত তেওঁলোক দুয়োয়েই পৰস্পৰৰ চকুৰ সাদৃশ্য চাব ধৰিলে।
- অস্পষ্ট মধুৰ শব্দ কৰি, স্তম্ভহীন তোৰণমালাৰ দৰে শাৰী পাতি উৰি যোৱা সাৰসপক্ষীবোৰলৈ মূৰ তুলি চাবলৈ ধৰিলে।
- অভীষ্টসিদ্ধিসূচক অনুকূল বায়ু প্ৰবাহিত হোৱাত ঘোঁৰাৰ খুৰাৰ আঘাতত উঠা ধূলিয়ে তেওঁলোকৰ কুন্তল আৰু শিৰস্থান স্পৰ্শ কৰিব নোৱাৰিলে।
- তেওঁলোকে সৰোবৰবিলাকৰ ঢৌৰ স্পৰ্শত শীতল হোৱা আৰু নিজ নিজ নিঃশ্বাসৰ অনুকাৰিণী পদুমফুলৰ গোন্ধ আঘ্ৰাণ কৰিবলৈ ধৰিলে।
- নিজেই দান কৰা যজ্ঞস্তম্ভেৰে চিহ্নিত গাঁওবোৰত যাজ্ঞিকসকলে অৰ্ঘ্যগ্ৰহণ কৰাৰ পিছত তেওঁলোকৰ অব্যৰ্থ আশীৰ্বাদ গ্ৰহণ কৰিব ধৰিলে।

- সদ্যপ্রস্তুত ঘিউ লৈ উপস্থিত হোৱা গোপবৃদ্ধসকলক পথৰ কাষত গজি উঠা বনৰীয়া গছসমূহৰ নাম সুধিবলৈ আৰম্ভ কৰিলে।
- হিমমুক্ত চিত্রা আৰু চন্দ্রৰ সংযোগত যি শোভা হয়, শুদ্ধ বেশত প্রস্থান কৰা তেওঁলোক দুয়োজনৰো একেলগে তেনে এক অনির্বচনীয় শোভাই হৈছিল।
- স্বয়ং বুধৰ দৰে প্রিয়দর্শন সেই ৰজাই পত্নী সুদক্ষিণাক সেইসকলো ৰম্য বস্তু দেখুৱাই যাওতে কিমানদূৰ বাট অতিক্রম কৰিলে গমেই নাপালে।
- অসাধাৰণ যশস্বী মহাৰাজ দিলীপে ক্লান্ত হৈ পৰা বাহনসমূহ আৰু মহিষীৰে সৈতে সন্ধ্যা সময়ত সংযমী মহর্ষি বশিষ্ঠৰ আশ্রমত উপস্থিত হ'ল।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: सुदक्षिणा कस्मिन् वंशे जन्मो लभ्यते ?

.....

प्रश्नः २: 'कलत्रम्' इति शब्दस्य प्रतिशब्दं लिखन्तु।

.....

प्रश्नः ३: 'ऐरावतः' इत्युक्ते किम् ?

.....

प्रश्नः ४: 'यूपः' इत्युक्ते किम् ?

.....

प्रश्नः ५: राजा दिलीपः कया सह आश्रमं प्रति अगच्छत् ?

.....

४.३.४ व्याकरणटिप्पणी

३१) नाम्ना = उपलक्षणे तृतीया।

अध्वरस्य = षष्ठी एकवचनम्।

मंगधवंशजा = मगधानां वंशे जाता इति = तत्पुरुषसमासः।

दाक्षिण्यरूढेन = दाक्षिण्येन रूपम् तेन = तृतीया तत्पुरुषसमासः।

३२) अवरोधे = अव - रुध् + घञ्, सप्तमी एकवचनम्।

मेने = मन् + लिट् ए।

तया = करणे तृतीया।

लक्ष्म्या = करणे तृतीया ।

आत्मानम् = आत्मन् द्वितीया एकवचनम्।

वसुधाधिपः = वसुधायाः अधिपः = षष्ठी तत्पुरुषसमासः।

३३) निनाय = नी - लिट् णल्।

तस्याम् = अधिकरणे सप्तमी।

मनोरथैः = सहयोगे तृतीया।

आत्मानुरूपायाम् = अनुगतं रूपं यस्याः सा अनुरूपा (बहुव्रीहिसमासः), आत्मनः अनुरूपा (षष्ठी तत्पुरुषसमासः), तस्याम्।

आत्मजन्मसमुत्सुकः = आत्मनः जन्म यस्य सः आत्मजन्मा (बहुव्रीहिसमासः), तस्मिन् समुत्सुकः (सप्तमी तत्पुरुषसमासः)।

विलम्बितफलैः = विलम्बितं फलं येषां तैः (बहुव्रीहिसमासः)।

३४) जगतः = गम् + क्विप् = जगत्, षष्ठी एकवचनम्।

विधये = वि - धा + कि, तस्मै।

अवतारिता = अव - तृ + णिच् + क्त (कर्मणि)।

गुर्वी = गुरु + ङीप्।

निचिक्षिपे = नि - क्षिप् + लिट् ए (कर्मणि)।

सन्तानार्थाय = ताद्यर्थे चतुर्थी।

विधये = ताद्यर्थे चतुर्थी।

स्वभूजात् = अपादाने पञ्चमी।

धूः = उक्ते कर्मणि प्रथमा।

सचिवेषु = अधिकरणे सप्तमी।

सन्तानार्थाय = सन्तानः अर्थः यस्य (बहुव्रीहिसमासः), तस्मै।

स्वभूजात् = स्वस्य भूजः (पञ्चमी तत्पुरुषसमासः), तस्मात्।

३५) अभ्यर्च्य = अभि - अर्च्च + ल्यप्।

विधातारम् = वि - धा + तृच्, द्वितीया एकवचनम्।

पुत्रकाम्यया = आत्मनः पुत्रं कामयतीति, पुत्र + काम्यच् + अ + टाप् (स्त्रियाम्), तया।

जग्मतुः = गम् + लिट् अतुस्।

पुत्रकाम्यया = हेतौ तृतीया।

वशिष्ठस्य = शेषे षष्ठी।

गुरोः = शेषे षष्ठी।

प्रयतौ = प्रकर्षेण यतौ (प्रादि तत्पुरुषसमासः)।

दम्पती = जाया च पतिश्च (द्वन्द्वसमासः)।

३६) स्यन्दनम् = स्यन्दते इति स्यन्द् + युच्।

आस्थितौ = आ - स्था + क्त (कर्तरि)।

प्रावृषेण्यम् = प्र - वृष् + क्विप् = प्रावृट्, प्रावृष + एन्यः = प्रावृषेण्यः, तम्।

पयोवाहम् = पयस - वह् + अन्।

विद्युत् = वि - द्युत् + क्विप्।

स्यन्दनम् = कर्मणि द्वितीया।

पयोवाहम् = पयांसि वहति यः तम् (उपपदतत्पुरुषः)।

विद्युदैरावतौ = विद्युच्च ऐरावतश्च (द्वन्द्वसमासः)।

३७) अभूत् = भू + लङ् द।

अनुभावविशेषात् = हेतौ पञ्चमी।

आश्रमपीडा = आश्रमस्य पीडा (षष्ठी तत्पुरुषसमासः)।

अनुभावविशेषात् = अनुभावस्य विशेषः (षष्ठी तत्पुरुषसमासः) तस्मात्। अनुगतः भावः = अनुभावः (प्रादि तत्पुरुषसमासः)।

सेनापरिवृतौ = सेनया परिवृतौ (तृतीया तत्पुरुषसमासः)।

३८) सेव्यमानौ = सेव् + शानच् कर्मणि।

वातैः = अनुक्ते कर्तरि तृतीया।

सुखस्पर्शैः = सुखः स्पर्शः येषां तैः (बहुव्रीहिसमासः)।

शालनिर्य्यासगन्धिभिः = शालानां निर्य्यासः (षष्ठी तत्पुरुषसमासः), तस्य गन्धः (षष्ठी तत्पुरुषसमासः), शालनिर्य्यासगन्धः विद्यते येषां तैः (बहुव्रीहिसमासः)।

पुष्परेणूत्किरैः = पुष्पाणां रेणवः (षष्ठी तत्पुरुषसमासः) तेषाम् उत्किराः (षष्ठी तत्पुरुषसमासः), तैः।

आधूतवनराजिभिः = आधूताः वनराजयः यैस्तैः (बहुव्रीहिसमासः)।

३९) अभिरामः = अभि - रम् + घञ्।

शृण्वन्तौ = श्रु + शतृ, प्रथमा द्विवचनम्।

भिन्नाः = भिद् + क्त, स्त्रीलिङ्गम् प्रथमा बहुवचनम्।

षड्जः = षट् + जन् + ड।

शिखण्डिभिः = अनुक्ते कर्तरि तृतीया।

मनोभिरामाः = मनसः अभिरामाः (षष्ठी तत्पुरुषसमासः)।

रथनेमिस्वनोन्मुखैः = रथस्य नेमी (षष्ठी तत्पुरुषसमासः), तयोः स्वनः (षष्ठी तत्पुरुषसमासः), उत् (उन्नमितम्) मुखं येषां ते उन्मुखाः (बहुव्रीहिसमासः), रथनेमिस्वनेन उन्मुखाः (तृतीया तत्पुरुषसमासः)।

षड्जसंवादिनीः = षड्जं संवादितुं शीलं यासां ताः (बहुव्रीहिसमासः)।

४०) पश्यन्तौ = दृश् + शतृ, प्रथमा द्विवचनम्।

मृगद्वन्द्वेषु = अधिकरणे सप्तमी।

परस्पराक्षिसादृश्यम् = अक्ष्मोः सादृश्यम् (षष्ठी तत्पुरुषसमासः), परस्परम् अक्षिसादृश्यम् (कर्मधारयसमासः)।

अदूरोज्झितवर्त्मसु = न दूरम् (नञ् तत्पुरुषसमासः), अदूरं यथा तथा उज्झितं वर्त्म यैस्ताषु (बहुव्रीहिसमासः) तेषु।

स्यन्दनावद्धदृष्टिसु = स्यन्दने आवद्धा दृष्टिर्येषां (बहुव्रीहिसमासः) तेषु।

४१) वितन्वद्भिः = तर् (विस्तारे) + शतृ, तृतीया बहुवचनम्।

निह्रादः = निर् - ह्राद् + घञ्।

उन्नमितः = उत् - नम् + क्त।

श्रेणीबन्ध्यात् = हेतौ पञ्चमी।

सारसैः = करणे तृतीया।

श्रेणीबन्ध्यात् = श्रेण्या बन्धः (तृतीया तत्पुरुषसमासः) तस्मात्।

अस्तम्भाम् = न विद्यते स्तम्भः यस्याः सा (बहुव्रीहिसमासः), ताम्।

कलनिर्ह्रादैः = कलः निर्ह्रादः येषां तैः (बहुव्रीहिसमासः)।

उन्नमिताननौ = उन्नमिते आनने ययोः (बहुव्रीहिसमासः) तौ।

४२) पवनः = पुनातीति पू + युच्।

पवनस्य = शेषे षष्ठी।

अनुकूलत्वात् = हेतौ पञ्चमी।

रजोभिः = अनुक्ते कर्तरि तृतीया।

प्रार्थनासिद्धिशंसिनः = प्रार्थनायाः सिद्धिः (षष्ठी तत्पुरुषसमासः) तां शंसितुं शीलमस्य इति (उपपदतत्पुरुषसमासः)।

तुरगोत्कीर्णैः = तुरगैः उत्कीर्णाः (तृतीया तत्पुरुषसमासः) तैः।

अस्पृष्टालकवेष्टनौ = अलकाश्च वेष्टनञ्च (द्वन्द्वसमासः), न स्पृष्टानि (नञ्तत्पुरुषः) अस्पृष्टानि अलकवेष्टनानि ययोः तौ (बहुव्रीहिसमासः)।

४३) आमोदम् = आ - मुद् + णिच् + अच्।

उपजिघ्रन्तौ = उप - घ्रा + शतृ। प्रथमा द्विवचनम्।

सरसीषु = अधिकरणे सप्तमी।

आमोदम् = कर्मणि द्वितीया।

अरविन्दानाम् = शेषे षष्ठी।

वीचिविक्षोभशीतलम् = वीचीनां विक्षोभः (षष्ठी तत्पुरुषसमासः), तेन शीतलम् (तृतीया तत्पुरुषसमासः)।

स्वनिश्वासानुकारिनम् = स्वस्य निःश्वासः (षष्ठी तत्पुरुषसमासः)। तम् अनुकरोति सः तम् (उपपदतत्पुरुषसमासः)। स्वनिःश्वासः = अनु - कृ + णिनि, द्वितीया एकवचनम्।

४४) प्रतिगृह्णन्तौ = प्रति - ग्रह् + शतृ + प्रथमा द्विवचनम्।

आशिषः = आ - शास् + क्विप्।

ग्रामेषु = अधिकरणे सप्तमी।

यज्वनाम् = कर्तरि षष्ठी।

आशिषः = कर्मणि द्वितीया।

आत्मविसृष्टेषु = आत्मना विसृष्टः (तृतीया तत्पुरुषसमासः) तेषु।

यूपचिह्नेषु = यूपा एव चिह्नानि येषां तेषु (बहुव्रीहिसमासः)।

अमोघाः = न मोघाः (नञ्तत्पुरुषः)।

अर्घ्यानुपदम् = पदस्य पश्चात् इति अनुपदम् (अव्ययीभावसमासः), अर्घस्य अनुपदम् (षष्ठी तत्पुरुषसमासः)।

४५) आदाय = आ - दा + ल्यप्।

उपस्थितान् = उप - स्था + क्त (कर्तरि)।

पृच्छन्तौ = प्रच्छ् + शतृ प्रथमा द्विवचनम्।

वन्यानाम् = वने भव इति वन् + यत्, षष्ठी बहुवचनम्।

घोषवृद्धान् = घोषेसु वृद्धाः (सप्तमी तत्पुरुषसमासः) तान्।

मार्गशाखिनाम् = शाखाः सन्ति एषामिति शाखा + इनि = शाखिन् मार्गस्थिताः शाखिनः (शाकपार्थिवादिवत् कर्मधारयसमासः) तेषाम्।

४६) अभिख्या = अभि - ख्या + अङ्।

व्रजतोः = व्रज् + शतृ षष्ठी द्विवचनम्।

योगे = भावे सप्तमी।

चित्राचन्द्रमसोः = शेषे षष्ठी।

शुद्धवेषयोः = शुद्धः वेषः ययोः (बहुव्रीहिसमासः) तयोः।

हिमनिर्मुक्तयोः = हिमेन निर्मुक्तौ (तृतीया तत्पुरुषसमासः) तयोः।

चित्राचन्द्रमसोः = चित्रं च चन्द्रमाश्च इति चित्राचन्द्रमसौ (द्वन्द्वसमासः) तयोः।

४७) दर्शयन् = दृश् + णिच् + शतृ प्रथमा एकवचनम्।

लङ्घितम् = सङ्घ् + क्त।

बुबुधे = बुध् + लिट् ए।

अध्वानम् = कर्मणि द्वितीया।

भूमिपतिः = भूम्याः पतिः (षष्ठी तत्पुरुषसमासः)।

प्रियदर्शनः = प्रियं दर्शनं यस्य सः (बहुव्रीहिसमासः)।

बुधोपमः = बुधः उपमा यस्य सः (बहुव्रीहिसमासः)।

४८) प्रापत् = प्र - आप् + लुङ् द्।

आश्रमः = आ - श्रम् + घञ् (अधिकरणे सप्तमी)।

आश्रमम् = शेषे षष्ठी।

महर्षेः = शेषे षष्ठी।

दुष्प्रापयशा: = दुखेन प्राप्तुं शक्यं यश: यस्य असौ (तत्पुरुषसमास:)।
श्रान्तवाहन: = श्रान्तानि वाहनानि यस्य स: (बहुव्रीहिसमास:)।
महर्षे: = महान् च असौ ऋषिश्च (कर्मधारयसमास:), तस्य।

४.४ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

এতিয়া আপুনি 'ৰঘুবংশম্' মহাকাব্যৰ প্ৰথম সৰ্গৰ নং শ্লোকৰ পৰা নং শ্লোকৰ বিষয়বস্তুৰ আভাস পাব। ৰজা দিলীপৰ মগধবংশত জন্মা দাক্ষিণ্যাদি গুণবিশিষ্টা সুদক্ষিণা নামেৰে পত্নী আছিল (নং শ্লোক)। অনেক পত্নী থকা সত্ত্বেও ৰাজলক্ষ্মী আৰু সুদক্ষিণাৰ দ্বাৰাহে ৰজাই নিজকে প্ৰকৃত ভাগ্যাৱান্ বুলি গণ্য কৰিছিল (নং শ্লোক)। পুত্ৰ সন্তান প্ৰাপ্তিত বিফল মনোৰথেৰে তেওঁ দিন নিয়াইছিল। (নং শ্লোক)। বিধি অনুযায়ী কৰ্মানুষ্ঠানৰ বাবে তেওঁ (ৰজা দিলীপে) ৰাজ্যসভাৰ মন্ত্ৰীসকলৰ ওপৰত ন্যস্ত কৰিলে (নং শ্লোক)। তাৰ পিছত ৰজা দিলীপ আৰু সুদক্ষিণাই কুলগুৰু বশিষ্ঠৰ আশ্ৰমলৈ যাত্ৰা কৰিলে। (নং শ্লোক)। দুয়ো একেখন ৰথত উঠি বৰ্ষাকালীন বিদ্যুৎ আৰু মেঘৰ দৰে শোভাপ্ৰাপ্ত হৈ যাবলৈ ধৰিলে (নং শ্লোক)। আশ্ৰমৰ শান্তিভঙ্গ নহওক বুলিয়েই অত্যন্ত সীমিত অনুচৰেৰে সৈতে তেওঁলোকে গমন কৰিলে (নং শ্লোক)। সুবাসিত, মৃদু আৰু সুখস্পৰ্শী বায়ুয়ে যাত্ৰা প্ৰীতিদায়ক কৰিলে (নং শ্লোক)। যাত্ৰাপথত ময়ূৰৰ ষড়জস্বৰৰ অনুৰূপ কেকাৰৰ শুনিবলৈ পালে (নং শ্লোক)। পথৰ কাষত ৰৈ ৰথৰফালে চাই থকা হৰিণযুগলত ৰজা-ৰাণীয়ে নিজৰ চকুৰ সাদৃশ্য দেখিবলৈ পালে (নং শ্লোক)। মধুৰ কলৰৱ কৰি আকাশেৰে শাৰীপাতি উৰি যোৱা সাৰস পক্ষীৰ জাকক দুয়ো মূৰ তুলি চালে (নং শ্লোক)। অনুকূল বায়ু প্ৰৰাহিত হোৱা সত্ত্বেও ৰজা-ৰাণীক কুন্তল আৰু বেষ্টন ধূলিয়ে স্পৰ্শ কৰিব নোৱাৰিলে (নং শ্লোক)। সৰোবৰসমূহৰ তৰঙ্গস্পৰ্শত শীতল হোৱা পদ্মগন্ধীবায়ু তেওঁলোক দুয়োৰেই আঘ্ৰাণ কৰিলে (নং শ্লোক)। নিজেই দান কৰা যূপচিহ্নৰে চিহ্নিত কৰা গাঁওবোৰত যাজকসকলে অৰ্ঘ্যগ্ৰহণৰ পিছতে প্ৰদান কৰা অব্যৰ্থ আশীৰ্বাদ গ্ৰহণ কৰিলে (নং শ্লোক)। সদ্য প্ৰস্তুত ঘিউ লৈ উপস্থিত হোৱা গোপবৃদ্ধসকলক পথৰ কাষৰ বৃক্ষসমূহৰ নামবোৰ সুধি আগবাঢ়িব ধৰিলে (নং শ্লোক)। হিমমুক্ত চন্দ্ৰ আৰু চিত্ৰাৰ দৰেই শুদ্ধবেশে গমন কৰা দুয়োয়ে এক অপূৰ্ব শোভাধাৰণ কৰিছিল (নং শ্লোক)। বুধসদৃশ ৰজা দিলীপে সুদক্ষিণাক ইটো সিটো দেখুৱাওতে কিমান পথ অতিক্ৰম কৰিলে গমেই নাপালে (নং শ্লোক)। যশস্বী ৰজা দিলীপে ক্লান্ত ঘোঁৰা আৰু মহিষীৰে সৈতে সন্ধ্যা সময়ত মহৰ্ষি বশিষ্ঠৰ আশ্ৰমত উপস্থিত হ'ল (নং শ্লোক)।

४.५ प्रथमसर्गस्य एकत्रिंशत्तमश्लोकत: अष्टचत्वारिंशत्तमश्लोकं (३१-४८) यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च

इदानीं भवन्त: प्रथमसर्गस्य एकत्रिंशत्तमश्लोकत अष्टचत्वारिंशत्तमश्लोकं (३१-४८ यावत्

कतिपयाणां महत्वपूर्णानां श्लोकानां व्याख्या भावार्थश्च पठितुं शक्नुवन्ति।

१) हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।

राजा दिलीपः राज्ञी सुदक्षिणा च शुद्धचित्तयुक्तपूर्वकं तथा पवित्रवेशं परिधानं कृत्वा एकस्मिन् रथे एव वशिष्ठाश्रमं प्रति गच्छतः स्म। एकस्मिन् एव रथे गम्यमानं राजदम्पतीं चित्रनक्षत्र-चन्द्राभ्यां सह उपमीयते। शिशिरऋतोः पश्चात् चैत्रपूर्णिमायां चित्रानक्षत्रेण सह चन्द्रमा अतीव शोभनीया दृश्यते। तथैव पवित्रवेशपूर्वकं वशिष्ठाश्रमं प्रति गम्यमानो राजा दिलीपो राज्ञी सुदक्षिणा च दर्शने अतीव मनोरमा आसीत्। अनया उपमया कविना अयमेव अवबोध्यते यत् रथे सुदीर्घ यात्रापथम् अतिक्राम्यापि राजा राज्ञी च दर्शने अत्यन्तं सुन्दरम् आस्ताम्।

श्लोकेऽस्मिन् उपमालङ्कारस्य तथा अनुष्टुप् छन्दसः प्रयोगो दृश्यते।

२) प्रावृषेण्यं पयोवाहं विद्युदैरावताविव॥

सन्तानप्राप्तेः उपायहेतुः राजा दिलीपो राज्ञी सुदक्षिणा च वशिष्ठमुने आश्रमं प्रति गतवन्तौ। तस्यां यात्रायां राजा दिलीपो राज्ञी सुदक्षिणा च यस्मिन् रथे आरोहणं कृत्वा वशिष्ठमुने आश्रमं प्रति गच्छन्तौ स्तः, तस्य रथस्य ध्वनिः श्रवणमधुरं गम्भीरञ्च आसीत्। तं रथं कविना मेघेन सह उपमीयते। वर्षाकाले मेघो यथा गम्भीरदर्शनयुक्तः स्निग्धशक्तियुक्तश्च वर्तते तथैव दिलीप-सुदक्षिणयोः च आरोह्यमानस्य रथस्य ध्वनिः गम्भीरपूर्णा वर्तते। रथे आरोह्यमानं दिलीपम् ऐरावतेन सह तथा च विद्युतं सुदक्षिणया सह उपमीयते। साधारणत 'ऐरावतः' इति शब्देन इन्द्रस्य गजो बोध्यते। परन्तु, अत्र ऐरावतः इति शब्दस्याभिप्रायं 'मेघः' इति। वर्षाकाले मेघे विद्युत् यथा शोभां धारयति तथैव रथे राजा दिलीपो राज्ञी सुदक्षिणा च आरोहणवशात् रथस्य शोभा बृद्धिः जाता। पुनश्च रथस्य मधुरध्वनिवशात् सुदक्षिणा-दिलीपयोः यात्रा अपि मनोरमा वर्तते।

शलोकेऽस्मिन् उपमालङ्कारस्य प्रयोगो दृश्यते छन्दस्तु अनुष्टुप्।

3) मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखंडिभिः॥

श्लोकोऽयं महाकविकालिदासस्य 'रघुवंशम्' इति महाकाव्यस्य प्रथमे सर्गे प्राप्यते। महाकविकालिदासेन पद्येऽस्मिन् सुदक्षिणा-दिलीपयोः वशिष्ठमुने आश्रमं प्रति गमनसमये मार्गस्य प्राकृतिकसौन्दर्यं कीदृशं मनोरमयुक्तमासीत् तस्य वर्णनं क्रियते।

राजा दिलीपो राज्ञी सुदक्षिणा च सन्तानप्राप्ते उपायज्ञानार्थं कुलगुरुवशिष्ठस्य आश्रमं प्रति गच्छतः स्म। तौ यदा आश्रमं प्रति गच्छतः स्म तदा मार्गस्य प्राकृतिकसौन्दर्यम् अतीव मनोरममासीत्। मार्गस्य प्राकृतिकमौन्दर्यं दृष्ट्वा उभौ मुग्धा जाता। एवं गमनसमये तयोः रथस्य मधुरध्वनिं श्रुत्वा मयूरा अपि आनन्दिताः जाताः। मयुराः रथस्य ध्वनिं श्रुत्वा आकाशे मेघस्य गर्जनशब्दरिति चिन्तयन्ति। तस्मात् श्रमवशात् ते (मयूराः) तु आनन्दात् चक्रप्रान्तशब्दोन्नतमुखैः षड्जस्वरसदृशं ध्वनिः कुर्वन्ति स्म। प्राकृतिकसौन्दर्यवर्णने सिद्धो महाकविकालिदासः प्रकृतेः रूप-लावण्यं केन प्रकारेण परिवर्तनं भवति तमेव वर्णयति।

प्रस्तुतेऽस्मिन् पद्ये 'अनुष्टुप्'छन्दसः प्रयोगो दृश्यते।



४.६ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- 'रघुवंशम्' महाकाव्यस्य प्रथमसर्गस्य विषयवस्तु एकांशं ज्ञातवन्तः।
- राज्ञो दिलीपस्य वशिष्ठाश्रमं प्रति गमनमार्गस्य वर्णनं ज्ञातवन्तः।
- निर्दिष्टानां श्लोकानां संस्कृतपाठः, शब्दार्थः, असमीयानुवादादयः ज्ञातवन्तः।
- निर्दिष्टानां श्लोकानां व्याकरणटिप्पणीं ज्ञातवन्तः।



४.७ ज्ञानाधिक्यम्

१) काले, एम. आर. (सम्पा.): रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास पाब्लिछार्च प्राइभेट लिमिटेड।

२) नन्दर्गिकार, गोपाल रघुनाथ (१९८२) (सम्पा.): रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास।

३) शास्त्री, अशोकनाथ & भाञ्जा सरोजनाथ (१९५१) (सम्पा.) कालिदासस्य रघुवंशम्; मडार्ण वुक एजेन्सि।



४.८ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : सुदक्षिणा मगधवंशे जन्मो लभ्यते।

प्रश्नः २ : उत्तरम् : 'कलत्रम्' इति शब्दस्य प्रतिशब्दं 'भार्या' इति।

प्रश्नः ३ : उत्तरम् : 'ऐरावतः' इत्युक्ते 'मेघः'।

प्रश्नः ४ : उत्तरम् : 'यूपः' इत्युक्ते यज्ञस्य पशुबन्धनकाष्ठविशेषः।

प्रश्नः ५ : उत्तरम् : राजा दिलीपः सुदक्षिणया सह आश्रमं प्रति अगच्छत्।



४.९ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

अधौ उल्लिखितानां पदानां व्याकरणटिप्पणी लिखन्तु :

मेने, निनाय, अभिरामः, अभ्यर्च्य, लक्ष्म्या, मनोरथैः, श्रेणीबन्ध्यात्, मंगधवंशजा, अमोघाः, प्रियदर्शनः।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

व्याख्या भावार्थः च लेखनीयः

१) हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।

२) प्रावृषेण्यं पयोवाहं विद्युदैरावताविव॥

३) मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।

षड्जसंवादिनीः केका द्विधा भिन्नाः शिखंडिभिः॥

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः १ : दिलीप-सुदक्षिणयोः वशिष्ठमुने आश्रमं प्रति यात्रामार्गस्य सौन्दर्यविषयकं एकं निबन्धं लिखन्तु।

*** ***** ***

अध्यायः ५ : रघुवंशम् - प्रथमसर्गः, (श्लोकाः ४९-७४)

अध्यायस्य संरचना

५.१ उद्देश्यम्

५.२ परिचयः

५.३ प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् श्लोकानां संस्कृतपाठः

- ५.३.१ श्लोकानाम् अन्वयः
- ५.३.२ श्लोकानां शब्दार्थः
- ५.३.३ श्लोकानाम् असमीयानुवादः
- ५.३.४ व्याकरणटिप्पणी

५.४ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

५.५ प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् कतिपयानां श्लोकानां व्याख्या भावार्थश्च

५.६ अध्यायात् किमवगतम्

५.७ ज्ञानाधिक्यम्

५.८ अग्रगत्याः निरूपणम्

५.९ अभ्यासप्रश्नाः

५.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् विषयम् अवगन्तुं शक्नुवन्ति।
- प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् श्लोकानां संस्कृतपाठ-शब्दार्थ-अनुवादाः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् श्लोकानां व्याकरणटिप्पणयः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् कतिपयानां श्लोकानां व्याख्या भावार्थश्च ज्ञातुं शक्नुवन्ति।

५.२ परिचयः

चतुर्थेऽध्याये भवन्तो 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य एकत्रिंशत्तमश्लोकत अष्टचत्वारिंत्तमश्लोकं (३१-४८) यावत् अध्ययनं कृतवन्तः। तत्र 'रघुवंशम्' इति महाकाव्यस्य

प्रथमसर्गस्य एकत्रिंशत्तमश्लोकतः अष्टचत्वारिंशत्तमश्लोकं (३१-४८) पर्यन्तम् श्लोकानां संस्कृतपाठ -शब्दार्थ-व्याकरणगतटिप्पणी-व्याख्या-भावार्थादीन् पठितवन्तः। अध्यायेऽस्मिन् भवन्तः ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् श्लोकानां संस्कृतपाठ-शब्दार्थ -व्याकरणगतटिप्पणी-व्याख्या-भावार्थादीन् पठितुं शक्नुवन्ति। एतेषां श्लोकानाम् अध्ययनात्परं भवन्तो वशिष्ठमुने आश्रमस्य सौन्दर्यं ज्ञास्यन्ति तथा वशिष्ठमुनिना सह राज्ञो दिलीपस्य कथोपकथनविषये ज्ञातुमर्हन्ति।

५.३ प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९ - ७४) यावत् श्लोकानां संस्कृतपाठः

१) वनान्तरादुपावृत्तैः समित्कुशफलाहरैः।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः।। ४९।।

२) आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः।
अपत्यैरिव नीवारभागधेयोः चितैर्मृगैः ॥ ५०॥

३) सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्।
विश्वासाय विहंगानामालवालाम्बुपायिनाम्।। ५१।।

४) आतपात्ययसंक्षिप्तनीवारासु निषादिभिः।
मृगैर्वर्तितरोमन्थमुटजाङ्गन भूमिषु ॥ ५२॥

५) अभ्युत्थिताग्नि पिशुनैरतिथीनाश्रमोन्मुखान्।
पुनानं पवनोद्धूतैर्धूमैराहुति गन्धिभिः ॥ ५३॥

६) अथ यन्तारमादिश्य धुर्यान् विश्रामयेति सः।
तामवारोहयत् पत्नीं रथादवततारं च ॥ ५४॥

७) तस्मै सभ्याः सभार्याय गोप्त्रे गुप्तमेन्द्रियाः।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ ५५।।

८) विधेः सायन्तनस्यान्ते न ददर्श तपोनिधिम्।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥ ५६।।

९) तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः।। ५७।।

१०) तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम्।
प्रपच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥ ५८॥

११) अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः॥ ५९।।

१२) उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे।
दैवानां मानुषीणां च प्रतिहर्ता त्वमापदाम्।। ६०॥

१३) तव मन्त्रकृतो मन्त्रैदूरात्प्रशमितारिभिः।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ ६१।।

१४) हविरावर्जित होतस्त्वया विधिवदग्निषु।
वृष्टिर्भवति सत्यानामवग्रहविशोषिणाम् ॥ ६२।।

१५) पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥ ६३।।

१६) त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ ६४।।

१७) किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम्।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६५।।

१८) नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।
न प्रकामभुजः श्राद्धे स्वधासंग्रह तत्पराः ॥ ६६।।

१९) मत्परं दुर्लभं मत्वा नूनमावर्जितं मया।
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते।। ६७।।

२०) सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥ ६८॥

२१) लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे।। ६९।।

२२) तया हीनं विधातर्मां कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥ ७०॥

२३) असह्यपीडं भगवन्! ऋणमन्त्यमवेहि मे।
अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः।। ७१॥

२४) तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः।। ७२।।

२५) इति विज्ञापितो राज्ञा ध्यानास्तिमितलोचनः।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥ ७३॥

२६) सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणम्।
भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत्।। ७४॥

५.३.१ श्लोकानाम् अन्वयः

१) वनान्तरात् उपावृतैः समित्कुशफलाहरैः अदृश्याग्नि प्रत्युद्यातैः तपस्विभिः पूर्यमाणम् आश्रमं प्रापत्।

२) नीवारभाग धेयोचितैरुटजद्वाररोधिभिः मृगैः ऋषिपत्नीनाम् अपत्यैः इव आकीर्णम्।

३) सेकान्ते मुनिकन्याभिः आलवालाम्बुपायिनाम् विहङ्गानाम् विश्वासाय तत्क्षणोज्झितवृक्षकम्।

४) आतपात्ययसंक्षिप्तनीवरासु उटजाङ्गनभूमिषु निषादिभिः मृगैः वर्तितरोमन्थम्।

५) अभ्युत्थिताग्निपिशुनैः पवनोद्धूतैः आहुति गन्धिभिः धूमैः आश्रमोन्मुखान् अतिथीन् पुनानम्।

६) अथ सः यन्तारं धुर्यान् विश्रामय इति आदिश्य तां पत्नीं रथात् अवारोहयत् अवततार च।

७) सभ्याः गुप्ततमेन्द्रियाः मुनयः सभार्याय गोप्ते नयचक्षुषे अर्हते तस्मै अर्हणाम् चक्रुः।

८) सः सायन्तनस्य विधेः अन्ते अरुन्धत्या अन्वासितम् तपोनिधिम् स्वाहया हविर्भुजम् इव ददर्श।

९) मागधी राज्ञी राजा च तयोः पादान् जगृहतुः गुरुपत्नी गुरुश्च तौ प्रीत्या प्रतिननन्दतुः।

१०) मुनिः आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् राज्याश्रममुनिम् तम् राज्ये कुशलम् प्रपच्छ।

११) अथ विजितारिपुरः वदतां वरः अर्थपतिः अथर्वनिधेः तस्य पुरः अर्थ्यां वाचम् आददे।

१२) सप्तसु अङ्गेषु मे शिवम् उपपन्नं ननु यस्य दैवीनां मानुषीणां च आपदां त्वं प्रतिहर्ता।

१३) दूरात् प्रशमितारिभिः मन्त्रकृतः तव मन्त्रैः दृष्टलक्ष्यभिदः मे शरा प्रत्यादिश्यन्ते इव।

१४) हे होतः त्वया विधिवत् अग्निषु आवर्जितम् हविः अवग्रहविशोषिणाम् सस्यानाम् वृष्टिः भवति।

१५) मदीयाः प्रजाः पुरुषायुषजीवन्यः निरातङ्काः निरीतयः यत् तस्य त्वद्ब्रह्मवर्चसम् हेतुः।

१६) ब्रह्मयोनिना गुरुणा त्वया एवम् चिन्त्यमानस्य निरापदः मे सम्पदः सानुबन्धाः कथम् न स्युः।

१७) किन्तु तव एतस्यां वध्वाम् अदृष्टसदृशप्रजं मां सद्वीपा अपि रत्नसः मेदिनीं न अवति।

१८) मत्तः परम् पिण्ड विच्छेददर्शिनः वंश्याः स्वधासंग्रतत्पराः श्राद्धे प्रकामभुजः नूनम् न।

१९) मत् परम् दुर्लभम् मत्वा मया आवर्जितम् पयः पूर्वैः स्वनिश्वासैः कवोष्णम् उपभुज्यते नूनम्।

२०) इज्याविशुद्धात्मा प्रजालोपनिमीलितः सः अहम् लोकाऽलोकः अचलः इव प्रकाशः च अप्रकाशः च अस्मि।

२१) तपोदानसमुद्भवम् पुण्यं लोकान्तरसुखं शुद्धवंश्या सन्ततिः हि इह परत्र च शर्मणे।

२२) हे विधातः तया हीनं मां स्नेहात् स्वयं सिक्तम् बन्ध्यम् आश्रमवृक्षकम् इव पश्यन् कथम् न दूयसे।

२३) हे भगवन्! मे अन्त्यम् ऋणम् अनिर्वाणस्य दन्तिनः अरुन्तुदम् आलानम् इव असह्यपीडम् अवेहि।

२४) हे तात् तस्मात् तथा मुच्ये तथा संविधातुम् अर्हसि हि इक्ष्वाकूणाम् दुरापे अर्थे सिद्धयः त्वदधीनाः।

२५) इति राज्ञा विज्ञापितः ऋषिः ध्यानस्तिमितलोचनः क्षणमात्रं सुप्तमीनः इव ह्रदः तस्थौ।

२६) सः प्रणिधानेन भावितात्मा भुवः भर्तुः सन्ततेः स्तम्भकारणम् अपश्यत् अथ एनम् प्रत्यबोधयत्।

५.३.२ श्लोकानां शब्दार्थः

१) वनान्तरात् = अस्मात् वनात्, उपावृतैः = प्रत्यागतः, समित्कुशफलाहरैः = यज्ञीयकाष्ठानि दर्भाश्च आम्रादिफलानि आहरैः, अदृश्याग्निप्रत्युद्यातैः = न दृश्यमानैः अग्नैः स्वागतकरणार्थं तत्परः, तपस्विभिः = मुनिभिः, पूर्यमाणम् = व्याप्तम्, प्रापत् = आश्रमं लब्धवान्।

२) नीवारभागधेयोचितैः = तृणधान्यानाम् अंशग्रहणे अभ्यस्ताः, उटजद्वाररोधिभिः = पर्णशालानां द्वाररोधकैः, मृगैः = हरिणैः, ऋषिपत्नीनाम् = मुनीनां भार्यानाम्, अपत्यैः इव = पुत्रैः इव, आकीर्णम् = व्याप्तम्।

३) सेकान्ते = तरुमूलसेचनस्य अवसाने, मुनिकन्याभिः = तापससुताभिः, आलवालाम्बुपायिनाम् = जला धारप्रदेशस्य जलपायिनाम्, विहङ्गानाम् = पक्षिणाम्, विश्वासाय = विश्वासजनयितुम्, तत्क्षणोज्झितवृक्षकम् = तस्मिन्नेववासरे ह्रस्ववृक्षाः त्यक्ता।

४) आतपात्ययसंक्षिप्तनीवरासु = आतपस्य अपगमे राशीकृताः तृणधान्येषु, उटजाङ्गनभूमिषु = पर्णशालानाम् अङ्गनभूमिषु, निषादिभिः = उपविष्टैः, मृगैः = हरिणैः, वर्तितरोमन्थम् = चर्वितचर्वनं निष्पादितम्।

५) अभ्युत्थिताग्निपिशुनैः = प्रज्वलिताहोमाग्निज्ञापकैः, पवनोद्धूतैः = वायुकम्पितैः, आहुतिगन्धिभिः = आहुतेः गन्धयुक्तेन, धूमैः = धूमराशिना, आश्रमोन्मुखान् = आश्रमसमागतान्, अतिथीन् = अभ्यागतान्, पुनानम् = पवित्रीकुर्वानम्।

६) अथ = आश्रमप्राप्यानन्तरम्, सः = दिलीपः, यन्तारम् = सारथिम्, धुर्यान् विश्रामय = रथाश्वान् विनीतश्रमान् कुरु, इति आदिश्य = इत्थम् आज्ञाप्य, ताम् = पूर्वोक्ताम्, पत्नीम् = भार्याम्, रथात् = स्यन्दनात्, अवारोहयत् = अवतारितवान्, अवततार

च = स्वयमपि अवारुरोह।

७) सभ्याः = सज्जनाः, गुप्ततमेन्द्रियाः = अत्यन्त-नियमितेन्द्रियाः, मुनयः = ऋषयः, सभार्याय = सपत्नै, गोप्ते = रक्षकाय, नयचक्षुषे = नीतिचक्षुसम्पन्ने, अर्हते = पूज्याय, तस्मै = दिलीपाय, सुदक्षिणासहिताय, अर्हणाम् = पूजाम्, चक्रुः = अकुर्वन्।

८) सः = दिलीपः, सायन्तनस्य = सायंकालिनस्य, विधेः = अनुष्ठानस्य, अन्ते = अवसाने, अरुन्धत्या = तन्नामा स्वपत्न्या, अन्वासितम् = उपासितम्, तपोनिधिम् = तपसाम् आकरम् अर्थात् वशिष्ठम्, स्वाहया = स्वाहादेव्या, हविर्भुजम् = वह्निः, इव = यथा, ददर्श = अपश्यत्।

९) मागधी = मगधराजपुत्री, राज्ञी = महषी सुदक्षिणा, राजा = नृपः, तयोः = अरुन्धती-वशिष्ठयोः, पादान् = चरणान्, जगृहतुः = पस्पृशतुः, गुरुपत्नी = वशिष्ठस्य भार्या अरुन्धती, गुरुश्च = वशिष्ठः च, तौ = सुदक्षिणा-दिलीपौ, प्रीत्या = हर्षेण, प्रतिननन्दतुः = आशीर्वचनादिभिः सम्भावयाञ्चतुः।

१०) मुनिः = वशिष्ठः, आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् = अभ्यागथसत्कारकर्मणा रथसञ्चालनस्य खेदः दूरीकृतम्, राज्याश्रममुनिम् = मुनितुल्यम्, तम् = राजानम्, कुशलम् = क्षेमम्, प्रपच्छ = अपृच्छत्।

११) अथ = कुशलप्रश्नान्तरम्, विजितारिपुरः = विजितशत्रुनगरम्, वदताम् = वक्तृनाम्, वरः = श्रेष्ठः, अर्थपतिः = राजा, अथर्वनिधेः = अथर्ववेदस्य आकारस्य, तस्य = वसिष्ठस्य, पुरः = अग्रे, अर्थ्याम् = अर्थयुक्ताम्, वाचम् = वाणीम्, आददे = वक्तुम् उपक्रान्तवान्।

१२) सप्तसु = सप्तसंख्यकेषु, अङ्गेषु = स्वाम्यमात्यादिषु राज्याङ्गेषु, मे = मम, शिवम् = कुशलम्, उपपन्नम् = युक्तम्, ननु = निश्चितम्, यस्य = दिलीपस्य, दैवीनाम् = देवेभ्यः आगतानां दुर्भिक्षादीनाम्, मानुषीणाम् = मनुष्येभ्यः आगतानां चौर्यादीनाम्, च आपदाम् = आपत्तीनाम्, त्वम् = वसिष्ठः, प्रतिहर्ता = वारयिता, निवारकः।

१३) दूरात् = परोक्ष एव, प्रशमितारिभिः = प्रकर्षेणशमितैः अरिभिः, मन्त्रकृतः = मन्त्राणां द्रष्टुः प्रयोक्तुः वा, तव = वशिष्ठस्य, मन्त्रैः = जप्यैः, मे = मम दिलीपस्य, शरा = वाणाः, प्रत्यादिश्यन्ते इव = निराक्रियन्ते।

१४) हे होतः = हे अग्निहोत्रिन्, त्वया = वसिष्ठेन, विधिवत् = यथाशास्त्रम्, अग्निषु = वह्निषु, आवर्जितम् = प्रक्षिप्तम्, हविः = हवनीयं द्रव्यम्, अवग्रहविशोषिणाम् = वृष्टिविघातेन विशुष्यताम्, सस्यानाम् = धान्यानाम्, वृष्टिः = वर्षणम्, भवति = जायते।

१५) मदीयाः = दिलीपस्य, प्रजाः = जनाः, पुरुषायुषजीवन्यः = वर्षशतम्, निरातङ्काः = निर्भयाः, निरीतयः = अतिवृष्ट्यादि ईतिरहिताः, तस्य = सर्वस्य, त्वद्ब्रह्मवर्चसम्

= व्रताध्ययन-सम्पत्तिरेव, हेतुः = कारणम् अस्ति।

१६) ब्रह्मयोनिना = ब्रह्मपुत्रेण, गुरुणा = आचार्येण, त्वया = वशिष्ठेन, एवम् = इत्थम्, चिन्त्यमानस्य = अनुध्यायमानस्य, निरापदः = विपत्तिरहितः, मे = मम, सम्पदः = सम्पत्तयः, सानुबन्धाः = अविच्छन्नाः, कथम् = केन प्रकारेण, न स्युः = नैव भवेयुः।

१७) किन्तु = परन्तु, तव = वसिष्ठस्य, एतस्याम् = अमुष्याम्, वध्वाम् = स्नुषायाम्, अदृष्टसदृशप्रजम् = आत्मानुरूपं सन्तानं न दृष्टत्वात् , माम् = दिलीपम्, सद्वीपा = द्वीपसमन्विताः, अपि रत्नसः = रत्नप्रदायिनी, मेदिनी = पृथिवी, न अवति = नैव प्रीणाति।

१८) मत्तः परम् = तदनन्तरम्, पिण्डविच्छेददर्शिनः = पिण्डदानविच्छेदम् उत्प्रेक्षमानाः, वंश्याः = वंशोद्भवा पितरः, स्वधासंग्रतत्पराः = पितृभोज्यसंग्रहने आसक्ताः, श्राद्धे = पितृकर्मणि, प्रकामभुजः = पर्याप्तभोजिनः, नूनम् न = सत्यम्।

१९) मत् परम् = मदनन्तरम्, दुर्लभम् = दुष्प्राप्यम्, मत्वा = ज्ञात्वा, मया = दिलीपेन, आवर्जितम् = दत्तम्, पयः = जलम्, पूर्वैः = पूर्वजैः, स्वनिश्वासैः = आत्मनः निःश्वासैः, कवोष्णम् = इषत् उष्णम्, उपभुज्यते = पीयते, नूनम् = निश्चयेन।

२०) इज्याविशुद्धात्मा = यागेन विशुद्धचेतनः, प्रजालोपनिमीलितः = सन्तत्यभावेन अप्रकाशितः अर्थात् विषन्नः, सः अहम् = दिलीपः, लोकाऽलोकः अचलः = लोकालोकः पर्वतः, इव = यथा, प्रकाशः च अप्रकाशः च = पितृऋणविमोचनाभावात्, तथा अस्मि।

२१) तपोदानसमुद्भवम् = तपस्यादानादितः उद्भूतम्, पुण्यम् = सुकृतम्, लोकान्तरसुखम् = परलोके सुखकरम्, शुद्धवंश्या = पवित्रकुलजन्मा, सन्ततिः = प्रजाः, हि = यतः, इह = अस्मिन् लोके, परत्र = परलोके, शर्मणे = सुखाय।

२२) हे विधातः = हे स्रष्टा, तया = सन्तत्या, हीनम् = रहितम्, माम् = दिलीपम्, स्नेहात् = प्रेम्ना, स्वयम् = आत्मना, सिक्तम् = जलसेकेन वर्धितम्, बन्ध्यम् = निष्फलम्, आश्रमवृक्षकम् = आश्रमस्य वृक्षकम्, इव = यथा, पश्यन् = अवलोकयन्, कथम् = केन प्रकारेण, न = न हि , दूयसे = परितप्यसे।

२३) हे भगवन्! = हे ईश्वरः, मे = मम, अन्त्यम् ऋणम् = पैतृकऋणम्, अनिर्वाणस्य = मज्जनरहितस्य, दन्तिनः = गजस्य, अरुन्तुदम् = मर्मस्पर्शिनम्, आलानम् = गजबन्धनस्तम्भम्, इव = यथा, असह्यपीडम् = दुःसहदुःखजनकम्, अवेहि = विद्धि।

२४) हे तात् = हे पितः, तस्मात् = पैतृकऋणात्, तथा = येन प्रकारेण, मुच्ये = मुक्तो भवामि, तथा = तेन प्रकारेण, संविधातुम् = कर्तुम्, अर्हसि = भवामि, इक्ष्वाकूणाम् = इक्ष्वाकु-कुलोत्पन्नानाम् नृपाणाम्, दुरापे = दुष्प्राप्ये, अर्थे = प्रयोजने, सिद्धयः

= कार्यसाफल्यानि, त्वदधीनाः = वसिष्ठस्य अधीनाः।

२५) इति राज्ञा = एवम् नृपेण, विज्ञापितः = निवेदितः, ऋषिः = मुनिः वसिष्ठः, ध्यानस्तिमितलोचनः = ध्यानेन निश्चलाक्षः मनः, क्षणमात्रम् = क्षणरूपाकालविशेषपर्यन्तम्, सुप्तमीनः = निद्रियुक्तो मत्स्यः, इव = यथा, ह्रदः = सरोवरः, तस्थौ = स्थितवान्।

२६) सः = महर्षिः वशिष्ठः, प्रणिधानेन = समाधिना, भावितात्मा = शुद्धान्तःकरणः, भुवः = भूमेः, भर्तुः = स्वामिनः, सन्ततेः = सन्तानस्य, स्तम्भकारणम् = प्रतिबन्धकारणम्, अपश्यत् = अवलोकयत्, अथ = अनन्तरम्, एनम् = अमुम्, प्रत्यबोधयत् = ज्ञापितवान्।



ज्ञातव्यम्

५३ तमः श्लोकः : अतिथिः = धर्मशास्त्रकारेण मनुना अतिथेः लक्षणम् एवं प्रकारेण प्रदीयते -

'एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्या हि स्थितिमस्मात् तस्मादतिथिरुच्यते।।'

५६ तमः श्लोकः : स्वाहा = वह्निपत्न्याः नाम 'स्वाहा' इति। यज्ञे अग्नौ आहुतिप्रदानसमये 'स्वाहा' इति शब्दस्य उच्चारणं करोति।

६० तमः श्लोकः : सप्ताङ्गानि = राज्यस्य सप्ताङ्गानि भवन्ति। धर्मशास्त्रकारस्य मनोः मतानुसारं राज्यस्य सप्ताङ्गानि यथा - स्वामी अथवा राजा, अमात्यः, पुर अथवा दुर्गः, राष्ट्रम्, राजकोशः, दण्डः, मित्रं चेति।

स्वाम्यमात्यपुरं राष्ट्रं कोशदण्डौ तथा सुहृत्।
सप्तैतानि समप्तानि लोकेऽस्मिन् राज्यमुच्यते।।

आपदाम् = आपदां प्रकारद्वयं यथा - दैवी मानुषी च। अग्नि-जल-व्याधि-दुर्भिक्ष-मरणादिहेतुः या विपद् उत्पद्यते सा दैवी इति कथ्यते। पुनश्च मन्त्री-चौर-शत्रु-राजप्रिय-लोभादिहेतुः या विपद् उत्पद्यते सा मानुषी विपद् इति कथ्यते। कामन्दकनीतिशास्त्रे प्राप्यते यथा -

हुताशनो जलं व्याधिदुर्भिक्षं मरणं तथा।
इति पञ्चविधं दैवं मानुषं व्यसनं ततः।।
आयुक्तकेभ्यश्चौरेभ्यः परेभ्यः राजवल्लभात्।
पृथिवीपतिलोभाच्च नराणां पञ्चधा मतम्।।

६३ तमः श्लोकः : निरीतयः = ईतिरर्थात् विघ्नहीनः। ईतिरित्यस्य षड् विभागाः विद्यन्ते। ते यथा - अतिवृष्टिः, अनावृष्टिः, शलभा, मूषिकाः, खगाः, प्रत्यासन्नाश्च राजानः चेति। कामन्दकीयनीतिसारे प्राप्यते यथा -

'अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥'

६५ तमः श्लोकः : सद्वीपा = द्वीपयुक्ता, पुराणेषु अष्टादशद्वीपाणाम् उल्लेखः प्राप्यते। पृथिवीं सप्तद्वीपा अपि उच्यते। ते सप्तद्वीपाः यथा- जम्बुः, प्लक्षः, शाल्मलिः, कुशः, क्रौञ्चः, शाकः पुष्करश्च।

मेदिनी = मधु-कैटभमेताभ्यां पृथिवी निर्मिता जाता। तस्मात् पृथिव्या अपरं नाम मेदिनी इति। यथोक्तम् -

'मधुकैटभयोरासीन्मेदसैव परिप्लुता।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः॥'

६६ तमः श्लोकः : स्वधा = पितृभोज्यकः 'स्वधा' इति उच्यते।

७१ तमः श्लोकः : अन्त्यम् ऋणम् = मनुष्याणां जन्ममात्रमेव ऋणत्रयं वर्तते। तानि ऋणानि यथा - देव-ऋणम्, ऋषि-ऋणम्, पितृ-ऋणम् च। यज्ञसम्पादनेन प्रथमम् ऋणं सम्पद्यते, विद्याभ्यासेन द्वितीयम् ऋणं सम्पद्यते, पुनश्च पुत्रजन्मना अन्तिमम् ऋणम् अर्थात् पितृ-ऋणं सम्पद्यते। अतो विष्णुधर्मोत्तरपुराणे उच्यते यथा -

श्राद्धेन प्रजया चैव पितृणामनृणो भवेत्।
ऋषीणां ब्रह्मचर्येण श्रुतेन तपसा तथा।।

५.३.३ श्लोकानाम् असमीयानुवादः

এতিয়া আপুনি শ্লোকসমূহৰ অসমীয়া অনুবাদ পঢ়িবলৈ পাব।

সমিধ, কুশবন আৰু ফলমূল সংগ্ৰহ কৰি অন্য বনৰ পৰা ঘুৰি অহা আৰু অদৃশ্যভাৱে আশ্ৰমৰ যজ্ঞীয় অগ্নিয়ে স্বাগত কৰা তপস্বীসকলে পৰিপূৰ্ণ কৰি তোলা আশ্ৰমত তেওঁলোক গৈ উপস্থিত হ'লগৈ।

পৰ্ণকুটীৰৰ প্ৰৱেশ পথত বাধা দি নীবাৰ ধানৰ অংশগ্ৰহণত অভ্যস্ত আৰু ঋষি পত্নীসকলৰ সন্তানতুল্য মৃগবিলাকে পূৰ্ণ কৰি তোলা আশ্ৰমত তেওঁলোক উপস্থিত হ'ল।

আলবানত জলপান কৰা চৰাইবিলাকৰ বিশ্বাস জন্মাৱলৈ মুনিকন্যাসকলে গছপুলিবিলাকত পানী দি তৎক্ষণাৎ আঁতৰি গৈছিল।

ৰ'দ নোহোৱাৰ বাবে সীবাৰ ধানবোৰ দমাই থোৱা পৰ্ণকুটীৰৰ চোতালবোৰত বহি হৰিণবোৰে ঘাঁহ পাগুলি আছিল।

প্ৰজ্জ্বলিত হোমাগ্নিৰ জ্ঞাপক, আহুতি গন্ধমিশ্ৰিত বায়ুচালিত সেই ধোৱাই আশ্ৰমৰ অতিথিসকলক পবিত্ৰ কৰিছিল।

ইয়াৰ পিছত 'ঘোঁৱাকেইটাক জিৰণি দিয়া'- এইবুলি সাৰথিক আদেশ দি তেওঁ পত্নীক ৰথৰ পৰা নমালে আৰু নিজেও নামিল।

) সজ্জন আৰু জিতেন্দ্রিয় মুনিসকলে লোকপালক, পূজনীয় আৰু নয়দৃষ্টিসম্পন্ন ৰজাক পত্নীৰে সৈতে অভ্যর্থনা জনালে।

) সান্ধ্যবিধি সমাপ্তিৰ পিছত তেওঁ (দিলীপে) স্বাহাৰ সৈতে থকা অগ্নিৰ দৰে অৰুন্ধতীৰ সৈতে বহি থকা বশিষ্ঠক দেখিৰলৈ পালে।

) ৰজা আৰু মগধৰাজপুত্রী ৰাজ্ঞীয়ে (সুদক্ষিণাই) দুয়োৰে চৰণ স্পর্শ কৰিলে আৰু গুৰু আৰু গুৰুপত্নীয়ে আনন্দেৰে তেওঁলোক দুয়োকে অভিনন্দন জনালে।

) অতিথিসৎকাৰৰ দ্বাৰা তেওঁলোকৰ ৰথযাত্রাৰ ভাগৰ দূৰ হোৱাত সেই ৰাজর্ষিক (দিলীপক) ৰাজ্যৰ কুশলবার্তা সুধিলে।

) তাৰ পিছত শত্রুৰাজ্য বিজেতা, বা অগ্নিশ্রেষ্ঠ ৰজাই অথর্ববেদত পাৰদর্শী সেই ঋষিৰ সন্মুখত অর্থপূর্ণ কথা ক'বলৈ ধৰিলে।

) আপুনি যিহেতু মোৰ দৈৱিক আৰু মানুষিক আপদসমূহৰ নিবাৰণ কৰোঁতা, (মোৰ ৰাজ্যৰ) সাঁতোটা অঙ্গতেই কল্যাণ বিৰাজমান।

) মন্ত্রকর্তা আপোনাৰ শত্রুবিনাশক মন্ত্রসমূহৰ দ্বাৰা দূৰৰ পৰাই মোৰ প্রত্যক্ষ লক্ষ্যভেদী শৰসমূহ যেন নিৰাকৃত হৈছে।

) হে হোতা, আপুনি যথাবিধি অগ্নিত যি আহুতি প্রদান কৰে সেয়াই অনাবৃষ্টিত শুকাই যোৱা শস্যৰ বাবে বৃষ্টিস্বৰূপ হয়।

) মোৰ প্রজাবৃন্দই শতবর্ষ পৰিমিত মনুষ্য জীৱন লাভ কৰি নিৰাতঙ্ক আৰু উপদ্রবহীন হৈ বাস কৰিছে, আপোনাৰ ব্রহ্মতেজেই তাৰ কাৰণ।

) ব্রহ্মাৰ পুত্র আপোনাৰ দৰে গুৰুৱে এনেদৰে যাৰ মঙ্গল চিন্তা কৰে সেই মোৰ সম্পদ নিৰাপদ আৰু অবিচ্ছিন্ন নহ'ব কিয়?

) কিন্তু আপোনাৰ এই বধূৰ পৰা অনুৰূপ পুত্রসন্তান লাভ নকৰাত দ্বীপযুক্তা ৰত্নপ্রসূতা পৃথিৱীয়েও মোক তৃপ্ত কৰিব পৰা নাই।

) মোৰ (মৃত্যুৰ) পিছত পিণ্ডলোপৰ আশঙ্কা দেখি নিশ্চয় পিতৃ পুৰুষসকলে পিতৃভোজ্য সঞ্চয় কৰাত তৎপৰ হৈ মই অর্পণ কৰা শ্রাদ্ধত পর্যাপ্ত আহাৰ গ্রহণ কৰা নাই।

) মোৰ পিছত দুর্লভ হ'ব বুলি ভাবি মই দিয়া তর্পণোদক পূর্বপুৰুষসকলে নিজৰেই দীর্ঘশ্বাসেৰে কিছু উষ্ণ কৰি যেন পান কৰিছে।

) যজ্ঞাদি সম্পাদনৰ দ্বাৰা পৰিত্রাত্মা অথচ বংশলোপৰ আশঙ্কাত বিষণ্ণ মই লোকালোক পর্বতৰ নিচিনাকৈ কেতিয়াবা প্রকাশবান আৰু কেতিয়াবা অপ্রকাশবান হৈ ৰৈছোঁ।

) তপস্যা, দান আদিৰ পৰা আর্জিত পুণ্য কেৱল পৰলোকত সুখৰ কাৰণ হয়। কিন্তু পবিত্র বংশোদ্ভূত সন্তান ইহলোক আৰু পৰলোক উভয়ৰে সুখৰ কাৰণ হয়।

- হে বিধাতা, স্নেহবশতঃ নিজেই পানী দি বৰ্দ্ধন কৰা ফলহীন আশ্রমৰ গছৰ নিচিনা মোক সন্তানহীন দেখি আপোনাৰ বাৰু দুখ নহয়নে?
- হে ভগবান। স্নান নকৰা হাতীৰ বন্ধনস্তম্ভ যিদৰে পীড়াদায়ক, মোৰ বাবে পিতৃঋণো দুঃসহ হৈছে বুলি আপুনি জানিব।
- হে তাত, যাতে মই তাৰ পৰা (পিতৃঋণৰ পৰা) মুক্ত হ'ব পাৰোঁ, তেনে কৰাৰ বাবে আপুনিয়ে যোগ্য ব্যক্তি। কাৰণ ইক্ষাকুবংশীয়সকলৰ দুষ্প্রাপ্য বিষয়ত সিদ্ধিলাভ আপোনাৰেই অধীন।
- ৰজাই এনেদৰে সকলো কথা জনোৱাত ক্ষন্তেক সময় ঋষিয়ে চকুমুদি ধ্যান কৰি শুই পৰা মাছযুক্ত হ্রদৰ নিচিনাকৈ অৱস্থান কৰিলে।
- বিশুদ্ধাত্মা সেই ঋষিয়ে চিত্তৰ একাগ্রতাৰে পৃথিৱীপতিৰ সন্তানহীনতাৰ কাৰণ প্রত্যক্ষ কৰিলে। তাৰ পিছত তেওঁক (দিলীপক) জনালে।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: 'नयचक्षु' इति शब्देन क अवबोध्यते ?

.....

प्रश्नः २: अरुन्धत्या सह काम् उपमीयते ?

.....

प्रश्नः ३: 'हविर्भूजः' इत्युक्ते किम् ?

.....

प्रश्नः ४: अथर्वनिधिः कः ?

.....

प्रश्नः ५: 'मेदिनी' इति शब्देन किम् अवबोध्यते ?

.....

५.३.४ व्याकरणटिप्पणी

४९) उपावृत्तैः = उप - आ - वृत् + क्त (तृतीया बहुवचनम्)।
पूर्यमानम् = पूर् + शानच् (कर्मणि)।
वनान्तरात् = अपादाने पञ्चमी।
तपस्विभिः = अनुक्ते कर्तरि तृतीया।
समित्कुशफलाहरैः = समिधश्च कुशश्च फलानि च (द्वन्द्वसमासः)।
अदृश्या = न दृश्या (नञ्तत्पुरुषः)।

५०) आकीर्णम् = आ - कृ + क्त।
ऋषिपत्नीनाम् = शेषे षष्ठी।

मृगैः = अनुक्ते कर्तरि तृतीया।

उटजद्वाररोधिभिः = उटन द्वाराणि रोद्धुं शीलं येषां ते (बहुव्रीहिसमासः)।

५१) विश्वमाय = वि - श्वस् + घञ् चतुर्थी विभक्तिः।

सेकान्ते = भावे सप्तमी।

विहङ्गानाम् = शेषे षष्ठी।

मुनिकन्याभिः - मुनीनां कन्याभिः (षष्ठीतत्पुरुषसमासः)।

तत्क्षणोज्झितवृक्षकम् - तत्क्षणे उज्झिताः वृक्षकाः यत्र सः तम् (बहुव्रीहिसमासः)।

५२) मृगैः = अनुक्ते कर्तरि तृतीया।

उटजाङ्गनाभूमिषु = अधिकरणे सप्तमी।

वर्तितरोमन्थाम् = वर्तितः रोमन्थः यस्मिन् तम् (बहुव्रीहिसमासः)।

उटजाङ्गनाभूमिषु = उटजानाम् अङ्गन भूमयः तासु (बहुव्रीहिसमासः)।

५३) अभ्युत्थितः = अभि - उत् - स्था + क्त।

पूनानम् = पू + शानच् द्वितीया एकवचनम्।

अतिथीन् = कर्मणि द्वितीया।

धूमैः = करणे तृतीया।

अभ्युत्थिताग्निपिशुनैः = अभ्युत्थिताः अग्नयः (कर्मधारयसमासः), तेषां पिशुनाः (षष्ठीतत्पुरुषः), तैः।

अतिथीन् = अविद्यमानः तिथिः येषां तान् (बहुव्रीहिसमासः)।

पवनोद्धूतैः = पवनस्य उद्धूतैः (षष्ठी तत्पुरुषसमासः)।

आश्रमोन्मुखान् = उद्गतं मुखं यस्य स उन्मुखः (बहुव्रीहिसमासः), आश्रमस्य उन्मुखाः (षष्ठीतत्पुरुषः) तान्।

५४) यन्तारम् = यम् + तृच्, द्वितीया एकवचनम्।

आदिश्य = आ - दिश् + ल्यप्।

विश्राम = वि - श्रम् + णिच् + लोट् हि।

अवरोहयत् = अव् - रुह् + णिच् + लङ् द।

यन्तारम् = कर्मणि द्वितीया।

धुर्यान् = कर्मणि द्वितीया।

रथात् = अपादाने पञ्चमी।

५५) गोप्ते = गुप् + तृण्, चतुर्थी विभक्तिः।

अर्हते = अर्ह + शतृ, चतुर्थी एकवचनम्।

अर्हणाम् = कर्मणि द्वितीया।

सभार्याय = भार्यया सह वर्तमानः (बहुव्रीहिसमासः) तस्मै।

नयचक्षुषे = नय एव चक्षुः यस्य तस्मै (बहुव्रीहिसमासः)।

५६) विधेः = वि - धा + कि, षष्ठी एकवचनम्।

ददर्श = दृश् + लिट् प्रथमपुरुषः एकवचनम्।

निधिः = नि - धा + किः।

अन्वासितम् = अनु - आस् + क्त कर्मणि।

विधेः = शेषे षष्ठी।

अन्ते = भावे सप्तमी।

तपोनिधिम् = कर्मणि द्वितीया।

अरुन्धत्या = अनुक्ते कर्तरि तृतीया।

तपोनिधिम् = तपसां निधिः (षष्ठी तत्पुरुषसमासः), तम्।

सायन्तनस्य = सायं भवः सायन्तनः तस्य (बहुव्रीहिसमासः)।

५७) जगृहतुः = ग्रह् + लिट् अतुस्।

प्रतिननन्दतुः = प्रति - नन्द् + लिट् अतुस्।

तयोः = शेषे षष्ठी।

तौ = कर्मणि द्वितीया।

गुरुपत्नी = गुरोः पत्नी (षष्ठी तत्पुरुषसमासः)।

५८) प्रपच्छ = प्रच्छ् + लिट् णल्।

राज्ये = अधिकरणे सप्तमी।

आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् = आतिथ्यक्रियया शान्तः रथक्षोभ परिश्रमः यस्य सः (बहुव्रीहिसमासः)।

राज्याश्रममुनिम् = राज्यमेव आश्रयः (रूपककर्मधारयः) तत्र मुनिः (सप्तमी तत्पुरुषसमासः) तम्।

५९) आददे = आ - दा + लिट् ए।

वदताम् = वद् + शतृ, षष्ठी बहुवचनम्।

तस्य = शेषे षष्ठी।

वाचम् = कर्मणि द्वितीया।

अथर्वनिधेः = अथर्वणः निधिः (षष्ठी तत्पुरुषसमासः) तस्य।

विजितारिपुरः = विजितानि अरिपुराणानि येन सः (बहुव्रीहिसमासः)।

अर्थपतिः = अर्थस्य पतिः (षष्ठी तत्पुरुषसमासः)।

६०) उपपन्नम् = उपपद् + क्त + कर्तरि।

प्रतिहर्ता = प्रति + हृ + तृच्।

आपदाम् = आ - पद् + क्विप्, तासाम्।

सप्तसु - अङ्गेषु = अधिकरणे सप्तमी।

६१) प्रत्यादिश्यन्ते = प्रति - आ दिश् + लट् अन्ते (कर्मणि)।

मन्त्रकृतः = शेषे षष्ठी।

मन्त्रैः = अनुक्ते कर्तरि तृतीया।

शराः = उक्ते कर्मणि प्रथमा।

प्रशमितारिभिः = प्रशमिता अरयः यैः तैः (बहुव्रीहिसमासः)।

६२) आवर्जितम् = आ - वृज् + णिच् क्त (कर्मणि)।

शस्यानाम् = शस् + यत्, षष्ठी बहुवचनम्।

होतः = सम्बोधने प्रथमा।

त्वया = अनुक्ते कर्तरि तृतीया।

अग्निषु = अधिकरणे सप्तमी।

शस्यानाम् = शेषे षष्ठी।

अवग्रहविशोषिणाम् = अवग्रहेण विशोषितम् एषाम् (बहुव्रीहिसमासः)।

६३) प्रजाः = प्र - जन् + ड, प्रथमा बहुवचनम्।

तस्य = शेषे षष्ठी।

पुरुषायुषः = पुरुषस्य आयुः (षष्ठी तत्पुरुषसमासः)।

निरातङ्काः = निरस्तः आतङ्कः यासाम् ताः (बहुव्रीहिसमासः)।

निरीतयः = निरस्ताः ईतयः याभ्यः ताः (बहुव्रीहिसमासः)।

६४) चिन्त्यमानस्य = चिन्त् + शानच् (कर्मणि) तस्य।

स्युः = अस् + लिङ् उस्।

सम्पदः = सम् - पद् + क्विप्, प्रथमा बहुवचनम्।

ब्रह्मयोनिना = ब्रह्मा योनिः यस्य सः तेन (बहुव्रीहिसमासः)।

निरापदः = निर्गता आपदः यस्मात् (बहुव्रीहिसमासः)।

सानुबन्धाः = अनुबन्धेन सह वर्तमानाः याः ताः (बहुव्रीहिसमासः)।

६५) अवति = अव् + लट् ति।

एतस्याम् = एतद् + सप्तमी एकवचनम्।

वध्वाम् = अधिकरणे सप्तमी।

अदृष्टसदृशभ्रजम् = न दृष्टा अदृष्टा (नञ्तत्पुरुषः) अदृष्टासदृशी प्रजा येन सः (बहुव्रीहिसमासः) तम्।

सद्वीपा = द्वीपैः सहिता (अव्ययीभावः समासः)।

६६) वंश्याः = वंशे भवाः इति वंशः + यत्।

श्राद्धे = कालाधिकरणे सप्तमी।

स्वधासंग्रहतत्पराः = स्वधायाः संग्रहे तत्परा (षष्ठी तत्पुरुषसमासः)।

६७) मत्वा = मन् + क्त्वाच्।

आवर्जितम् = आ - वृज् + णिच् + क्त (कर्मणि)।

उपभूज्यते = उप - भूज् + लट् ते (कर्मणि)।

पयः = उक्ते कर्मणि प्रथमा।

पूर्वैः = अनुक्ते कर्तरि तृतीया।

स्वनिश्वासैः = करणे तृतीया।

स्वनिश्वासैः = स्वस्य निःश्वासाः तैः (बहुव्रीहिसमासः)।

दुर्लभम् = दुःखेन लभ्यते यत् तत् (बहुव्रीहिसमासः)।

कवोष्णम् = ईषत् उष्णम् (कर्मधारयसमासः)।

६८) निमीलितः = नि - मील् + क्त।

प्रकाशः = प्र - काश् + घञ्।

लोकः = लोक + घञ्।

इज्याविशुद्धात्मा = इज्यया विशुद्धः आत्मा यस्य सः (बहुव्रीहिसमासः)।

अप्रकाशः = न प्रकाशः (नञ्तत्पुरुषः)।

लोकालोकः = लोकश्चासौ अलोकश्चेति (कर्मधारयसमासः)।

अचलः = न चलति यः सः (उपपदतत्पुरुषः)।

६९) सन्ततिः = सन्तन्यते इति सम् - तन् + क्तिन्।

लोकान्तरसुखम् = अन्यः लोकः (नित्यसमासः) तस्मिन् सुखम् (सप्तमी तत्पुरुषसमासः)।

तपोदानसमुद्भवम् = तपोदानेन समुद्भवं यस्य तत् (बहुव्रीहिसमासः)।

७०) हीनम् = हा + क्त, द्वितीया बहुवचनम्।

विधातः = वि - धा + तृच् (सम्बोधनम्)।

पश्यन् = दृश् + शतृ, पुंलिङ्गम्, प्रथमा एकवचनम्।

दूयसे = दू + लट् से।

सिक्तम् = सिञ्च् + क्त।

वन्ध्यम् = वन्ध् + यत्।

तया = करणे तृतीया।

स्नेहात् = हेतौ पञ्चमी।

आश्रमवृक्षकम् = आश्रमस्य वृक्षकम् (षष्ठी तत्पुरुषसमासः)।

७१) अन्त्यम् = अन्ते भव इति अन्त + यत् ।

अवेहि = अव् - इ + लोट् हि।

भगवन् = सम्बोधने प्रथमा।

दन्तिनः = शेषे षष्ठी।

असह्यपीडम् = असह्या पीडा यस्य तम् (बहुव्रीहिसमासः)।

असह्य = न सह्य (नञ्तत्पुरुषः)।

अनिर्वाणस्य = न निर्वाणम् (नञ्तत्पुरुषः) तस्य।

७२) संविधातुम् = सम - वि - धा + तुमुन्।

अर्हसि = अर्ह + लट् सि।

सिद्धयः = सिध् + क्तिन् , प्रथमा बहुवचनम्।

तस्मात् = अपादाने पञ्चमी।

अर्थे = अधिकरणे सप्तमी।

सिद्धयः = प्रातिपदिकार्थे प्रथमा।

त्वदधीनाः = तव अधीनाः (षष्ठी तत्पुरुषसमासः)।

७३) विज्ञापितः = वि - ज्ञा + णिच् + क्त।

तस्थौ = स्था + लिट् णल्।

ध्यानस्तिमितलोचनः = ध्यानेन स्तिमिते लोचने यस्य सः (बहुव्रीहिसमासः)।

सुप्तमीनः = सुप्ताः मीनाः यस्मिन् सः (बहुव्रीहिसमासः)।

७४) अपश्यत् = दृश् + लङ् द्।

प्रणिधानेन = प्र - नि - धा + ल्युट्, तेन।

सन्ततेः = सम् - तन् + क्तिन् , षष्ठी एकवचनम्।

भर्तुः = भृ + तृच्, षष्ठी एकवचनम्।

प्रत्यबोधयत् = प्रति - बुध् + णिच् + लङ् द।

प्रणिधानेन = करणे तृतीया।

सन्ततेः = शेषे षष्ठी।

भर्तुः = शेषे षष्ठी।

भावितात्मा = भावितः आत्मा यस्य सः (बहुव्रीहिसमासः)।

स्तम्भकारणम् = स्तम्भस्य कारणम् (षष्ठी तत्पुरुषसमासः)।

५.४ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

যাত্ৰাৰ অন্তত ৰজা দিলীপ আৰু সুদক্ষিণা সন্ধ্যা কালত বশিষ্ঠ মুনিৰ আশ্ৰমত উপস্থিত হ'ল (৭৩ নং শ্লোক)। কুটীৰৰ দ্বাৰ অৱ ৰোধ কৰি নীবাৰ ধান খোৱাত অভ্যস্ত ঋষিপত্নীসকৰ সন্তানতুল্য হৰিণবিলাকেৰে আশ্ৰম পৰিপূৰ্ণ হৈ আছিল (নং শ্লোক)। গছৰ গুৰিৰ জলাধাৰত পানী খাবলৈ অহা চৰাইবোৰৰ ভয় আঁতৰাবলৈ মুনিকন্যাসকলে গছপুলিবোৰত পানী দি লৰালৰিকৈ আঁতৰি গৈছিল (নং শ্লোক)। ৰ'দ আঁতৰাৰ পাছত নীবাৰ ধান দমাই থোৱা কুটীৰৰ চোতালত হৰিণবিলাকে ঘাঁহ পাগুলি আছিল (নং শ্লোক)। আশ্ৰমৰ ধোঁৱা দেখি হোমাগ্নিৰ উমান পোৱা গৈছিল আৰু সেই ধোঁৱাৰে আশ্ৰমৰ অতিথিসকলক পবিত্ৰ কৰিছিল (নং শ্লোক)। তাৰ পিছত 'ঘোঁৱাকেইটাক জিৰণি দিয়া' এইদৰে সাৰথিক আদেশ দি ৰজাই পত্নীক ৰথৰ পৰা

অৱতৰণ কৰাই নিজেও নামিলে (নং শ্লোক)। আশ্রমবাসী জিতেন্দ্রিয় মুনিসকলে নয়দৃষ্টিসম্পন্ন, লোক পালক আৰু পূজনীয় ৰজাক পত্নীৰে সৈতে অভ্যর্থনা জনালে ☯ নং শ্লোক)। সান্ধ্যবিধি সমাপ্তিৰ পিছত অগ্নিৰ লগত অৱস্থান কৰা স্বাহাৰ দৰে, সেই তপস্বী বশিষ্ঠক পত্নী অৰুন্ধতীৰ লগত একেলগে দর্শন কৰিলে (নং শ্লোক)। ৰজা আৰু মগধৰাজকন্যা সুদক্ষিণাই তেওঁলোকৰ চৰণস্পর্শ কৰাত তেওঁলোকেও ৰজা আৰু ৰাণীক অভিনন্দিত কৰিছিল (নং শ্লোক) ৰথযাত্রাৰ ভাগৰ আতিথ্যৰ ফলত দূৰ হোৱাত মুনিয়ে ৰাজ্যৰূপ আশ্রমৰ ঋষি দিলীপক ৰাজ্যৰ কুশলবার্তা সুধিলে (নং শ্লোক)। তাৰ পিছত বর্তমাৰ ভিতৰত শ্রেষ্ঠ, শত্রুৰাজ্য বিজয়ী↗ সম্পদশালী দিলীপে অথর্ববেদবিদ্ বশিষ্ঠক ক'বলৈ ধৰিলে (নং শ্লোক)। মোৰ দৈবিক আৰু মানুষিক বিপদসমূহৰ নিবাৰণ কর্তা আপোনাৰ বাবেই ৰাজ্যৰ সাতোটা অঙ্গতেই কল্যাণ বিৰাজমান (নং শ্লোক)। মন্ত্রকর্তা আপোনাৰ মন্ত্রেৰে আঁতৰৰ পৰাই শত্রু বিনাশ কৰি মোৰ প্রত্যক্ষ লক্ষ্যভেদী শৰসমূহ নিৰাকৃত কৰিছে (নং শ্লোক)। হে হোতা ! আপুনি বিধিসঙ্গতভাৱে জুইত দিয়া আহুতিয়েই বৰষুণৰ ৰূপত শস্যবিলাকক অনাবৃষ্টিৰ পৰা ৰক্ষা কৰিছে (নং শ্লোক)। আপোনাৰ ব্রহ্মতেজৰ ফলতেই মোৰ প্রজাসকলে নিৰাতঙ্ক আৰু উপদ্রৱহীন হৈ দীর্ঘায়ু লাভ কৰিছে (নং শ্লোক) ব্রহ্মাৰপুত্র আপোনাৰ নিচিনা গুৰুৱে মোৰ শুভচিন্তা কৰিছে বাবেই মই নিৰাপদ আৰু অবিচ্ছিন্ন সম্পদৰ অধিকাৰী (নং শ্লোক)। কিন্তু আপোনাৰ বধু সুদক্ষিণাৰ পৰা আত্মানুৰূপ সন্তানলাভ নোহোৱাৰ বাবেই সদ্বীপা ৰত্নপ্রসবিনী পৃথিৱীয়েও পৰিতৃপ্ত কৰিব পৰা নাই (নং শ্লোক)। মোৰ মৃত্যুৰ পিছত পিণ্ডলোপৰ আশঙ্কাত পিতৃপুৰুষসকলে নিশ্চয় শ্রাদ্ধত দিয়া দ্রব্যৰ কিছু অংশ সংগ্রহত তৎপৰ হৈ শ্রাদ্ধকালত পর্যাপ্ত আহাৰ গ্রহণ কৰা নাই (নং শ্লোক)। মোৰ পিছত দুর্লভ হ'ব বুলি ভাবি মই অর্পণ কৰা তর্পণজল হুমুনিয়াহ কাঢ়ি গ্রহণ কৰা বাবে নিশ্চয় কিছু উষ্ণ হৈ পৰে (নং শ্লোক)। যজ্ঞাদি সম্পাদনৰ দ্বাৰা বিশুদ্ধাত্মা আৰু সন্তানহীনতাৰ বাবে বিষাদগ্রস্ত মই লোকালোক পর্বতৰ দৰেই প্রকাশ্য আৰু অপ্রকাশ্য (নং শ্লোক), তপস্যা আৰু দানে পা�ৰত্রিক সুখ দিয়ে কিন্তু সদ্বংশজাত পুত্রই ইহলোক আৰু পৰলোকত সুখেই দিয়ে (নং শ্লোক)। হে বিধাতা ! আপুনি নিজহাতে পানী দি ডাঙৰ কৰা অপুষ্পকবৃক্ষৰ দৰে মোক সন্তানহীন দেখি আপোনাৰ দুখ নহয়নে (নং শ্লোক)। হে ভগৱান ! মোৰ এই পিতৃঋণ স্নান নকৰা হাতীৰ বন্ধনৰ দৰেই অত্যন্ত পীড়াদায়ক (নং শ্লোক)। হে গুৰুদেৱ, মোক এই ঋণৰ পৰা মুক্ত কৰাৰ উপায়বিধান কৰক কাৰণ ইক্ষাকুকুলৰ দুষ্প্রাপ্য সিদ্ধি আপোনাৰেই অধীন (নং শ্লোক)। ৰজাই এইদৰে জনোৱাত মহর্ষিয়ে চকু মুদি ধ্যানেৰে সকলো মাছ শুই পৰা হ্রদৰ দৰে অৱস্থান কৰিলে (নং শ্লোক)। তপস্যাৰ প্রভাৱত শুদ্ধাত্মা ঋষিয়ে ৰজাৰ সন্তানহীনতাৰ কাৰণ জানিব পাৰি সেইটো তেওঁক জনালে (নং শ্লোক)।

५.५ प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च

इदानीं भवन्तः प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) यावत् कतिपयाणां महत्वपूर्णनां श्लोकानां व्याख्या भावार्थश्च पठितुं शक्नुवन्ति।

१) प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥

राजा दिलीप आसीत् विशुद्धचित्तयुक्तः प्रजानुरञ्जकश्च। सः सदैव प्रजाहिताय एव चिन्तयति। परन्तु, एवं गुणयुक्तः सन् अपि सः पुत्रहीन आसीत्। तस्मात् यद्यपि महाराजा दिलीपो यज्ञानुष्ठानं सम्पाद्य चित्तशुद्धिं कृत्वा पवित्रात्मायुक्तम् आसीत्, तथापि पुत्रहीनहेतुः सर्वदा स्वकीयवंशरक्षाय शंकितम् आसीत्। अतः स्वकीयविद्यावशात् तथा कर्मणो ज्योतिना यद्यपि दिलीप आलोकितमासीत् तथापि पुत्रहीनतायाः अन्धकारेण दिलीपः स्वकीये मानसिकजगति तमसाच्छन्नमासीत्। राज्ञो दिलीपस्य इमम् अवस्थां कविना लोकालोकपर्वतेन सह उपमीयते। पुराणेषु प्राप्तं वर्णनानुसारं लोकालोकः पर्वतः सम्पूर्णां पृथिवीम् आवृत्तं करोति। अस्य पर्वतस्य मध्यभागो ज्योतिष्कस्य ज्योतिना आलोकितः पुनश्च बहिर्भागः तमसाच्छन्नः। अस्य पर्वतस्य सदृशमेव राज्ञो दिलीपस्य हृदयं स्वकीयज्ञानवशात् प्रभायुक्तं तथा तस्य गुणमपि सर्वत्र व्याप्तं वर्तते। परन्तु, पुनः पुत्रहीनतायाः दुःखवशात् तस्य हृदये स्वकीयवंशरक्षायाः विषादयुक्तोऽन्धकारः सर्वदा वर्तते।

श्लोकेऽस्मिन् 'अनुष्टुप्'छन्दसः प्रयोगो वर्तते।

२) क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः॥

राजा दिलीपः शुद्धचित्तयुक्तः ज्ञानवान् च आसीत्। परन्तु सः विभिन्नगुणयुक्तः सन् अपि पुत्रहीन आसीत्। अतः पुत्रप्राप्ताय उपायं ज्ञातुं राजा दिलीपः सुदक्षिणया सह वशिष्ठाश्रमं प्रति गतवान्। आश्रमं प्राप्य राजा दिलीपः गुरुं वशिष्ठं पुत्रप्राप्तार्थम् उपायं पृच्छति। दिलीपस्य जिज्ञासां श्रुत्वा महर्षिः वशिष्ठः किञ्चित् क्षणं ध्यानमग्नोऽभवत्। ध्यानमग्न ऋषिः वशिष्ठो दर्शनेऽतीव शान्तो जायते। तदा ऋषिः वशिष्ठो दर्शने सुप्तमीन इव प्रतिभाति। अर्थात् सहस्राधिकानां मत्स्यानाम् इतस्ततः भ्रमणवशात् सरोवरः प्रायः कम्पमानो दृश्यते, परन्तु मत्स्याः यदा निद्रामग्नाः भवन्ति तदा सरोवर अतीव शान्तो दृश्यते। एवमेव सुप्तमीनवत् वशिष्ठोऽपि दिलीपस्य पुत्रप्राप्तिहेतु उपायं विचिन्त्य चक्षुमुन्मील्य ध्यानमग्नं भवति।

श्लोकेऽस्मिन् 'अनुष्टुप्'छन्दसः प्रयोगो वर्तते।

३) किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम्।

न मामवति सद्वीपा रत्नसूरपि मेदिनी॥

श्लोकोऽयं महाकविकालिदासस्य 'रघुवंशम्' इति महाकाव्यस्य प्रथमे सर्गे प्राप्यते।

पद्येऽस्मिन् राजा दिलीपो वशिष्ठस्य समीपे सन्तानहीनतायाः दुःखं व्यक्तं करोति।

राजा दिलीपः पृथिवीप्रसिद्धं राजा वर्तते। तस्य गुणानां महिमा सर्वत्र विद्यते। सः राजा सर्वगुणसम्पन्नः सन् अपि सन्तानहीन आसीत्। सन्तानप्राप्ते उपायज्ञानार्थं राजा दिलीपः पत्न्या

सुदक्षिणया सह वशिष्ठमुनेः समीपं गतवान्। वशिष्ठमुने आश्रमं प्राप्य राजा दिलीपः गुरुवशिष्ठस्य तेजस्य प्रशंसां कृत्वा स्वीयमानसिकावस्थां वर्णयति। राज्ञो दिलीपस्य राज्ये सर्वत्र सुखपूर्णं वर्तते तथा तत्र सर्वाः सुविधा अपि वर्तन्ते। दिलीपस्य समीपे तु सप्तद्वीपयुक्तां रत्नपूर्णां सम्पूर्णां पृथिवीं वर्तते। तथापि पुत्रप्राप्ते अभाववशात् सम्पूर्णा पृथिवी अपि तं दिलीपं सुखप्रदातुम् असमर्थोऽस्ति। यतोहि स्वस्य सन्तानः स्वीयवंशस्य उत्तरोत्तरं प्रवाहं रक्षयति। तस्मादेव राजा दिलीपः सुदक्षिणायाः पुत्रप्राप्ते अभावस्य दुःखवशात् सम्पूर्णायाः पृथिव्या अधिकारी सन् अपि सर्वदा वंशरक्षाया उत्तरपुरुषस्य अभावम् अनुभूय दुःखपरायण आसीत्।

श्लोकेऽस्मिन् 'अनुष्टुप्' छन्दसः प्रयोगो दृश्यते।



५.६ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- 'रघुवंशम्' महाकाव्यस्य प्रथमसर्गस्य विषयवस्तु एकांशं ज्ञातवन्तः।
- महर्षेः वशिष्ठस्य आश्रमस्य वर्णनं पठितवन्तः।
- वशिष्ठमुनिना सह राज्ञो दिलीपस्य कथोपकथनं ज्ञातवन्तः।
- निर्दिष्टानां श्लोकानां संस्कृतपाठः, शब्दार्थः, असमीयानुवादादयः ज्ञातवन्तः।
- निर्दिष्टानां श्लोकानां व्याकरणटिप्पणीं ज्ञातवन्तः।



५.७ ज्ञानाधिक्यम्

१) काले, एम. आर. (सम्पा.): रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास पाब्लिछार्च प्राइभेट लिमिटेड।

२) नन्दर्गिकार, गोपाल रघुनाथ (१९८२) (सम्पा.) : रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास।

३) शास्त्री, अशोकनाथ & भाञ्जा सरोजनाथ (१९५१) (सम्पा.) कालिदासस्य रघुवंशम्; मडार्ण वुक एजेन्सि।



५.८ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : 'नयचक्षु' इति शब्देन राजा इति अवबोध्यते।

प्रश्नः २ : उत्तरम् : अरुन्धत्या सह सुदक्षिणाम् उपमीयते।

प्रश्नः ३ : उत्तरम् : 'हविर्भूजः' इत्युक्ते अग्निः।

प्रश्नः ४ : उत्तरम् : अथर्वनिधिः ऋषिः वशिष्ठः।

प्रश्नः ५ : उत्तरम् : 'मेदिनी' इति शब्देन पृथिवी अवबोध्यते।



५.९ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

अधौ उल्लिखितानां पदानां व्याकरणटिप्पणी लिखन्तु :

अभ्युत्थितः, अवरोहयत् , प्रपच्छ , तपस्विभिः, अर्हणाम्, वध्वाम् , नयचक्षुषे, निरीतयः, लोकालोकः, भावितात्मा।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५०-३०० शब्देषु लिखन्तु)।

व्याख्या भावार्थः च लेखनीयः

१) प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥

२) क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः॥

३) किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम्।
न मामवति सद्वीपा रत्नसूरपि मेदिनी॥

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३००-५०० शब्देषु लिखन्तु)।

प्रश्नः १ : महर्षेः वशिष्ठस्य आश्रमस्य सौन्दर्यविषयकम् एकं निबन्धं लिखन्तु।

*** ***** ***

अध्यायः ६ : रघुवंशम् - प्रथमसर्गः (श्लोकाः ७५-९५)

अध्यायस्य संरचना

६.१ उद्देश्यम्

६.२ परिचयः

६.३ प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् श्लोकानां संस्कृतपाठः

- ६.३.१ श्लोकानाम् अन्वयः
- ६.३.२ श्लोकानां शब्दार्थः
- ६.३.३ श्लोकानाम् असमीयानुवादः
- ६.३.४ व्याकरणटिप्पणी

६.४ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

६.५ प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् कतिपयानां श्लोकानां व्याख्या भावार्थश्च

६.६ अध्यायात् किमवगतम्

६.७ ज्ञानाधिक्यम्

६.८ अग्रगत्याः निरूपणम्

६.९ अभ्यासप्रश्नाः

६.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् विषयम् अवगन्तुं शक्नुवन्ति।
- प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् श्लोकानां संस्कृतपाठ-शब्दार्थ-अनुवादाः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् श्लोकानां व्याकरणटिप्पणयः ज्ञातुं शक्नुवन्ति।
- प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च ज्ञातुं शक्नुवन्ति।

६.२ परिचयः

पञ्चमेऽध्याये भवन्तो 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) पर्यन्तम् अध्ययनं कृतवन्तः। तत्र 'रघुवंशम्' इति महाकाव्यस्य

प्रथमसर्गस्य ऊणपञ्चाशत्तमश्लोकतः चतुःसप्ततितममश्लोकं (४९-७४) पर्यन्तम् श्लोकानां संस्कृतपाठ - शब्दार्थ - व्याकरणगतटिप्पणी - व्याख्या - भावार्थादीन् पठितवन्तः। अध्यायेऽस्मिन् भवन्तः पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् श्लोकानां संस्कृतपाठ-शब्दार्थ-व्याकरणगतटिप्पणी-व्याख्या-भावार्थादीन् पठितुं शक्नुवन्ति। एतेषां श्लोकानाम् अध्ययनात्परं भवन्तो वशिष्ठ-दिलीपयोः कथोपकथनम्, राज्ञो दिलीपस्य अपुत्रकतायाः कारणं तथा च कामधेनुनन्दिन्याः विषये ज्ञातुमर्हन्ति।

६.३ प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५ - ९५) यावत् श्लोकानां संस्कृतपाठः

१) पुराशक्रमुपस्थाय तवोर्वीं प्रति यास्यतः।
आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥ ७५ ॥

२) धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन्।
प्रदक्षिणाक्रियार्हायां तस्यां त्वं साधु नाचरः ॥ ७६ ।।

३) अवजानासि मां यस्मादतस्ते न भविष्यति।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा।। ७७ ।।

४) स शापो न त्वयाराजन्न च सारथिना श्रुतः।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ ७८ ।।

५) ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ ७९ ।।

६) हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः।
भुजंगपिहितद्वारं पातालमधितिष्ठति ॥ ८० ॥

७) सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः।
आराधय सपत्नीकः प्रीता कामदुधा हि सा ॥ ८१ ।।

८) इति वादिन एवास्य होतुराहुतिसाधनम्।
अनिन्द्या नन्दिनी नाम धेनुरावव्रते वनात्।। ८२ ।।

९) ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।
विभ्रती श्वेतरोमाङ्कसन्ध्येव शशिनं नवम्।। ८३ ।।

१०) भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि।
प्रस्नवेनाभिवर्षन्ती वत्सालोक प्रवर्तिना।। ८४ ।।

११) रजः कणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात्।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ॥ ८५ ॥

१२) तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ ८६ ।।

१३) अदूरवर्तिनीं सिद्धिं राजन्! विगणयात्मनः।
उपस्थितेयं कल्याणी नाम्नि कीर्तिते एव यत् ॥ ८७॥

१४) वन्य वृत्तिरिमां शश्वदात्मानुगमनेन गाम्।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ ८८॥

१५) प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥ ८९॥

१६) वधूर्भक्तिमती चैनामर्चितामातपोवनात्।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥ ९०॥

१७) इत्या प्रसादादस्यास्त्वं परिचर्यापरो भव।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥ ९१।।

१८) तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः।। ९२।।

१९) अथ प्रदोषे दोषज्ञः संवेशाय विशां पतिम्।
सुनुः सूनृतवाक्स्त्रष्टुर्विससर्जोर्जितश्रियम्।। ९३॥

२०) सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः।
कल्पवित्कल्पयामास वन्यामेवास्य संविधाम्।। ९४।।

२१) निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः।
तच्छिष्याध्ययननिवेदितावसानां,
संविष्टः कुशशयने निशां निनाय ॥ ९५॥

६.३.१ श्लोकानाम् अन्वयः

१) पुरा शक्रम् उपस्थाय उर्वीम् प्रतियास्यतः तव पथि कल्पतरुच्छायाम् आश्रिता सुरभिः आसीत्।

२) ऋतुस्नाताम् इमां राज्ञीम् धर्मलोपभयात् स्मरन् प्रदक्षिणाक्रियार्हायाम् तस्यां त्वं साधु न आचरः।

३) हे राजन्! यस्मात् माम् अवजानासि अतः मत्प्रसूतिम् अनाराध्य ते प्रजा न भविष्यति इति सा त्वां शशाप।

४) हे राजन्! सः शापः त्वया न श्रुतः सारथिना च न उद्याम दिग्गजे आकाशगङ्गायाः स्रोतसि नदति।

५) तदवज्ञानात् आत्मनः ईप्सितम् सार्गलम् विद्धि हि पूज्यपूजाव्यतिक्रमः श्रेय प्रतिबध्नाति।

६) सा च इदानीं दीर्घसत्रस्य प्रचेतसः हविषे भुजङ्गपिहितद्वारम् पातालम् अधितिष्ठति।

७) तदीयाम् सुताम् सुरभेः प्रतिनिधिम् कृत्वा शुचिः सपत्नीकः आराधय हि सा प्रीता कामदुधा।

८) इति वादिनः एव होतुः अस्य आहुति साधनम् नन्दिनी नाम अनिन्द्या धेनुः वनात् आववृते।

९) पल्लवस्निग्धपाटला ललाटोदयम् आभुग्नं श्वेतरोमाङ्क विभ्रती नवं शशिनं सन्ध्या इव।

१०) कोष्णेन अवभृथाद् अपि मेध्येन वत्साऽऽलोक प्रवर्तिना प्रस्नवेन भुवम् अभिवर्षन्ती कुण्डोध्नी।

११) खुरोद्धूतैः अन्तिकात् गात्रम् स्पृशद्भिः रजःकणैः महीक्षितः तीर्थाऽभिषेकजां शुद्धिम् आदधाना।

१२) निमित्तज्ञः तपोनिधिः पुण्यदर्शनाम् तां दृष्ट्वा आशंसिताऽबन्ध्य प्रार्थनम् याज्यम् पुनः अब्रवीत्।

१३) हे राजन्! आत्मनः सिद्धिम् अदूरवर्तिना विगणय, यत् कल्याणी इयं नाम्नि कीर्तिते इव उपस्थिता।

१४) वन्यवृतिः इमां गां शश्वत् आत्मानुगमनेन अभ्यसनेन विद्याम् इव प्रसादयितुम् अर्हसि।

१५) अस्याम् प्रस्थितायाम् प्रतिष्ठेथाः स्थितायाम् स्थितिम् आचरेः निषण्णायाम् निषीद पीताम्भसि अपः पिबेः।

१६) वधूः च भक्तिमती प्रयता अर्चिताम् प्रातः एनाम् आतपोवनात् अन्वेतु सायम् अपि प्रत्युदव्रजेत्।

१७) इति त्वम् आप्रसादात् अस्याः परिचर्यापरो भव ते अविघ्नम् अस्तु पिता इव पुत्रिणां धुरि स्थेया।

१८) देश कालज्ञः प्रीतिमान् शिष्यः सपरिग्रहः आनतः शासितुः आदेशं तथा इति प्रतिजग्राह।

१९) अथ प्रदोषे दोषज्ञः सुनृतवाक् स्रष्टुः सुनुः ऊर्जिताश्रियम् विशाम् पतिम् संवेशाय विससर्ज।

२०) कल्पवित् मुनिः तपः सिद्धौ सत्याम् अपि नियमापेक्षया अस्य वन्याम् एव संविधाम् कल्पयामास।

२१) सः कुलपतिना निर्दिष्टां पर्णशालाम् अध्यास्य प्रयतपरिग्रहद्वितीयः कुशशयने संविष्टः तच्छिष्याध्ययननिवेदिताऽवसानां निशां निनाय।

६.३.२ श्लोकानां शब्दार्थः

१) पुरा = पूर्वम्, शक्रम् = इन्द्रम्, उपस्थाय = संसेव्य, उर्वीम् = पृथिवीम्, प्रतियास्यतः

= उद्दिश्य गमिष्यतः, पथि = मार्गे, कल्पतरुच्छायाम् आश्रिता = कल्पतरुनामकाः देवतरोः छायायाम् उपविष्टा, सुरभिः = कामधेनुः, आसीत् = अभूत्।

२) ऋतुस्नाताम् = ऋतुना निमित्तेन स्नाताम्, इमाम् = पुरोवर्तिणीम्, राज्ञीम् = सुदक्षिणाम्, धर्मलोपभयात् = सुकृतस्य नाशभयात्, स्मरन् = अनुध्यायन्, प्रदक्षिणाक्रियार्हायाम् = प्रदक्षिणकरणयोग्यायाम्, तस्याम् = कामधेन्वाम्, साधु = योग्यः सत्कारः, न आचरः = न कृतवान्।

३) हे राजन् ! यस्मात् = यतः, माम् = कामधेनुम्, अवजानासि = तिरस्करोषि, अतः = अस्मात् कारणात्, मत्प्रसूतिम् = मम सन्ततिम्, अनाराध्य = असेवयित्वा, ते = तव, प्रजा = सन्ततिः, न = न हि, भविष्यति = संपत्स्यते, इति = इत्थम्, सा = कामधेनुः, त्वाम् = दिलीपम्, शशाप = शापं ददौ।

४) हे राजन् = हे महाराज !, शापः = आक्रोशः, त्वया = दिलीपेन, न = न हि, श्रुतः = आकर्णितः, सारथिना = सूतेन, च = तथा, न उद्यामदिग्गजे = उद्दामदिक्करिनां नृत्यन्ते, आकाशगङ्गायाः = आकाशस्थितायाः गङ्गायाः अर्थात् मन्दाकिन्याः, स्रोतसि = प्रवाहे, नदति = शब्दायमाने।

५) तदवज्ञानात् = तस्याः कामधेनोः अपमानात्, आत्मनः = स्वस्य, ईप्सितम् = मनोरथम्, सार्गलम् = प्रतिबन्धयुक्तम्, विद्धि = जानीहि, हि = यतः, पूज्यपूजाव्यतिक्रमः = अर्चितुं योग्यानां पूजाया उलङ्घनम्, श्रेयः = कल्याणम्, प्रतिबध्नाति = रूणद्धि।

६) सा = कामधेनुः, च = तथा, इदानीं = अधुना, दीर्घसत्रस्य = दीर्घकालसाध्य - यागविशेषस्य, प्रचेतसः = वरुणस्य, हविषे = दध्यादिहविरर्थम्, भुजङ्गपिहितद्वारम् = सर्पैः अवरुद्धं प्रवेशद्वारम्, पातालम् = अधोभूवनम्, अधितिष्ठति = अध्यास्ते।

७) तदीयाम् = तस्याः, सुताम् = दुहितरम्, सुरभेः = कामधेनोः, प्रतिनिधिम् = प्रतिच्छायाम्, कृत्वा = विधाय, शुचिः = पवित्रम्, सपत्नीकः = पत्न्या सह, आराधय = सेवस्व, हि = यतः, सा = नन्दिनी, प्रीता = प्रसन्ना, कामदुधा = अभीष्टदायिनी।

८) इति = इत्थम्, वादिनः = वदतः, एव होतुः = हवनशीलस्य, अस्य = मुनेः, आहुति साधनम् = हवनसामग्रीनां कारणम्, नन्दिनी नाम = नन्दिनी इति नाम्ना प्रसिद्धा, अनिन्द्या = अगर्ह्या, धेनुः = नवप्रसूता गौः, वनात् = काननात्, आववृते = प्रत्यागता।

९) पल्लवस्निग्धपाटला = पल्लववत् मसृना श्वेता रक्ता च, ललाटोदयम् = ललाटदेशे जातम्, आभुग्नम् = ईषत्वक्रम्, श्वेतरोमाङ्ग = श्वेतवर्णरोमराजिरूपं चिह्नम्, विभ्रती = धारयन्तीम्, नवम् = नूतनम्, शशिनम् = चन्द्रमसम्, सन्ध्या = सायं कालम्, इव = यथा।

१०) कोष्णेन = किञ्चिदुष्णेण, अवभृथाद् अपि = यज्ञाङ्गभूतस्नानविशेषाद् अपि, मेध्येन = पवित्रेण, वत्साऽऽलोक प्रवर्तिना = वत्सस्य दर्शनेन प्रवहता, प्रस्नवेन = अभिष्यन्दनेन, भुवम् = भूमिम्, अभिवर्षन्ती = सिञ्चन्ती, कुण्डोध्नी = कुण्डमिव स्तनशालिनी।

११) खुरोद्धूतैः = शफै उत्थापितैः, अन्तिकात् = समीपात्, गात्रम् = शरीरम्, स्पृशद्भिः = स्पर्शं कुर्वद्भिः, रजःकणैः = रजसां कणैः, महीक्षितः = राज्ञः, तीर्थाऽभिषेकजां = तीर्थाभिषेकेन जाताम्, शुद्धिम् = पवित्रताम्, आदधाना = कुर्वाणा।

१२) निमित्तज्ञः = शकुनज्ञः शुभाशुभलक्षणज्ञो वा, तपोनिधिः = तपश्चर्यानाम् आकरः, पुण्यदर्शनाम् = पुण्यजनकं साक्षात्कारं यस्याः ताम्, ताम् = नन्दिनीम्, दृष्ट्वा = अवलोक्य, आशंसिताऽबन्ध्यप्रार्थनम् = मनोरथम् अविफलं ज्ञात्वा, याज्यम् = यजमानम्, पुनः = भूयः, अब्रवीत् = उवाच।

१३) हे राजन् ! = हे नृपः, आत्मनः = स्वस्य, सिद्धिम् = मनोरथनिष्पत्तिम्, अदूरवर्तिना = शीघ्रभाविनीम्, विगणय = जानीहि, यत् = यस्मात्, कल्याणी = मङ्गलमूर्तिः, नाम्नि = अभिधाने, कीर्तिते इव = कथिते, उपस्थिता = प्राप्ता।

१४) वन्यवृतिः = अरण्यजातफलादि ग्रहणकारी, इमाम् = पुरोवर्तिनीम्, गाम् = धनुं नन्दिनीम्, शश्वत् = सदा, आत्मानुगमनेन = स्वस्य अनुसरणेन, अभ्यसनेन = अभ्यासेन, विद्याम् = शास्त्रम्, इव = यथा, प्रसादयितुम् अर्हसि = प्रसन्नं कर्तुमर्हसि।

१५) अस्याम् = एतस्यां नन्दिन्याम्, प्रस्थितायाम् = प्रचलितायाम्, प्रतिष्ठेथाः = प्रस्थानं कुरु, स्थितायाम् = गमनात् निवृत्तायाम्, स्थितिम् = गमन-निवृत्तिम्, आचरेः = कुर्याः, निषण्णायाम् = उपविष्टायाम्, निषीद = उपविश, पीताम्भसि = जलपानं कृते, अपः = जलानि, पिबेः = पानं कुरु।

१६) वधूः = स्नुषा, च = अपि, भक्तिमती = श्रद्धाशीला, प्रयता = पवित्रा, अर्चिताम् = पूजिताम्, प्रातः = प्रातःकाले, एनाम् = नन्दिनीम्, आतपोवनात् = तपोवनपर्यन्तम्, अन्वेतु = अनुगच्छतु, सायम् = सन्ध्याकाले, अपि = तथा, प्रत्युदव्रजेत् = प्रत्युद्गच्छेत्।

१७) इति = इत्थम्, त्वम् = दिलीपः, आप्रसादात् = प्रसन्नतापर्यन्तम्, अस्याः = एतस्याः धेनोः, परिचर्यापरः = शुश्रूषापरः, भव = भवेः, ते = तव, अविघ्नम् = विघ्नसागवः, अस्तु = भवतु, पिता इव = जनक इव, पुत्रिणाम् = सत्पुत्रवताम्, धुरि = अग्रे, स्थेया = तिष्ठेः।

१८) देशकालज्ञः = देशकालवित्, प्रीतिमान् = हर्षचित्तः, शिष्यः सपरिग्रहः = सपत्नीकः, आनतः = विनयनम्रः, शासितुः = गुरोः, आदेशम् = आज्ञाम्, तथा इति = तेनैव प्रकारेण, प्रतिजग्राह = स्वीकृतवान्।

१९) अथ = अनन्तरम्, प्रदोषे = रात्रौ, दोषज्ञः = विद्वान्, सुनृतवाक् = सत्यप्रियवाक्,

स्रष्टुः = ब्रह्मादेवस्य, सुनुः = पुत्रः, ऊर्जिताश्रियम् = शोभासम्पन्नम्, विशाम् पतिम् = मनुजेश्वरम्, संवेशाय = निद्रायै, विससर्ज = आज्ञापयामास।

२०) कल्पवित् = व्रतप्रयोगाभिज्ञः, मुनिः = वशिष्ठः, तपः सिद्धौ = तपस्यायाः वलेन प्राप्य, सत्याम् अपि = विद्यमानायामपि, नियमापेक्षया = नियमपालनाय, अस्य = राज्ञः, वन्याम् = अरण्ये भवाम्, संविधाम् = कुशादि-शयनसामग्रीम्, कल्पयामास = रचयामास।

२१) सः = दिलीपः, कुलपतिना = मुनिकुलेश्वरेण, निर्दिष्टाम् = विज्ञापिताम्, पर्णशालाम् = कुटीरम्, अध्यास्य = अधिष्ठाय, प्रयतपरिग्रहद्वितीयः = पवित्रया भार्यया सह, कुशशयने = कुशानां शयने, संविष्टः = शयनं कृत्वा, तच्छिष्याध्ययननिवेदिताऽवसानाम् = वशिष्ठस्य छात्राणां वेदपठनेन सूचितं रात्रेः समाप्तिम्, निशाम् = रात्रिम्, निनाय = यापयामास।



ज्ञातव्यम्

७८ तमः श्लोकः :

आकाशगङ्गा - आकाशे विद्यमाना गङ्गा। आकाशे विद्यमानायाः गङ्गायाः अपरं नाम भवति 'मन्दाकिनी' इति। गङ्गा स्वर्ग-मर्त्य-पातालेषु त्रिषु लोकेषु प्रवाहितास्ति। तस्मादेव गङ्गां 'त्रिपथगा' इत्युच्यते। स्वर्गे गङ्गायाः नाम 'मन्दाकिनी', मर्त्ये 'अलकानन्दा', पाताले 'भोगवती' च अस्ति।

दिग्गजः = अष्टदिशानां पालनकर्तारो भवन्ति अष्टदिग्गजाः। यथा - १) पूर्वदिशि इन्द्रस्य ऐरावतः, २) दक्षिण-पूर्वदिशि अग्नेः पुण्डरीकः, ३) दक्षिणदिशि यमस्य वाहनम्, ४) दक्षिण-पश्चिमदिशि सूर्यस्य कुमुदः, ५) पश्चिमदिशि वरुणस्य अञ्जनम्, ६) उत्तर-पश्चिमदिशि वायोः पुष्पदन्तः, ७) उत्तरदिशि कुबेरस्य सार्वभौमः, ८) उत्तर-पूर्वदिशि सोमस्य सुप्रतीकश्च।

८० तमः श्लोकः

सत्रम् = द्वादशदिनानि अथवा ततोऽधिकानि दिनानि यावत् प्रचलितो यागः सत्रयज्ञ इत्युच्यते। एषः सत्रयागः सहस्रवर्षाणि यावत् प्रचलितानि भवन्ति।

६.३.३ श्लोकानाम् असमीयानुवादः

এতিয়া আপুনি 'ৰঘুবংশম্' মহাকাব্যৰ প্ৰথম সৰ্গৰ শ্লোক (১-৭৯) সমূহৰ অসমীয়া অনুবাদ পঢ়িবলৈ পাব।

১) পূৰ্বতে এদিন দেৱৰাজ ইন্দ্ৰ কাৰ্য সম্পন্ন কৰি তুমি পৃথিৱীলৈ প্ৰত্যাৱৰ্তন কৰোঁতে কামধেনু সুৰভি পথৰ কাষত কল্পতৰুৰ ছায়াত জিৰণি লৈ আছিল।

২) ঋতুস্নাতা এই ৰাজমহিষীক ধৰ্মলোপৰ আশঙ্কাত স্মৰণ কৰি তুমি প্ৰদক্ষিণ আদি

সৎকাৰযোগ্য সেই ধেনুৰ প্ৰতি উচিত আচৰণ নেদেখুৱালা।

- ‘মোক অসন্মান কৰা হেতুকেই মোৰ সন্তানক সেৱা নকৰাকৈ তোমাৰ সন্তান নহ’ব।’ - এইদৰে তেওঁ তোমাক অভিশাপ দিছিল।
- হে ৰাজন ! আকাশীগঙ্গাৰ প্ৰৱাহ আৰু উদ্দাম দিগ্‌জজৰ গৰ্জনত সেই শাপ তুমি নুশুনিলা আৰু আপোনাৰ সাৰথিয়েও নুশুনিলে।
- তেওঁক অৱজ্ঞা কৰাৰ বাবেই তোমাৰ অভীষ্টসিদ্ধিৰ পথ বাধাগ্ৰস্ত হৈছে। কাৰণ, পূজ্যজনৰ প্ৰতি যথোচিত সন্মান ব্যতিক্ৰমে মঙ্গলত সদায় বিঘিনি ঘটায়।
- সেই সুৰভি এতিয়া বৰুণৰ দীৰ্ঘকালীন যজ্ঞৰ হৱনীয় দ্ৰব্যৰ বাবে সাপে দ্বাৰ ৰুদ্ধ কৰি ৰখা পাতালত বাস কৰিছেগৈ।
- সুৰভিৰ কন্যাক প্ৰতিনিধি ৰূপে জ্ঞান কৰি শুদ্ধভাৱেৰে পত্নীৰে সৈতে আৰাধনা কৰা। কাৰণ প্ৰসন্ন হৈ তেৱেই তোমাৰ অভীষ্টপূৰণ কৰিব।
- এইদৰে কৈ থাকোঁতেই সেই হোতাৰ (বশিষ্ঠৰ) যজ্ঞাহুতিৰ সাধনস্বৰূপ নন্দিনী নামৰ অনিন্দনীয় ধেনু বনৰ পৰা প্ৰত্যাৱৰ্তন কৰিলে।
- সন্ধ্যাই যিদৰে নবোদিত চন্দ্ৰকলা ধাৰণ কৰে তেনেদৰে কুঁহিপাতৰ দৰে স্নিগ্ধপাটলবৰ্ণ বিশিষ্ট সেই ধেনুৰ কপালত ই শ্বেতবৰ্ণৰ ৰোমৰাজিয়ে শোভা পাইছিল।
- কুম্ভৰদৰে পীনস্তনযুক্তা নন্দিনীয়ে বাসদৰ্শনত নিঃসৃত যজ্ঞৰ অবভৃথ স্নানতকৈয়ো পবিত্ৰ, ঈষদুষ্ণ দুগ্ধ প্ৰৱাহেৰে ধৰাতল অভিষিক্ত কৰিছিল।
- (নন্দিনীৰ) খুৰাৰ আঘাতত উঠা ধূলিকনাই ৰজাৰ শৰীৰ স্পৰ্শ কৰি তেওঁক তীৰ্থত স্নানকৰাৰ নিচিনা পবিত্ৰতা সম্পাদন কৰিছিল।
- পুণ্যদৰ্শনা তাইক (নন্দিনীক) দেখি তপোনিধিয়ে মনোৰথসিদ্ধি অৱধাৰিত বুলি জানি যজমান দিলীপক পুনৰ ক’বলৈ ধৰিলে।
- হে ৰাজন ! তোমাৰ অভীষ্টসিদ্ধি অদূৰৱৰ্তী বুলি জানিবা, কাৰণ এই মঙ্গলমূৰ্তি নন্দিনী নাম লোৱা মাত্ৰেই উপস্থিত হৈছেহি।
- অভ্যাসৰ দ্বাৰা যিদৰে বিদ্যাক প্ৰসন্ন কৰা হয়, তুমিও সেইদৰে বন্যবৃত্তি অৱলম্বন কৰি এই ধেনুক নিৰন্তৰ অনুসৰণ কৰি সন্তুষ্ট কৰা উচিত।
- তাই প্ৰস্থান কৰিলে তুমিও প্ৰস্থান কৰিবা আৰু অৱস্থান কৰিলে তুমিও অৱস্থান কৰিবা। তাই বহিলে তুমিও বহিবা আৰু তাই পানী খালে তুমিও পানী খাবা।
- বধূ সুদক্ষিণায়ো ভক্তিমতী আৰু পবিত্ৰ হৈ এই ধেনুৰ পূজা অৰ্চনা কৰি প্ৰাতঃকালত তপোবনৰ সীমালৈ এই ধেনুক অনুসৰণ কৰিব আৰু সন্ধ্যা তাইক আদৰি আনিব।
- যিমান দিনলৈ নন্দিনী প্ৰসন্ন নহয় সিমান দিনলৈ সেৱা কৰিবা। তোমাৰ বিঘিনি দূৰ হওঁক। তুমি তোমাৰ পিতাৰ দৰে সৎপুত্ৰসকলৰ ভিতৰত অগ্ৰণী হোৱা।
- দেশ আৰু কালৰ বিষয়ে অভিজ্ঞ শিষ্যই পত্নীৰে সৈতে আনন্দ মনেৰে বিনম্ৰ হৈ

'সেয়াই হ'ব' বুলি গুৰুৰ আদেশ গ্ৰহণ কৰিলে।

৭৬) ইয়াৰ পিছত ৰাতি বিদ্বান, সত্যপ্ৰিয়ভাষী ব্ৰহ্মাৰ পুত্ৰই (বশিষ্ঠই) ঐশ্বৰ্য্যশালী ৰজাক শুৱলৈ আদেশ দিলে।

৭৭) তপস্যাৰ প্ৰভাৱ থকা সত্ত্বেও ব্ৰতনিয়মত অভিজ্ঞ মুনিয়ে নিয়ম পৰিপালনৰ বাবে অৰণ্যোচিত সামগ্ৰীৰ যোগাৰ ধৰিলে।

৭৮) পৰিত্ৰচাৰিণী পত্নীৰ সৈতে তেওঁ (দিলীপে) কুলপতিয়ে দেখুৱাই দিয়া পৰ্ণশালাত প্ৰৱেশ কৰি কুশশয্যাত শয়ন কৰিলে আৰু শিষ্যসকলৰ অধ্যয়নৰ শব্দত ৰাতিৰ অৱসান হ'ল বুলি জানিৰ পাৰিলে- এইদৰেই তেওঁ ৰাতিটো কটালে।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: 'शत्रुः' इति शब्देन किम् अवबोध्यते ?

.....

प्रश्नः २: 'सुरभिः' का अस्ति ?

.....

प्रश्नः ३: 'प्रचेतसः' इत्यस्य अपराभिधानं किम् ?

.....

प्रश्नः ४: 'महीक्षितः' शब्दस्य अर्थः कः ?

.....

प्रश्नः ५: 'सत्रम्' इत्युक्ते किम् ?

.....

६.३.४ व्याकरणटिप्पणी

७५) उपस्थाय = उप - स्था + ल्यप्।
आसीत् = अस् + लङ् द।
आश्रिता = आ - श्रि + क्त (कर्तरि) + टाप् (स्त्रियाम्)।
यास्यतः = षष्ठी एकवचनम्।
पथि = अधिकरणे सप्तमी।
कल्पतरुच्छायाम् = कल्पतरोः छाया (षष्ठीतत्पुरुषसमासः)।

७७) स्मरन् = स्मृ + शतृ प्रथमा एकवचनम्।
आचारः = आ - च् + लङ् स।
धर्मलोपभयात् = हेतौ पञ्चमी।
राज्ञीम् = कर्मणि द्वितीया।
तस्याम् = अधिकरणे सप्तमी।

धर्मलोपभयात् = धर्मस्य लोपभयात् (षष्ठीतत्पुरुषसमासः)।

ऋतुस्नाताम् = ऋतुनां निमित्तेन स्नाता (तृतीयातत्पुरुषसमासः)।

७७) अवजानामि = अव - ज्ञ + लट् मि।

भविष्यति = भू + लृट् स्यति।

शशाप = शप् + लिट् णल्।

यस्मात् = हेतौ पञ्चमी।

मत्प्रसूतिम् = मम प्रसूतिः ताम् (षष्ठीतत्पुरुषसमासः)।

७८) शापः = शप् + घञ्।

श्रुतः = श्रु + क्त (कर्मणि)।

नदति = नद् + शतृ सप्तमी एकवचनम्।

सारथिना = अनुक्ते कर्तरि तृतीया।

स्रोतसि = भावे सप्तमी।

आकाशगङ्गायाः = शेषे षष्ठी।

उद्दामदिग्गजे = उद्दमानाः दिग्गजाः यस्मिन् तत् (बहुव्रीहिसमासः)।

७९) ईप्सितम् = आप् + सन् + क्त।

विद्धि = विद् + लोट् हि।

अवज्ञानात् = हेतौ पञ्चमी।

तदवज्ञानात् = तस्याः अवज्ञानम् (षष्ठीतत्पुरुषसमासः) तस्मात्।

सार्गलम् = अर्गलेन सह वर्तमानम् (बहुव्रीहिसमासः)।

पूज्यपूजाव्यतिक्रमः = पूज्यानां पूजा (षष्ठीतत्पुरुषसमासः), तस्याः व्यतिक्रमः (षष्ठीतत्पुरुषसमासः)।

८०) अधितिष्ठति = अधि - स्था + लट् ति।

हविषे = ताद्यर्थे चतुर्थी।

प्रचेतसः = सम्बन्धे षष्ठी।

दीर्घसत्रस्य = दीर्घं सत्रं यस्य सः (बहुव्रीहिसमासः)।

भुजङ्गपिहितद्वारम् = भुजङ्गे पिहितं द्वारं यस्य तत् (बहुव्रीहिसमासः)।

८१) कृत्वा = कृ + क्त्वाच्।

आराधाय = आ - राध् + लोट् हि।

प्रीता = प्री + क्त + आप् (स्त्रियाम्)।

सपत्नीकः = पत्न्या सह वर्तमानः (बहुव्रीहिसमासः)।

कामदुधा = कामान् दोग्धि (द्वितीया तत्पुरुषसमासः)।

८२) वादिनः = वद् + णिच् + इन्, षष्ठी एकवचनम्।

आववृते = आ - वृत् + लिट् ए।

वनात् = अपादाने पञ्चमी।

आहुतिसाधनम् = आहुतेः साधनम् (षष्ठीतत्पुरुषसमासः)।

अनिन्द्या = न निन्द्या (नञ्तत्पुरुषः)।

८३) विभ्रती = भृ + शतृ + स्त्रियाम् ङीप्।

ललाटोदयम् = ललाटे उदयः यस्य सः तम् (बहुव्रीहिसमासः)।

पल्लवस्निग्धपाटला = स्निग्धा चासौ पाटला च (कर्मधारयसमासः), पल्लव इव स्निग्धपाटला (उपमान-कर्मधारयः)।

८४) मेध्येन = मेध् + ण्यत्, तृतीया एकवचनम्।

अभिवर्षन्ती = अभि - वृष् + शतृ + ङीप् (स्त्रियाम्), प्रथमा एकवचनम्।

कोष्णेन = ईषत् उष्णः (कर्मधारयसमासः) तेन।

कुण्डोध्नी = कुण्डमिव ऊधः यस्याः सा (बहुव्रीहिसमासः)।

वत्सालोकप्रवर्तिना = वत्सस्य आलोकः (षष्ठीतत्पुरुषसमासः), वत्सालोके प्रवर्तते यः तेन (उपपदतत्पुरुषसमासः)।

८५) स्पृशद्भिः = स्पृश् + शतृ, तृतीया एकवचनम्।

शुद्धिम् = शुध् + क्तिन्, द्वितीया एकवचनम्।

आदधाना = आ - धा + शानच् + टाप् (स्त्रियाम्)।

रजःकणैः = करणे तृतीया।

महीक्षितः = शेषे षष्ठी।

रजःकणैः = रजसां कणाः (षष्ठीतत्पुरुषसमासः) तैः।

खुरोद्धूतैः = खुरेभ्यः उद्धूताः तैः (बहुव्रीहिसमासः)।

तीर्थाभिषेकजाम् = तीर्थस्य अभिषेकजा (षष्ठीतत्पुरुषसमासः)।

८६) दृष्ट्वा = दृश् + क्त्वाच्।

राज्यम् = यज् + ण्यत्।

अब्रवीत् = ब्रु + लङ् द।

पुण्यदर्शनाम् = पुण्यं दर्शनं यस्याः सा ताम् (बहुव्रीहिसमासः)।

निमित्तज्ञः = निमित्तं जानाति यः सः (उपपदतत्पुरुषसमासः)।

आशंसितावन्ध्यप्रार्थनम् = आशंसिते अवन्ध्या प्रार्थना यस्य सः (बहुव्रीहिसमासः)।

८७) सिद्धिम् = सिध् + क्तिन्, द्वितीया एकवचनम्।

विगणय = वि - गण् लोट् हि।

उपस्थिता = उप - स्था + क्ता + स्त्रियाम् आप्।

कीर्तिते = कृ + क्त, सप्तमी एकवचनम्।

सिद्धिम् = कर्मणि द्वितीया।

अदूरवर्तिनीम् = न दूरे वर्तते इति (नञ्तत्पुरुषः समासः)।

८८) अभ्यसनेन = अभि - अस् + ल्युट् (करणे) तृतीया एकवचनम्।

प्रसादयितुम् = प्र - सद् + णिच् + तुमुन्।

अर्हसि = अर्ह + लट् सि।

आत्मानुगमनेन = करणे तृतीया।

अभ्यसनेन = करणे तृतीया।

वन्यवृत्तिः = वने भवं वन्यं तदेव वृत्तिः व्यवहारो यस्य सः (बहुव्रीहिसमासः)।

८९) प्रस्थितायाम् = प्र - स्था + क्त (कर्तरि) + टाप् (स्त्रियाम्) सप्तमी एकवचनम्।

स्थितिम् = स्था + क्तिन्, द्वितीया एकवचनम्।

आचरेः = आ - चर् + विधिलिङ् यास्।

निषण्णायाम् = नि - सद् + क्त (कर्तरि) + टाप् (स्त्रियाम्) सप्तमी एकवचनम्।

निषीद = नि - सद् + लोट् हि।

पिबेः = पा + विधिलिङ् यास्।

स्थितिम् = कर्मणि द्वितीया।

अपः = कर्मणि द्वितीया।

पीताम्भसि = पीतम् अम्भः यया तस्याम् (बहुव्रीहिसमासः)।

९०) भक्तिमती = भक्तिरस्ति अस्या इति भक्ति + मतुप् + ङीप् (स्त्रियाम्)।

अर्चिताम् = अच् + क्त + टाप् (स्त्रियाम्) ताम्।

प्रमता = प्र - यम् + क्त + टाप् (स्त्रियाम्)।

अन्वेतु = अनु - इ + लोट् तु।

प्रत्युद्व्रजेत् = प्रति - इ व्रज् + लिङ्यात् ।

भक्तिमती = भक्ति विधते अस्या इति (बहुव्रीहिसमासः)।

९१) भव = भू + लोट् हि।

अस्तु = अस् + लोट् तु।

स्थेयाः = स्था + आशीर्लिङ् यास्।

धुरि = अधिकरणे सप्तमी।

पुत्रिणाम् = शेषे षष्ठी।

परिचर्यापरः = परिचर्यां परं यस्य सः (बहुव्रीहिसमासः)।

पुत्रिणाम् = पुत्राः सन्ति येषाम् (बहुव्रीहिसमासः)।

९२) प्रतिजग्राह = प्रति - ग्रह् + लिट् णल्।

आदेशम् = आ - दिश् + घञ् तम्।

शिष्यः = शास् + क्यप्।

शासितुः = शास् + तृच्, षष्ठी एकवचनम्।

आनतः = आ - नम् + क्त (कर्तरि)।

आदेशम् = कर्मणि द्वितीया।

शासितुः = शेषे षष्ठी।

सपरिग्रहः = परिग्रहेण सह वर्तमानः यः सः (बहुव्रीहिसमासः)।

देशकालज्ञः = देशः च कालः च (द्वन्द्वसमासः)।

९३) संवेशाय = सम् + विश् + घञ्, तस्मै।

विससर्ज = वि - सृज् + लिट् णल्।

प्रदोषे = अधिकरणे सप्तमी।

संवेशाय = तादर्थ्ये चतुर्थी।

सुनृतवाक् = सुनृता वाक् यस्य असौ (बहुव्रीहिसमासः)।

उर्जितश्रियम् = उदिता श्रीर्यस्य सः तम् (बहुव्रीहिसमासः)।

९४) सत्याम् = अस् + शतृ + ङीप् (स्त्रियाम्) सप्तमी एकवचनम्।

संविधाम् = सम् - वि - धा + क ताम्।

नियमापेक्षया = हेतौ पञ्चमी।

संविधाम् = कर्मणि द्वितीया।

तपःसिद्धौ = तपसा सिद्धिः (तृतीया तत्पुरुषसमासः), तस्याम्।

नियमापेक्षया = नियमानाम् अपेक्षया (षष्ठीतत्पुरुषसमासः)।

कल्पवित् = कल्पं वेत्ति यः सः (उपपद्-तत्पुरुषसमासः)।

९५) निर्दिष्टाम् = निरम् - दिश् + क्त + टाप् (स्त्रियाम्) ताम्।

अध्यास्य = अधि - आस् + ल्यप्।

संविष्टः = सम् - विश् + क्त।

निनाय = नी + लिट् णल्।

कुलपतिना = अनुक्ते कर्तरि तृतीया।

कुशशयने = अधिकरणे सप्तमी।

निशाम् = कर्मणि द्वितीया।

कुलपतिना = कुलस्य पतिः (षष्ठीतत्पुरुषसमासः), तेन।

प्रयतपरिग्रहद्वितीय = प्रयतः परिग्रहः द्वितीयः यस्य सः (बहुव्रीहिसमासः)।

६.५ श्लोकानां विषयवस्तूनां असमीयाभाषायां संक्षिप्तरूपम्

তপস্যাৰ প্ৰভাৱত শুদ্ধাত্মা বশিষ্ঠই ৰজা দিলীপৰ সন্তানহীনতাৰ কাৰণ জানিৰ পাৰি ক'লে যে এবাৰ ইন্দ্ৰৰ কাৰ্য্য সম্পাদন কৰি ৰজাই মৰ্ত্যলৈ প্ৰত্যাগমন কৰোতে সুৰভিয়ে কল্পতৰুৰ ছাঁত জিৰণি লৈ আছিল (নং শ্লোক)। ধৰ্মহানিৰ ভয়ত ঋতুস্নাতা মহিষীৰ কথা স্মৰণ কৰি সৎকাৰযোগ্যা সেই ধেনুৰ প্ৰতি ৰজাই উচিত আচৰণ প্ৰদৰ্শন নকৰিলে (নং শ্লোক)। মোক অসন্মান কৰা হেতুকেই মোৰ সন্তানক আৰাধনা নকৰাকৈ তুমি পুত্ৰ সন্তান লাভ নকৰিবা এইবুলি

সুৰভিয়ে ৰজাক শাপ দিলে (নং শ্লোক)। আকাশগঙ্গাৰ প্ৰৱাহ আৰু দ্বিগ্‌জৰ গৰ্জনত ৰজা আৰু সাৰথিয়ে কোনেও সেই শাপ নুশুনিলে (নং শ্লোক)। সুৰভিক অৱজ্ঞা কৰা বাবেই ৰজাৰ অভীষ্টসিদ্ধিত ব্যাঘ্যাত হৈছে। কাৰণ পূজ্যসকলৰ সন্মানৰ ব্যতিক্ৰমত মঙ্গলপ্ৰাপ্তিত বিঘিনি ঘটে (নং শ্লোক)। সেই সুৰভি বৰ্তমান বৰুণৰ সত্ৰৰ হবি প্ৰদানৰ বাবে সৰ্পই অৱৰুদ্ধ কৰা পাতালত অৱস্থান কৰিছে (নং শ্লোক) সুৰভিৰ কন্যাক প্ৰতিনিধি হিচাপে গ্ৰহণ কৰি আৰাধনা কৰি প্ৰসন্ন কৰিলেই ৰজাৰ অভিলাষ পূৰণ হ'ব (নং শ্লোক)। এইদৰে কৈ থাকোতেই আহুতিসাধক নন্দিনী বনৰ পৰা উভটি আহিল (নং শ্লোক)। কুঁহিপাতৰ দৰে ঈষ্যৰক্তিম সেই ধেনুৰে কপালত বগা নোমৰ কিঞ্চিত বক্ৰ ৰেখাৰে নবোদিত চন্দ্ৰৰ দৰে শোভা পাইছিল (নং শ্লোক) ব্যসদৰ্শনত ক্ষৰিত হোৱা ঈষদুষ্ণ আৰু অৱভূথ স্নানতকৈও পৰিত্ৰ দুগ্ধৰে ভূমি আদ্ৰ কৰি তুলিছিল (নং শ্লোক) নন্দিনীৰ খোজত খুৰাৰ ধূলিৰে ৰজাৰ শৰীৰ স্পৰ্শ কৰাত তীৰ্থস্নানৰ পুণ্যৰ দৰে পৰিত্ৰ হৈছিল (নং শ্লোক)। তপোনিধিয়ে নন্দিনীক দেখি ৰজাৰ আশা ফলৱতী হ'ব বুলি ৰজাক কৈছিল (নং শ্লোক)। মুনিয়ে ৰজাক কৈছিল যে তেওঁৰ অভীষ্টসিদ্ধি, যিহেতু নাম লোৱা মাত্ৰেই নন্দিনী উপস্থিত হৈছেহি (নং শ্লোক)। বিদ্যাক অভ্যাসৰ দৰেই অনুশীলন কৰাৰ দৰেই বন্যবৃত্তি অৱলম্বন কৰি সেই ধেনুক অনুসৰণ কৰিবলৈ মুনিয়ে উপদেশ দিলে (নং শ্লোক)। নন্দিনীৰ চাল-চলন ৰজাও অনুসৰণ কৰিব আৰু বহিলে ৰজাও বহিব। তাই পানী খালে ৰজায়ো খাব (নং শ্লোক)। বধূ সুদক্ষিণায়ো ভক্তিপৰায়ণ হৈ আশ্ৰমৰ সীমালৈ অনুসৰণ কৰিব আৰু সন্ধ্যা আগবঢ়াই আনিব। (নং শ্লোক)। নন্দিনী প্ৰসন্ন নোহোৱালৈকে এনেদৰে সেৱা কৰিবলৈ কৈ ৰজাৰ মঙ্গল কামনা কৰি তেওঁৰ পিতৃৰ দৰে পুত্ৰৱানসকলৰ ভিতৰত প্ৰমুখ হ'বলৈ আশীৰ্বাদ দিলে (নং শ্লোক)। সেয়ে হ'ব বুলি কৈ ৰজা আৰু ৰাণীয়ে গুৰুৰ আদেশ নতশিৰে গ্ৰহণ কৰিছিল (নং শ্লোক)। তাৰ পিছত প্ৰজাপতিপুত্ৰ বশিষ্ঠই ঐশ্বৰ্য্যশালী ৰজাক শয়নৰ বাবে অনুমতি প্ৰদান কৰিলে (নং শ্লোক)। তপস্যাৰ প্ৰভাৱ থকা সত্ত্বেও ব্ৰতৰ নিয়মৰ বাবে বনবাসীৰ উপযোগী সামগ্ৰীহে যোগান ধৰিলে (নং শ্লোক)। ব্ৰতচাৰিণী পত্নীৰ লগত বশিষ্ঠই দেখুৱাই দিয়া পৰ্ণশালাত ৰজাই কুশশয্যাত শয়ন কৰিলে আৰু শিষ্যৰ অধ্যয়নৰ শব্দত জাগৰিত হ'ল (নং শ্লোক)।

६.५ प्रथमसर्गस्य पञ्चसप्ततितममश्लोकतः पञ्चनवतितममश्लोकं (७५-९५) यावत् कतिपयाणां श्लोकानां व्याख्या भावार्थश्च

१) प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥

प्रकृततो यः पूज्यो भवति, सः सदैव सर्वत्र पूजनीयो भवेत्। पूज्याणां पूजनेन अभीष्टफलस्य प्राप्तिर्जायते। परन्तु, पूज्याणां पूजने यदि व्यतिक्रमो दृश्यते, तर्हि कल्याणमार्गे विघ्निर्जायते। यो मार्ग आशीर्वादयुक्तः शत्रुहीनश्च भवति, स एव भवति कल्याणप्राप्तेः मार्गः। ज्ञात-अज्ञातरूपेण यदि पूज्याणां पूजने बाधा भवति, तर्हि तत्र अमङ्गल उत्पद्यते। तेनैव क्रमेण यदा राजा दिलीपः स्वर्गात् प्रत्यावर्तनं करोति, तदा मार्गे कामधेनुं प्राप्ते सति योग्यां पूजां न करोति। तस्मादेव दिलीपस्य

पुत्रः प्राप्तिर्न भविष्यति इति शापं दत्तवान्। अतः पूज्याणां तिरस्कारः कदापि न समुचितः, तान् सदैव अर्चयेयुः।

श्लोकेऽस्मिन् 'अनुष्टुप्' छन्दसः प्रयोगो वर्तते।

२) विद्यामभ्यसनेनेव प्रसादयितुमर्हसि॥

अपुत्रं राजानं दिलीपं मुनिः वशिष्ठ अपुत्रादवस्थात् परित्राणाय कामधेनोः पुत्रीं नन्दिनीं सेवां कर्तुम् उपदिशति। नन्दिनीं प्रसन्नं कर्तुं मुनिः वशिष्ठः राजानं दिलीपं नन्दिनी यथा करोति तथैव कर्तुम् उपदिशति। पुनो मुने उपदेशानुसारं राजा वन्यफलानि खादित्वा नन्दिनीं सर्वप्रकारेण सेवां कुर्यात्। यथा विद्या अभ्यासेनैव लभते, तथैव नन्दिनी अपि सर्वदा राज्ञा सेव्यते। विद्यार्थी ब्रह्मचर्यव्रतम् अवलम्ब्य यदा सर्वान् कामान् परित्याज्य निरन्तरं विद्याभ्यासे संलग्नं भवति, तदा एव तस्य विद्यालाभं सफलं भवति। अन्यथा तु विद्यालाभकार्यं दुष्करं भवति। एवं प्रकारेणैव यदि राजा दिलीपो राज्यभोगं परित्याज्य मुनिवृत्तिम् अवलम्ब्य नन्दिन्याः सेवायां संलग्नं भवति, तदा एव तस्य अभिष्टफलस्य प्राप्तिर्भविष्यति।

श्लोकेऽस्मिन् 'अनुष्टुप्' छन्दसः प्रयोगो वर्तते।

३) ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।
विभ्रती श्वेतरोमाङ्क सन्ध्येव शशिनं नवम्।।

श्लोकोऽयं महाकविकालिदासस्य 'रघुवंशम्' इति महाकाव्यस्य प्रथमे सर्गे प्राप्यते।

पद्येऽस्मिन् कामधेनोः पुत्र्याः नन्दिन्याः वर्णनं प्राप्यते।

राजानं दिलीपं पुत्रप्राप्तिहेतुः गुरुः वशिष्ठः कामधेनोः पुत्रीं नन्दिनीं सेवितुम् उपदिशति। यतोहि, पूज्याणां सेवया पुण्यं प्राप्यते। एवं यदा गुरुः वशिष्ठो नन्दिन्याः प्रशंसां कुर्वन् आसीत् तस्मिन् समये एव नन्दिनी तत्र उपस्थिता जाता। तस्याः सौन्दर्यम् अतीव आकर्षणीयम् आसीत्। सा नन्दिनी आसीत् दर्शने मधुररक्तवर्णा। तस्याः ललाटे शुभ्रातन्वी रोमराजिः विराजते। अस्य वर्णनं कृत्वा कविना कथयति यत् यथा हि नवपल्लववत् मधुरेण रक्तवर्णेन शोभायमानायाः सन्ध्याया आकाशरूपे ललाटे शुभ्रातन्वी नवा शशिकला शोभते, तथैव नवपल्लवमिव मधुरेण रक्तवर्णेन शोभमानायाः मन्दितन्याः ललाटे शुभ्रातन्वी रोमराजिः विराजते।

श्लोकेऽस्मिन् उत्प्रेक्षालङ्कारस्य प्रयोगो दृश्यते। छन्दस्तु अनुष्टुप्।



६.६ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति -

- 'रघुवंशम्' महाकाव्यस्य प्रथमसर्गस्य विषयवस्तु एकांशं ज्ञातवन्तः।
- वशिष्ठमुनिना सह राज्ञो दिलीपस्य कथोपकथनविषयं ज्ञातवन्तः।
- कामधेनोः पुत्र्याः नन्दीन्याः विषयं पठितवन्तः।

- निर्दिष्टानां श्लोकानां संस्कृतपाठः, शब्दार्थः, असमीयानुवादादयः ज्ञातवन्तः।
- निर्दिष्टानां श्लोकानां व्याकरणटिप्पण्यः ज्ञातवन्तः।



६.७ ज्ञानाधिक्यम्

१) काले, एम. आर. (सम्पा.): रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास पाब्लिछार्च प्राइभेट लिमिटेड।

२) नन्दर्गिकार, गोपाल रघुनाथ (१९८२) (सम्पा.) : रघुवंशम् अव् कालिदास (१-५); दिल्ली : मतिलाल वानारसीदास।

३) शास्त्री, अशोकनाथ & भाञ्जा सरोजनाथ (१९५१) (सम्पा.) कालिदासस्य रघुवंशम्; मडार्ण वुक एजेन्सि।



६.८ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : 'शत्रुः' इति शब्देन इन्द्रम् अवबोध्यते।

प्रश्नः २ : उत्तरम् : 'सुरभिः' मुनेः वशिष्ठस्य कामधेनुरस्ति।

प्रश्नः ३ : उत्तरम् : 'प्रचेतसः' इत्यस्य अपराभिधानम् अस्ति वरुणः।

प्रश्नः ४ : उत्तरम् : 'महीक्षितः' शब्दस्य अर्थः 'राज्ञ'रिति।

प्रश्नः ५ : उत्तरम् : 'सत्रम्' इत्युक्ते दीर्घकालपर्यन्तं प्रचल्यमानो यागोऽस्ति।



६.९ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

अधौ उल्लिखितानां पदानां व्याकरणटिप्पणी लिखन्तु :

आश्रिता, स्मरन्, ईप्सितम्, राज्यम्, सारथिना, हविषे, प्रदोषे, सार्गलम्, सपत्नीकः, अनिन्द्या, ललाटोदयम्, खुरोद्धूतैः, पीताम्भसि, सुनृतवाक्, कल्पवित्।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५०-३०० शब्देषु लिखन्तु)।

व्याख्या भावार्थः च लेखनीयः

१) प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥

२) विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥

३) ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।
विभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्।।

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३००-५०० शब्देषु लिखन्तु)।

प्रश्नः १ : कामधेनुनन्दिन्या एकं संक्षेपं परिचयं लिखन्तु।

प्रश्नः २ : महर्षिः वशिष्ठः केन प्रकारेण राजानं दिलीपं नन्दिन्याः सेवार्थम् उपदिशति तस्य विवरणं लिखन्तु।

*** ***** ***

अध्यायः ७ : रघुवंशम्- चतुर्थसर्गः (श्लोकाः १-२५)

अध्यायस्य संरचना

७.१ उद्देश्यम्

७.२ परिचयः

७.३ चतुर्थसर्गस्य सारांशः

७.४ चतुर्थसर्गस्य श्लोकानाम् संस्कृतपाठः (१-२५)

७.४.१ श्लोकानाम् अन्वयः

७.४.२ श्लोकानाम् अर्थः

७.४.३ श्लोकानाम् असमीयानुवादः

७.५ श्लोकानां व्याख्या

७.६ श्लोकानां व्याकरणांशाः(प्रकृतिप्रत्ययसमाससहितम्)

७.७ अध्यायात् किमवगतम्

७.८ ज्ञानाधिक्यम्

७.९ अग्रगत्याः निरूपणम्

७.१० अभ्यासप्रश्नाः

७.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- कविकुलगुरुकालिदासस्य रघुवंशमहाकाव्यस्य च ज्ञानं प्राप्तुं शक्नुवन्ति।
- चतुर्थसर्गस्य विशेषता का? इत्यपि ज्ञायते।
- राज्ञः रघोः कीदृशः पराक्रमोऽसीत् तदपि ज्ञानं लभते।
- कनिष्ठिकाधिष्ठितकालिदासस्य भाषाशैलीमपि ज्ञातुं शक्यते।

७.२ परिचयः

इतः पूर्वं भवन्तः सर्वे कविकुलगुरुकालिदासस्य रघुवंशमहाकाव्यस्य प्रथमसर्गम् अध्ययनम् अकुर्वन्। महाकविकालिदासस्य भाषाशैली प्रकृतिसौन्दर्यञ्च लौकिकजीवनस्य स्पर्शनं चित्रणं सर्वान् आह्लादयति। अस्मिन् सर्गे भवन्तः सर्वे राज्ञा दिलीपेन प्रदत्तेन राज्येन रघुः कथं केन प्रकारेण तस्य राज्यस्य विस्तारम् अकरोत् तथा च सः रघुः शत्रूभिस्साकं कथम् अनुचरति इत्यस्मिन् विषये ज्ञातुमर्हन्ति।

स्वस्य पित्रा दत्तस्य राज्यस्य भारं गृहीत्वा रघुः इत्थं शोभायमानः भवति स्म यथा सायङ्कालस्य सूर्येण निहिततेजः सम्प्राप्य अग्निः अत्यधिकः दीव्यति।

राज्यारूढरघोः पराक्रमेण सर्वे सन्तुष्टा आसन्। सः शास्त्रनीत्या कार्यम् अकरोत्। येन

तस्य शत्रवः भीताः तथा च तस्य रघोः सम्मुखे स्वयमेव आत्मसमर्णम् अकुर्वन्।

इतः पूर्वं मन्वादिराजानः पृथिव्याः उपभोगम् अकुर्वन् तथापि इत्थं नीतिपूर्वकं शासनं कृत्वा रघोः पूर्ववर्तिनः ये राजानः आसन्, तान् सर्वे जनाः विस्मृतवन्तः। यथा आम्रफलं भूक्त्वा सर्वे तस्य आम्रमञ्जरीं विस्मरन्ति।

तद्वद् पराक्रमी आसीत् रघुः। लक्ष्मीसरस्वत्यौ परस्परं शत्रुः तथापि रघोः राज्ये विना कोलाहलेन अनिवसताम्। तथा वैशिष्ट्यमासीत् तस्य। राजनीतिज्ञैः रघोः पुरस्तात् नीतिशास्त्रं कूटशास्त्रञ्च प्रस्तुतम् तथापि रघुः नीतिशास्त्रम् ग्रहीतवान्। येन सम्पूर्णस्य विश्वस्य अधिकारः लब्धः। अस्मिन् अध्याये रघुवंशम् महाकाव्यस्य चतुर्थसर्गस्य (१-२५) श्लोकानाम् वयम् अध्ययनम् करिष्यामः।

७.३ चतुर्थसर्गस्य सारांशः

अस्य सर्गस्य अध्ययनेन चिन्तनेन च राजारघोः पराक्रमं ज्ञातुं शक्नुमः वयम्। पिताद्वारा प्रदत्तं राज्यं तस्य राज्यस्य विस्तारकरणं स्वस्य बलेन कथं स राजा रघु अकरोत् अत्र ज्ञातुं शक्यते। सर्वे राजानः रघोः पराक्रमं दृष्ट्वा ईर्ष्यां कुर्वन्ति स्म। राजारघुः शस्त्रनीत्या शास्त्रनीत्या च स्वस्य शत्रून् पराजितं कृत्वा पुनः राज्यं दत्तवान्। तान् राजारघुः उत्तमरूपेण राज्यानुशासनं कृत्वा प्रजाहितकार्याणि अकरोत्। तदनन्तरं विश्वविजयं कृत्वा विश्वजित् यज्ञस्यानुष्ठानं कृत्वा विप्रेभ्यो बहुनि धनानि अददात्।

७.४ चतुर्थसर्गस्य श्लोकाः संस्कृतपाठः (१-२५)

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः॥ १
दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम्।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः॥ २
पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः॥ ३
सममेव समाक्रान्तं द्वयं द्विरदगामिना।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम्॥ ४
छायामण्डललक्ष्येण तमदृश्या किल स्वयम्।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम्॥ ५
परिकल्पितसान्निध्या काले काले च वन्दिषु।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती॥ ६
मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः।

तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुन्धरा॥ ७
स हि सर्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥ ८
मन्दोत्कण्ठाः कृतान्तेन गुणाधिकतया गुरोः।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः॥ ९
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम्।
पूर्व एवाभवत् पक्षस्तस्मिन्नाभवदुत्तरः॥ १०
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत्॥ ११
यथाप्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥ १२
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना॥ १३
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता।
पार्थिवश्रीद्वितीयेव शरत्पङ्कजलक्षणा॥ १४
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः।
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः॥ १५
वार्षिकं सञ्जहारेन्द्रो धनुर्जैत्रं रघुर्दधौ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ॥ १६
पुण्डरीकातपत्रस्तं विकसत्काशचामरः।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम्॥ १७
प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे।
तदा चक्षुष्मतां प्रीतिरासीमरसया द्वयोः॥ १८
हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु।
विभूतयस्तदीयानां पर्यस्ता यशसामिव॥ १९
इक्षुच्छायनिषादिदिन्यस्तस्य गोप्तुर्गुणोदयम्।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः॥ २०
प्रससादोदयादम्भः कुम्भयोनेर्महौजसः।
रघोरभिभवाशङ्की चुक्षुभे द्विषतां मनः॥ २१
मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम्॥ २२
प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः॥ २३

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान्।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत्॥ २४
तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ॥ २५

७.४.१ श्लोकानाम् अन्वयः

१. सः, (रघुः) गुरुणा, दत्तम्, राज्यम्, प्रतिपद्य, दिनान्ते, सवित्रा, निहितम्, तेजः, प्रतिपद्य हुताशनः, इव, अधिकम्, बभौ।

२. दिलीपानन्तरम्, राज्ये, तम्, (रघुं) प्रतिष्ठितम्, निशम्य, पूर्वम्, राज्ञाम्, हृदये, प्रधूमितः, अग्निः, उत्थितः, इव, अभूत्।

३. सप्रजाः, प्रजाः, पुरुहुतध्वजस्य, इव, तस्य, (रघोः) नवाभ्युत्थानदर्शिन्यः, उन्नयनपङ्क्तयः, ननन्दुः।

४. द्विरदगामिना तेन (रघुणा) पित्र्यं सिंहासनं अखिलम्, अरिमण्डलम्, च,एतत् द्वयम्, समम्, एव, समाक्रान्तम्।

५. पद्मा, स्वयम्, अदृश्या, (सती) छायामण्डललक्ष्येण, पद्मातपत्रेण, साम्राज्यदीक्षितम्, तं भेजे किल।

६. काले, काले, वन्दिषु, परिकल्पितसान्निध्या, (सती) सरस्वती, स्तुत्यम्, तम्, अर्थ्याभिः, स्तुतिभिः, उपतस्थे।

७. यद्यपि, वसुन्धरा, मनुप्रभृतयः, मान्यैः, राजभिः, भुक्ता (बभूव), तथापि, तस्मिन्, अनन्यपूर्वा, इव, आसीत्।

८. हि, सः(रघुः), युक्तदण्डतया, नातिशीतोष्णाः, दक्षिणः, नभस्वान्, इव, आददे।

९. तेन, प्रजाः, गुरौ, सहकारस्य, फलेन, पुष्पोद्गमे, इव, गुणाधिकतया, मन्दोत्कण्ठाः, कृताः।

१०. नयविद्भिः, नवे, राज्ञि, सद्, असत्, च, उपदर्शितम्, तस्मिन्,(राज्ञौ) पूर्वः, एव, पक्षः, अभवत्, उत्तरः,(पक्षः) न अभवत्।

११. पञ्चानाम्, भूतानाम्, गुणाः, अपि, उत्कर्षम्, पुपुषुः, तस्मिन्, नवे, महीपाले, सर्वम्, नवम्, इव, अभवत्।

१२. यथा, चन्द्र, प्रह्लादनात्, अन्वर्थः, अभूत्, यथा, तपनः, प्रतापाद्, तथा, एव, सः, राजा, प्रकृतिरञ्जनात्, अन्वर्थः, अभूत्।

१३. तस्य, विशाले, लोचने, कामम्, कर्णान्तविश्रान्ते, (आस्ताम्) (तस्य) चक्षुष्मत्ता, तु, सूक्ष्मकार्यार्थदर्शिना, शास्त्रेण, (आसीत्)।

१४. अथ, लब्धप्रशमनस्वस्थम्, एनम्, पङ्कजलक्षणा, शरद्, द्वितीया, पार्थिवश्रीः, इव, समुपस्थिता।

१५. निर्वृष्टलघुभिः, मेघैः, मुक्तावर्त्मा,(अत एव) सुदुःसहः, तस्य (रघोः), प्रतापः, भानोः, च, (प्रतापः) युगपत्, दिशः, व्यानशे।

१६. इन्द्रः, वार्षिकम्, धनुः, संजहार, रघुः, जैत्रम्,(धनुः) दधौ, हि, तौ, प्रजार्थसाधने, पर्यायोद्यतकार्मुकौ,(आस्ताम्)।

१७. पुण्डरीकातपत्रः, विकसत्काशचामरः,(शरत्) ऋतुः, तम् (रघुम्), विडम्बयामास, पुनः, तच्छ्रियम्, न, प्राप।

१८. तदा, प्रसादसुमुखे, तस्मिन् (रघौ), विशदप्रभे, चन्द्रे, च, द्वयोः, चक्षुष्मताम्, प्रीतिः, समरसा, आसीत्।

१९. तदीयानाम्, यशसाम्, विभूतयः, हंसश्रेणीषु, तारासु, कुमुद्व, वारिषु, च, पर्यस्ता इव, (आसन्)।

२०. इक्षुच्छायानिषादिभ्यः शालिगोप्यः, गोसुः, तस्य(रघोः), गुणोदयम्, आकुमारकथोद्घातम्, यशः, जगुः।

२१. महौजसः, कुम्भयोनेः, उदयाद्, अम्भम्, प्रससाद, रघोः, अभिभवाशङ्कि, द्विषताम्, मनः, चुक्षुभे।

२२. मदोदग्राः, ककुद्मन्तः, सरिताम्, कूलमुद्वुजाः, महोक्षाः, तस्य(रघोः), लीलाखेलम्, विक्रमम् अनुप्रापुः।

२३. मदगन्दिभिः, सप्तपर्णानाम्, प्रसवैः, आहताः, तन्नागाः, असूयया, इव सप्तधा, एव, प्रसुस्त्रुवुः।

२४. सरितः, गाधाः, पथः, च, अश्यानकर्दमान् कुर्वती, (सती) शरत्, शक्तेः, प्रथमम्, तम् (रघुम्), यात्रायै, चोदयामास।

२५. वाजिनीराजनाविधौ, सम्यक्, हुतः, वह्निः, प्रदक्षिणार्चिर्व्याजेन, हस्तेन, इव, तस्मै, जयम्, ददौ।

७.४.२ श्लोकानाम् अर्थः

१. स गुरूणा दत्तं वाद्यं प्रतिपद्य दिनान्ते सवित्रा निहितं तेजः (प्रतिपद्य)हुनाशनः इव वभौ।

२. दिलीपानन्तरं राज्ये नं प्रतिष्ठितं निशम्य राज्ञां हृदये पुर्वं प्रधुमितः वह्निः उत्थितः इव।

३. प्ररूहतध्वजस्म इव तस्य नवाभुयत्थानदर्शिन्यः उन्नयनपंकतयः सप्रजाः प्रजा ननन्दुः।

४. द्विरगामिना तेन पित्र्यं सिंहासनम् अखिलम् अरिमण्डलं च समम् एव समाक्रान्तम्।

५. पद्मा स्वयं अदृश्य किल छायामण्डललक्षेण पद्मातपत्रेण साम्राज्यदीक्षितम् तं भेजे।

६. सरस्वती च काले काले वन्दिषु परकिल्पितसान्निध्या अर्थाभिः स्तुतिभिः सुत्यं तं उपतस्थे।

७. यद्यपि मनुप्रभृतिभिः मान्यैः राजभिः वसुन्धरा भुक्ता तथापि तस्मिन् अनन्यपुर्वा इव आसीत्।

८. हि सः युक्तदण्डतया सर्वस्य लोकस्य मनः नातिशीतोष्णः दुक्षिणः नभस्वान् इव आददे।

९. सहकारस्य फलेन पुष्पोदगमे इव गुणाधिकतया तेन प्रजाः गुरौ मन्दोत्कण्ठाः कृताः।

१०. नवे ताजि नयविदथिः सत् असत् च उपदर्शितिम्। तस्मिन् पूर्व एव पक्षः अभवत् उत्तरः अथवत्।

११. पञ्चानाम् अपि भुतानाम् उत्कर्ष पुपुषुः। तस्मिन् महीपाले सर्वं नवमिवाभवत्।

१२. यथा चन्द्रः प्रह्लादनात् (अन्वर्थः तपनं प्रतापात (अन्वर्थ) तथौव स राजा प्रकृतिरञ्जनात अन्वर्थ अभुत्।

१३. तस्य विशाले लोचने कामं कर्णान्तविश्रान्ते चक्षुष्मत्ता तु सूक्ष्मकार्यार्थदर्शिना शास्त्रेण (अभुत्)।

१४. अथ लब्धप्रशमनस्वस्हम् एनम् पङ्कजलक्षणा शरत द्वितीया पार्थिवश्रीरिव समुपस्हिता।

१५. निवृष्टलधुभिः मेघैः मुक्तवर्त्मा सुदुःसहः तस्य भानोश्च प्रतापः युगपत् दिशः व्यानशे।

१६. इन्द्रः वार्षिकं धनुः संजहार रघुः जैत्रं (धनुः) दधौ। हि तौ प्रजार्थसाधने पर्य्याय द्योतकार्मुकौ।

१७. पुण्डरीकातपत्रः विकसत् काश्चामरः ऋतुः तं विडम्वयामास तच्छ्रियम् पुनः न प्राप।

१८. प्रसादसुमुखे तस्मिन् विशदप्रभे चन्द्रे च द्वयो चक्षुष्मतां प्रीतिः समरसा आसीत्।

१९. हंसश्रेणीषु तारासु कुमुद्व्यसु च तदीयानां यशसां विभुतयः पर्य्यता इव।

२०. इक्षुच्छायानिषादिन्यः शालिगोप्यः गोषुः तस्य गुणोदयम् आकुमारकभोद्घातम् यशः जगुः।

२१. महोजसः कुम्भयोनेः उदयात् अम्भः प्रससाद (महोजसः) रघोः अभिभवाशंकि द्विषतां मनः चुक्षुभे।

२२. मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः महोक्षाः तस्य लीलाखेलम् विक्रमम् अनुप्रापुः।

२३. रमदगन्धिभिः सप्तपर्णानां प्रसवैः आहताः तन्नागाः असूयमेव सपुधेव प्रसुस्रुबुः।

२४. सरितः गाधाः पथः च आश्यानकर्दमान् कुर्वती शरत् तं शक्रेः प्रथमं यात्रायै

नोदयमास्।

২৫. वाजिनीराजनाविधौ सम्यक् हुतः वह्निः प्रदक्षिणार्चिव्याजेन हस्तेन इव तस्मै जयं ददौ।

৩.৪.৩ श्लोकानाम् असमीयानुवादः

- সন্ধ্যাকালত সূর্য্য নিহিত তেজপ্রাপ্ত হৈ অগ্নি যিদৰে অধিক প্রদীপ্ত হয়, সেইদৰে ৰঘুয়ো পিতৃ প্রদত্ত সাম্রাজ্য লাভ কৰি অধিক শোভা লাভ কৰিলে।
- দিলীপৰ পিছত তেওঁক (ৰঘুক) সাম্রাজ্যত অভিষিক্ত হোৱা শুনি ৰজাসকলৰ অন্তৰত আগৰপৰাই ধূমায়িত হৈ থকা ঈর্ষানল যেন প্রজ্জ্বলিত হ'ল।
- যিদৰে লোকসকলে উর্দ্ধনেত্রে ইন্দ্রধ্বজৰ অভ্যুত্থান দর্শন কৰি পুলকিত হয়, তেনেদৰে প্রজাসকলে সন্ততিসকলৰে সৈতে ৰঘুৰ অভিনৱ অভ্যুদয় দর্শন কৰি আনন্দিত হ'ল।
- গজেন্দ্রগামী সেই ৰঘুই একেসময়তে পৈতৃক সিংহাসন আৰু সমগ্র শত্রুমণ্ডলৰ ওপৰত অধিষ্ঠিত হ'ল।
- সাম্রাজ্যত অভিষিক্ত ৰঘুক স্বয়ং ৰাজলক্ষ্মীয়ে যেন অদৃশ্যভাৱে থাকি প্রভাৰ দ্বাৰা অনুমেয় পদ্মছত্র ধাৰণ কৰি সেৱা কৰিব ধৰিলে।
- সৰস্বতীও যথাসময়ত বৈতালিকসকলৰ কণ্ঠত সন্নিধান কৰি সদর্থযুক্ত স্তবেৰে স্তুতিৰ যোগ্য তেওঁক (ৰঘুক) স্তুতি কৰিব ধৰিলে।
- যদিও পৃথিৱী মনু আদি মাননীয় ৰজাসকলৰ দ্বাৰা উপভুক্তা হৈছিল, তথাপি ৰজা ৰঘুৰ ওচৰত অনন্য উপভুক্তাৰ নিচিনা দেখা গৈছিল।
- সেইবাবে তেওঁ অর্থাৎ ৰঘুই যুক্তিসংগত দণ্ডপ্রদান কৰি নাতিশীতোষ্ণ দক্ষিণৰ বায়ুৰ নিচিনাকৈ সকলো মানুহৰে মন হৰণ কৰিলে।
- যিদৰে আমগছৰ ফল হ'লে মানুহে ফুলৰ কথা পাহৰি যায়, সেইদৰে ৰঘুৰ গুনাধিক্যবশতঃ পিতৃ দিলীপৰ প্রতি প্রজাসকলৰ ঔৎসুক্য হ্রাস কৰিলে।
- নীতিশাস্ত্রবিশাৰদ মন্ত্রীসকলে সেই নতুন ৰজাক ভাল-বেয়া দুয়োবিধ নীতিৰেই উপদেশ দিলে। কিন্তু তেওঁ সৎ উপদেশেই গ্রহণ কৰিলে, অসৎ উপদেশ নল'লে।
- পৃথিৱী আদি পঞ্চমহাভূতৰ গুণসমূহেও উৎকর্ষ লাভ কৰিলে। সেই নতুন ৰজাৰ ৰাজত্বকালত সকলোৱেই নতুন যেন বোধ হ'ল।
- আহ্লাদ বিতৰণ কৰাত ইন্দুৰ 'চন্দ্র'নাম আৰু তাপ প্রদানত সূর্য্যৰ 'তপন' নাম যিদৰে সার্থক হৈছে, সেইদৰে প্রজাৰঞ্জন কৰি তেওঁৰ 'ৰজা' এই নাম সার্থক হৈছে।
- তেওঁৰ (ৰঘুৰ) আকর্ণবিস্তৃত বিশাল চকুজুৰি থাকিলেও, সুক্ষ্মকার্য্যার্থদর্শী

শাস্ত্রজ্ঞানৰ দ্বাৰাই প্রকৃত দর্শনেন্দ্রিয়ৰ কার্য সম্পন্ন হৈছিল।

সকলোতে শান্তি স্থাপন হোৱাত সুস্থচিত্তে তেওঁ অৱস্থান কৰাত পদ্মপুষ্পশোভিত শৰৎকাল দ্বিতীয় ৰাজলক্ষ্মীৰ নিচিনাকৈ উপস্থিত হ'ল।

অতিশয়বৃষ্টি প্রদানৰ দ্বাৰা মেঘৰাজি অত্যন্ত লঘু হোৱা বাবে সূর্যৰ কিৰণৰ পথ উন্মুক্ত হৈছিল। সেয়েহে সূর্যৰ তাপ আৰু ৰঘুৰ দুঃসহ প্রতাপ একেসময়তে চাৰিওপিনে বিয়পি পৰিল।

ইন্দ্রই বর্ষাকালীন ধনু অপসাৰিত কৰিলে, ৰঘুই জয়শীল ধনু ধাৰণ কৰিলে। কাৰণ তেওঁলোক দুয়োৰেই ধনু প্রজাসকলৰ হিতসাধনৰ বাবে পর্যায়ক্রমে উদ্যত হয়।

শৰৎঋতুৰে শ্বেতপদ্মৰূপছত্র আৰু বিকশিত কাশপুষ্পৰূপ চামৰেৰে শোভিত হৈ ৰঘুক অনুকৰণ কৰিলে। কিন্তু তেওঁৰ নিচিনা শোভাৰ অধিকাৰী হ'ব নোৱাৰিলে।

সেই সময়ত চক্ষুষ্মান্ ব্যক্তিমাত্রেই ৰঘুৰ সুপ্রসন্ন মুখকান্তি আৰু নির্মলকান্তি চন্দ্রৰ শোভা দর্শন কৰি তুল্যৰূপ আনন্দ উপভোগ কৰিলে।

তেওঁৰ (ৰঘুৰ) যশস্যাৰ বিভূতি যেন হংসমালা, নক্ষত্রপুঞ্জ আৰু কুমুদশোভিত জলাশয়ত বিয়পি পৰিল।

কুহিয়াৰ গছৰ ছাঁত বহি শালিধানৰখীয়া কৃষক ৰমনীসকলে প্রজাপালক তেওঁৰ (ৰঘুৰ) গুণসম্ভূত ইন্দ্রাদিবিজয়ৰ কীর্তিসমূহ বাল্যকালীন বৃত্তান্তৰ পৰা আৰম্ভ কৰি গাবলৈ ধৰিলে।


মহাপ্রভাবী অগস্ত্যৰ উদয়ত পানী নির্মল হ'ল। কিন্তু প্রতাপী ৰঘুৰ অভ্যুদয়ত শত্রুসকলৰ হৃদয় পৰাজয়ৰ আশংকাত কলুষিত অর্থাৎ মলিন হ'ল।

মদোদ্ধত বিশাল ককুদ্‌যুক্ত প্রকাণ্ড ষাড়গৰুবিলাকে নদীৰ পাৰৰ মাটি খুচৰি যেন ৰঘুৰ চিত্তাকর্ষক বিক্রমলীলাৰ অনুকৰণ কৰিবলৈ ধৰিলে।

মদগন্ধী সপ্তপর্ণ গছৰ ফুলৰ দ্বাৰা আহত হৈ যেন ঈর্ষাবশতঃ ৰঘুৰ হাতীবোৰে সপ্তদ্বাৰেৰে মদক্ষৰণ কৰিব ধৰিলে।

শৰৎকালে নদীবিলাক সহজে পাৰ হ'ব পৰা আৰু পথসমূহ বোকাহীন কৰি তুলি নিজৰ উৎসাহশক্তিৰ পূর্বেই তেওঁক (ৰঘুক) যুদ্ধযাত্রাৰ বাবে উৎসাহিত কৰিলে।

ঘোঁৰাবিলাকৰ নীৰাজনাৰূপ মাঙ্গলিককার্যত যথাবিধি অগ্নিত আহুতি প্রদান কৰাত (অগ্নিৰ) দক্ষিণপিনে যোৱা শিখাই যেন তেওঁক হাতেৰে বিজয় প্রদান কৰিলে।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: रघुः कस्मिन् ऋतौ विजयम् आरब्धवान् ?

.....

प्रश्नः २: रघुः प्रथमं कस्मिन् दिशि गतः ?

.....

प्रश्नः ३: हिमालये रघुना पराजितवर्ततगोत्रस्य नाम कः ?

.....

प्रश्नः ४: दिग्विजयानन्तरं रघुः किं यज्ञं कृतवान् ?

.....

प्रश्नः ५: रघुः कस्मात् राज्यं प्राप्तवान् ?

.....

७.५ श्लोकानां व्याख्या

१. सः= रघुः, गुरुणा = पित्रा, (दिलीपेन) दत्तम् = प्रदत्तम् विसृष्टम् इति वा। राज्यम् = प्रजापालनात्मकं राजकर्म, आधिपत्यम् इति वा। प्रतिपद्य = प्राप्य, दिनान्ते =सायङ्काले, सवित्रा= भास्करेण, निहितम्= संस्थापितम्, तेजः= कान्तिम् दीप्तिम् वा। प्रतिपद्य हुताशनः= अग्निः, इव= यथा, अधिकम्= अत्यन्तम्, बभौ= शुशुभे।

२. दिलीपानन्तरम् =राजादिलीपस्य पश्चात्, राज्ये = राजकर्म्मणि, तम् = रघुम्, प्रतिष्ठितम् = कृतास्पदम् श्रवस्थितम् इति वा। निशम्य = श्रुत्वा, पूर्वम् = राजादिलीपराज्यकाले, राज्ञाम् = भूपालानाम्, हृदये = हृदि मनसि वा। प्रधूमितः= प्रकर्षेणधूमोऽस्य संजातः, संजातधूमः, अग्निः = सन्तापवह्निः, उत्थितः = प्रज्वलितः, इव =यथा, अभूत् = बभूव।

३. सप्रजाः= ससन्तानाः, प्रजाः= जनाः, पुरुहूतध्वजस्य= इन्द्रकेतोः, इव= यथा, तस्य=राज्ञः रघोः, नवाभ्युत्थानदर्शिन्यः= नूतनाभ्युदयाऽवसोकिन्यः, अत एव उन्नयनपङ्क्तयः= ऊर्ध्वावलोकनमुखाः, ननन्दुः= आनन्दं प्रापुः।

४. द्विरदगामिना= कुञ्जरगामिना गजगामिना इति वा। तेन=रघुणा, पित्र्यं= जनकसम्बन्धि, सिंहासनं= सिंहचिह्नितासनम् राजासनम् इति वा। अखिलम्= सकलम्,अरिमण्डलम्= वैरिराष्ट्रमण्डलम्, च 'एतत्' द्वयम्=द्विसङ्ख्याकम्, समम् एव= युगपदेव, समाक्रान्तम्= अधिष्ठितम्।

५. पद्मा= श्रीः लक्ष्मी इति वा। स्वयम्= आत्मना, अदृश्या= अलक्ष्या, सती छायामण्डललक्ष्येण=कान्तपुञ्जानुमेयेन, पद्मातपत्रेण= कमलच्छत्रेण, साम्राज्यदीक्षितम्= मण्डलाधिपत्याभिषिक्तम्, तं= रघुम्, भेजे= सिषेवे।

६. काले-काले= सर्वेष्वपि शास्त्रोचितवेलासु, वन्दिषु= स्तुतिपाठकेषु,

परिकल्पितसान्निध्या=परिनिष्ठितसन्निधाना सती, स्तुत्यम्= स्तुतियोग्यम्, तम्= राजारघुम्, अर्थ्याभिः= अर्थयुक्ताभिः, स्तुतिभिः= स्तोत्रैः, उपतस्थे= भेजे।

७. यद्यपिवसुन्धरा= पृथिवी, मनुप्रभृतयः= वैवस्वतमन्वादिभिः, मान्यैः= पूजनीयैः माननीयैः इति वा। राजभिः= भूपैः, भुक्ता=उपयुक्ता, तथापि तस्मिन् = रघौ, अनन्यपूर्वा= नेतरोपभुक्ता, इव, आसीत्= अभूत्।

८. हि = यतः, सः = रघुः, युक्तदण्डतया = यथापराधदण्डदानेन, नातिशीतोष्णः = समशीतोष्णः, दक्षिणः = दक्षिणदिक्सम्भवः, नभस्वान् = पवनः, इव= यथा, सर्वस्य=सम्पूर्णस्य, लोकस्य = जनस्य, मनः = मानसम्, आददे = जहार।

९. तेन= रघुणा, प्रजाः= जनाः, गुरौ= दिलीपविषये, सहकारस्य= आम्रस्य, फलेन= प्रसवेन, पुष्पोद्गमे= कुसुमोदये, इव= यथा, गुणाधिकतया= औदार्य्यप्रभावादिगुणादिगुणाधिक्येन, मन्दोत्कण्ठाः= न्यूनौक्या, कृताः= विहिताः।

१०. नयविद्भिः= नीतिशास्त्रज्ञैः, नवे= नूतने, राज्ञि= नृपविषये, सद्= धर्मयुद्धादिकम्, असत्= कपटयुद्धादिकम्, च, उपदर्शितम्= प्रोक्तम्, तस्मिन्=राज्ञौ पूर्वः एव पक्षः= धर्मपक्षः, अभवत्= आसीत्, उत्तरः पक्षः= अधर्मपक्षः, न अभवत्= नासीत्।

११. पञ्चानाम्= पञ्चसङ्ख्यकानाम्, भूतानाम्= पृथिव्यप्तेजोवाय्वाकाशानाम्, गुणाः= गन्धादयः अपि, उत्कर्षम्= अतिशयम्, पुपुषुः=प्रापुः, तस्मिन् = रघौ, नवे= नवीने, महीपाले= राज्ञे, सर्वम्= विपुलम्, नवम्= नूतनम्, इव= यथा, अभवत् = आसीत्।

१२. यथा= येन प्रकारेण, चन्द्रः = इन्दुः, प्रह्लादनात्= आह्लादजननात्, अन्वर्थो भवति यथा च, तपनः= सूर्य्यः, प्रतापाद्= सन्तापजननात्, अन्वर्थो भवति तथा तेन प्रकारेण, एव, सः राजा = रघुः, प्रकृतिरञ्जनात्= प्रजानुरागजननाद्, अन्वर्थः= सार्थकनामा, अभूत्= बभूव।

१३. तस्य= रघोः, विशाले= विस्तृते, लोचने= नयने, कामम्= भृशम्, कर्णान्तविश्रान्ते= श्रोतप्रान्तगते,आस्ताम्, तस्य चक्षुष्मत्ता= नेत्रवत्त्वम्, तु, सूक्ष्मकार्यार्थदर्शिना= दुर्विज्ञेयकर्तव्यार्थप्रकाशिना, शास्त्रेण=धर्ममार्गादिप्रतिपादकेन वेदादिना, आसीत्।

१४. अथ लब्धप्रशमनस्वस्थम्= प्राप्तराज्यस्थिरीकरणसमाहितचित्तम्, एनम्= रघुम्, पङ्कजलक्षणा= कमलचिह्ना, शरद्= शरद्ऋतु, द्वितीया= अन्या, पार्थिवश्रीः= राजलक्ष्मीः इव, समुपस्थिता= प्राप्ता।

१५. निर्वृष्टलघुभिः= जलवर्षणगुरुभिः, मेघैः= घनैः, मुक्तावर्त्मा= त्यक्तमार्गः,अत एव सुदुःसहः= सोढुमशक्यः, तस्य= रघोः, भानोः= सूर्यस्य, च= तथा, प्रतापः= तेजः, युगपत्= एककालमेव, दिशः= आशाः, व्यानशे= व्याप।

१६. इन्द्रः= शक्रः, वार्षिकम्= वर्षासु भवं वार्षिकम् इति, धनुः= शरः, संजहार= संयतवान्, रघुः जैत्रम्= विजयशीलम्,धनुः= स्वशरम्, दधौ= धारयामास, हि= यस्मात् कारणात्, तौ= इन्द्ररघु, प्रजार्थसाधने= वृष्टिधनलक्षणप्रयोजनसाधनविषये, पर्यायोद्यतकार्मुकौ= क्रमश उद्यतचापौ, आस्ताम्।

१७. पुण्डरीकातपत्रः= सिताम्भोजच्छत्रः, विकसत्काशचामरः= प्रफुल्लितकाशव्यजनः, शरदृतुः, तम्= रघुम्, विडम्बयामास= अनुचकार, पुनः= किन्तु, तच्छ्रियम्= रघुशोभाम्, न प्राप= प्राप्नोत्।

१८. तदा= तस्मिन् समये, प्रसादसुमुखे= प्रसन्नशोभानने, तस्मिन्= रघौ, विशदप्रभे= धवलकान्तौ, चन्द्रे= इन्दौ, च द्वयोः= उभयोरपि विषये, चक्षुष्मताम्= नयनवताम्, प्रीतिः= आसक्तिः, समरसा= तुल्यस्वादा, आसीत्।

१९. तदीयानाम्= तदीयानाम्, यशसाम्= कीर्तीनाम्, विभूतयः= ऐश्वर्याणि, हंसश्रेणीषु= मरालपङ्क्तिषु, तारासु= नक्षत्रेषु, कुमुद्व= कुमुदयुक्तेषु, वारिषु= जलेषु च, पर्यस्ताः = प्रसारिताः इव।

२०. इक्षुच्छायानिषादिभ्यः= इक्षुच्छायोपलेशिन्यः, शालिगोप्यः= सस्यपालिकाः,'स्त्रियः' गोप्तुः= रक्षकस्य, तस्य=रघोः, गुणोदयम्= सौन्दर्य्यादिगुणप्रकाशम्, आकुमारकथोद्घातम्= कुमारैरपि संस्तूयमानम्, यशः= कीर्तिः, जगुः= अगायन्।

२१. महौजसः= महापराक्रमस्य, कुम्भयोनेः= अगस्त्यस्य, उदयाद्= आविर्भावात्, अम्भम्= जलम्, प्रससाद= निर्मलं बभूव, रघोः अभिभवाशङ्किः= पराभवाशङ्कि, द्विषताम्= वैरीणाम्, मनः= चित्तम्, चुक्षुभे= कालुष्यं प्राप।

२२. मदोदग्राः= गर्वोन्मत्ता, ककुद्मन्तः= ककुद् एषामस्तीति (महाककुदः), सरिताम्= नदीनाम्, कूलमुद्रुजाः= तटविदारकाः, महोक्षाः= महाकायाबलीवर्दा, तस्य=रघोः, लीलाखेलम्= विलाससुभगम्, विक्रमम्= पराक्रमम्, अनुप्रापुः= अनुचक्रुः।

२३. मदगन्दिभिः= मदसदृशगन्धैः, सप्तपर्णानाम्= सप्तपर्णवृक्षाणाम्, प्रसवैः= पुष्पैः, आहताः= ताडिताः, तन्नागाः= रघुगजाः, असूयया= स्पर्धयया, इव= नूनम्, सप्तधा= सप्तप्रकारेण, एव प्रसुस्त्रुवुः= मदक्षरणं चक्रुः।

२४. सरितः= नदीः, गाधाः= स्वल्पजलाः, पथः= मार्गान्, च अश्यानकर्दमान्= शुष्कपङ्कान्,'कुर्वती' सती, शरत्= शरदृतुः, शक्तेः= डाहशक्तेः, प्रथमम्= प्राक्, तम् =रघुम्, यात्रायै= दण्डयात्रायै दिग्विजयायेत्यर्थः, चोदयामास= प्रेरयामास।

२५. वाजिनीराजनाविधौ= अश्वनीराजनाख्यशान्तिकर्मणि, सम्यक् = यथाशास्त्रम्, हुतः= तर्पितः, वह्निः= अग्निः, प्रदक्षिणार्चिर्व्याजेन= प्रदक्षिणपरिक्रमणज्वलाच्छलेन,'अत एव' हस्तेन=करेण इव, तस्मै= रघवे, जयम्= विजयम्, ददौ= दत्तवान्।

७.६ श्लोकानां व्याकरणांशाः (प्रकृतिप्रत्ययसमाससहितम्)

१. दत्तम् - दाधातुः+ क्तः प्रत्ययः। बभौ - भा दीप्तौ धातुः, लिट् प्र.पु. एकवचनम्। हुताशनः- हुतमशनं यस्य सः हुताशनः बहुव्रीहिसमासः।

२. प्रतिष्ठितम् - प्रति उपसर्गपूर्वकं + स्था धातुः +क्तः प्रत्ययः। प्रधूमितः - प्रकृष्टो धूमः प्रधूमः, प्रधूमोऽस्य संजातः प्रधूमितः।

३. ननन्दुः - टुनदिं समृद्धौ धातुः, लिट् प्र.पु. बहुवचनम्।
प्रजा - प्रजायते इति। प्र उपसर्गपूर्वकम्, जन् धातुः।

४. द्वयम् - द्वौ अवयवौ यस्य इति। द्वि + तयप् (संख्याया अवयवे तयप्)। द्विरदः - द्वौ रदौ यस्य सः द्विरदः (बहुवीहिः)

५. पद्मा - पद्मं वासस्थलत्वेनास्त्यस्याः। अर्श आदिभ्योऽच् (अच्टापौ) लक्ष्मीः इत्यर्थः। भेजे -भज् सेवायाम् लिट् प्र.पु.एकवचनम् (आत्मनेपदि)।

६. स्तुत्यम् - स्तुधातुः + क्यप्प्रत्ययः (तुगागमः)। सरस्वती - सरो नीरं तद्वत् रसो वास्त्यस्या इति। सरस् + मतुप्प्रत्ययः।

७. आसीत् - अस् धातुः लङ्लकारः प्र.पु.एकवचनम्। वसूनि धरतीति वसुन्धरा। धृ + खच्प्रत्ययः(संज्ञायां भृतृवृजिधारिसहितपिदमः)

८. मनः नपुंसकलिङ्गम्। आददे - आङ् उपसर्गः, दा धातुः लिट्लकारः उ.पु.एकवचनम् (आत्मनेपदि)।

९. मदोत्कण्ठाः - मन्दा उत्कण्ठा यासां ताः मन्दोत्कण्ठाः(बहुव्रीहिसमासः)

१०. नयविद्भिः - नयं नीतिशास्त्रं विदन्तीति नयविद्भिः। उपदर्शितम् - उप उपसर्गपूर्वकम्, दृश्धातुः क्तप्रत्ययः।

११. महीं पालयतीति महीपालः(द्वितीयातुरुषः)। पुपुषुः - पुष पुष्टौ क्र्यादिधातुः, लिट्लकारः प्र.पु.बहुवचनम्।

१२. चन्द्रः - चन्दयति आह्लादयति चन्दति दीप्यते इति वा। चन्द + रक्प्रत्ययः(स्फायितञ्चीति उणादिप्रत्ययः)। तपनः - तप + ल्युट्प्रत्ययः। (भानुर्हंसः सहस्त्रांसुस्तपनः सवितारविः इत्यमरः)।

१३. कर्णान्तविश्रान्ते - कर्णयोः अन्तौ कर्णान्तौ, कर्णान्तयोः विश्रान्ते कर्णान्तविश्रान्ते।

१४. एनम् - इदम् शब्दः द्वितीयैकवचनम्। पृथिव्या ईश्वरः पार्थिवः, पार्थिवस्य श्रीः पार्थिवश्रीः।

१५. मेघः - मेहतीति मेघः। मिह् + अच् (न्यङ्क्वादीनाञ्च)।

१६. वार्षिकम् - वर्षासु भवम् इति। वर्षा + ठक् (वर्षाभ्यष्ठक्)। दधौ -धेट् पाने धातुः, लिट्लकारस्य प्र. पु. एकवचनम्।

१७. प्राप - प्रा पूरणे धातुः।

१८. सुमुखः - सुष्ठु मुखं यस्य सः (बहुव्रीहिः)। विशदा प्रभा यस्य सः विशदप्रभः, तस्मिन् विशदप्रभे।

१९. हंसानां श्रेण्यः हंसश्रेण्यः, तासु हंसश्रेणीषु। (षष्ठीतत्पुरूषः)

२०. यशः नपुंसकलिङ्गशब्दः। जगुः - गै शब्दे भ्वादिगणिधातुः, लिट्लकारस्य प्र. वि. बहुवचनम्।

२१. महत् ओजः यस्य सः महौजाः तस्य महौजसाः (बहुव्रीहिः)। चुक्षुभे - क्षुभ सञ्चलने भ्वादिगणिधातुः, लिट्लकारस्य प्र.वि.एक।

२२. मदोदग्राः - मदेन उदग्राः मदोदग्राः(तृतीयातत्पुरूषः)।

२३. मदस्येव गन्धो येषां ते मदगन्धिनः, तैः मदगन्धिभिः(बहुव्रीहिः)। प्रसुस्रुवुः - प्र उपसर्गपूर्वकं स्रु गतौ धातुः, लिट्लकारस्य प्र. वि.बहुवचनम्।

२४. आश्यानकर्दमान् - आसमन्तात् स्यानः कर्दमः येषां ते आश्यानकर्दमाः तान् आश्यानकर्दमान्। कुर्वती - शतृप्रत्यान्तम् (स्त्रीलिङ्गे)।

२५. तस्मै - तद्शब्दात् चतुर्थ्यैकवचनम् (पुल्लिङ्गे)। ददौ - दा धातुः, लिट्लकारस्य प्र.वि. एकवचनम् (भ्वादिगणि)।



७.७ अध्यायात् किमवगतम्

- अस्य सर्गस्य पङ्क्तिशः ज्ञानम्
- रघोः पराक्रमस्य नीतिविद्यायाश्च ज्ञानं प्राप्तम्।
- प्रत्येकश्लोकस्य अन्वयः कथं केन प्रकारेणाभवत्।
- व्याकरणगतजटिलशब्दानां प्रकृतिप्रत्ययस्य विशेषज्ञानं प्राप्तवन्तः।



७.८ ज्ञानाधिक्यम्

१) काले, एम. आर.(सम्पा.) रघुवंशम् अव् कालिदासः (१-५), दिल्ली; मोतीलाल बनारसीदास पब्लिक प्राईवेट लिमिटेड।

२) गोस्वामी, डॉ मालिनी (२००९) रघुरपि काव्यम्, गुवाहाटी चन्द्रप्रकाशः।

३) संस्कृतसाहित्यसम्भारः (VOL- X) (१९८१) नवपत्रप्रकाशनम्।



७.९ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : रघुः शरदऋछतौ विजयं प्रारभत्।

प्रश्नः २ : उत्तरम् : रघुः प्रथमं पूर्वदिशि यात्रां कृतवान्।

प्रश्नः ३ : उत्तरम् : हिमालये रघुना पराजितस्य पर्वतजनजातेः नाम उत्सवसंकेत इति।

प्रश्नः ४ : उत्तरम् : रघुः विश्वजित् यज्ञं कृतवान्।

प्रश्नः ५ : उत्तरम् : रघुः राजा दिलीपात् राज्यं प्राप्तवान्।



७.१० अभ्यासप्रश्नाः

प्रश्नः १ : स्वबुद्ध्यानुसारेण अस्य सर्गस्य सारांशं लिखन्तु ?

प्रश्नः २ : रघुवंशस्य सञ्जीवनीटीका कस्य ?

प्रश्नः ३ : रघुशब्दस्य रूपाणि स्मरन्तु ?

प्रश्नः ४ : लघुत्रय्यां के ग्रन्थाः भवन्ति ?

प्रश्नः ५ : प्रथमतः तृतीयसर्गपर्यन्तं कः सर्गः सर्वोत्तमः ? कारणं किम् ?

प्रश्नः ६ : सुदक्षिणादिलीपौ नन्दिनीसेवां कथं केन प्रकारेण च अकुरुताम् ?

रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३००-५०० शब्देषु लिखन्तु)

प्रश्नः ७ : रघोः दिग्विजये यथा वर्णितं तथा शरदस्य वर्णनं लिखन्तु।

प्रश्नः ८ : रघोः गुणान् वर्णयतु।

*** ***** ***

अध्यायः ८ : रघुवंशम्- चतुर्थसर्गः (श्लोकाः २६-५०)

अध्यायस्य संरचना

८.१ उद्देश्यम्

८.२ परिचयः

८.३ चतुर्थसर्गस्य सारांशः

८.४ चतुर्थसर्गस्य श्लोकाः (२६-५०)

८.५.१ श्लोकानाम् अन्वयः

८.४.२ श्लोकानाम् अर्थः

८.४.३ श्लोकानाम् असमीयानुवादः

८.४.४ श्लोकानां व्याख्या

८.५ श्लोकानां व्याकरणांशाः (प्रकृतिप्रत्ययसमाससहितम्)

८.६ अध्यायात् किमवगतम्

८.७ ज्ञानाधिक्यम्

८.८ अग्रगत्याः निरूपणम्

८.९ अभ्यासप्रश्नाः

८.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- रघुवंशविषये रूचिं प्रदर्शयन्ति।
- विहङ्गमदृष्ट्या कविकुलगुरुकालिदासस्य रघुवंशमहाकाव्यस्य च सम्बन्धे ज्ञातुं प्राप्तुं शक्नुवन्ति।
- चतुर्थसर्गस्य विशेषज्ञानम् अर्जयन्ति।
- नीतिशास्त्रवेत्ता रघुः कथं केन च अनुशासनम् अकरोत् तदपि ज्ञानं प्राप्यते।
- कनिष्ठिकाधिष्ठितकालिदासस्य भाषाशैलीमपि ज्ञातुं शक्यते।

८.२ परिचयः

प्रमुखमहाकाव्येषु रघुवंशमहाकाव्यम् अन्यतमम् इति सर्वे प्रायः जानन्त्येव। यतोहि इदं काव्यं भाषासु व्याकरणशैलीसु प्राकृतिकसौन्दर्येषु च अलौकिकं वर्त्तते। सर्वादौ मङ्लाचरणे पार्वतीशिवयोः आराधनां कृत्वा अस्य महाकाव्यस्य प्रारम्भोऽभवत्। राजावैवस्वतमनुतः अग्निवर्णपर्यन्तम् अत्र सूर्यवंशीयराज्ञां वर्णनम् अस्ति। तेषां कीर्तिः अलौकिकशौर्यञ्च कीदृशम् भवति स्म। इत्येतान् विषयान् अस्मिन् काव्ये ज्ञातुं शक्नुवन्ति। सर्वेषु सर्गेषु नूतनाः कथाः प्रदर्शिताः कविकुलगुरूकालिदासेन। प्रस्तुतसर्गे राज्ञः रघोः शौर्यस्य कीर्तेश्च वर्णनम् अत्र दृश्यते।

८.३ चतुर्थसर्गस्य सारांशः

रघुवंशस्य चतुर्थसर्गस्य अध्ययनेन चिन्तनेन च कीदृशस्य राजारघोः पराक्रमतेजसी ज्ञातुं शक्नुमः वयम्। पिताद्वारा प्रदत्तं राज्यं तस्य राज्यस्य विस्तारिकरणं स्वस्य बलेन कथं स राजा रघु अकरोत् अत्र ज्ञातुं शक्यते। धर्मनीतिज्ञः रघुः स्वस्य पराक्रमेण राज्यस्यानुशासनं कृतवान्।

सर्वे राज्ञः रघोः पराक्रमं दृष्ट्वा मनसि ईर्ष्यां कुर्वन्ति स्म। राजारघुः शस्त्रनीत्या शास्त्रनीत्या च स्वस्य प्रतिद्वन्दीनाम् पराजितं कृत्वा पुनः तेषां पुनः राज्यं दत्तवान्। येन रघोः कीर्तिः अनुशासनं च एधते। राजारघुः उत्तमरूपेण राज्यानुशासनं कृत्वा प्रजाहितकारिणि कार्याणि अकरोत्। तदनन्तरं विश्वविजयं कृत्वा विश्वजित् यज्ञस्यानुष्ठानं कृत्वा विप्रेभ्यो बहुनि धनानि अददात्।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: लाजः शब्दस्य प्रतिशब्दः लिखतु ?

.....

प्रश्नः २: प्राचीनवर्हिषा शब्दस्य अर्थः लिखतु ?

.....

प्रश्नः ३: गुप्तमूल प्रत्यन्तः इति शब्दस्य अर्थः लिखतु ?

.....

प्रश्नः ४: काकुत्स्थ इति शब्दस्य अर्थः लिखतु ?

.....

प्रश्नः ५: वंगदेशः कुत्र अवस्थितः ?

.....

८.४ चतुर्थसर्गस्य क्रमेण श्लोकाः (२६-५०)

स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्विजगीषया॥ २६

अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः।
पृषतैर्मदरोद्भूतैः क्षीरोर्मय इवाच्युतम्॥ २७

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः॥ २८

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्॥ २९

प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः॥ ३०

मरूपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः॥ ३१
स सेनां महतीं कर्षन् पूर्वसागरगामिनीम्।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः॥ ३२
त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः॥ ३३
पौरस्यानेवमाक्रामंस्तांस्तज्ञनपदाञ्जयी।
प्राप तालीवनश्याममुत्कण्ठं महोदधेः॥ ३४
अनम्राणां समुद्धर्तुस्तस्मान्धिुरयादिव।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम्॥ ३५
वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान्।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः॥ ३६
आपादपद्मप्रणताः कलमा इव ते रघुम्।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः॥ ३७
स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ॥ ३८
स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत्।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः॥ ३९
प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः॥ ४०
द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम्।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम्॥ ४१
ताम्बूलीनां दलैस्तत्र रचिताऽऽपानभूमयः।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः॥ ४२
गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्॥ ४३
ततो वेलातटेनैव फलवूगमालिना।
अगस्त्याचरितामाशामनाशास्यजयो ययौ॥ ४४
स सैन्यपरिभोगेण गजदानसुगन्धिना।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत्॥ ४५
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः॥ ४६
ससञ्जुरश्वक्षुण्णानामेलानामुतिष्णवः।

तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्।
नास्रसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ॥ ४८
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४९
ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः।
ते निपत्य तदुस्तस्मै यशः स्वमिव सञ्चितम् ॥ ५०

८.५.१ श्लोकानाम् अन्वयः (२६-५०)

२६. गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिः अयान्वितः सः षड्विधम् सैन्यम् आदाय दिग्जिगीषया प्रतस्थे।

२७. वयोवृद्धाः पौरयोपितः लाजैः पृषतैः क्षीरोर्मयः अच्युतम् इव तं अवाकिरन्।

२८. प्राचीनबर्हिषा तुल्यः सः अनिलोद्धूतैः केतुभिः अहितान् तर्जयन् इव प्रथमम् प्राचीम् दिशम् ययौ।

२९. स्यन्दनोद्धूतैः रजोभिः घनसन्निभिः गजैः च व्योम भुवः तलम् इव च भूतलम् व्योम इव कुर्वन् ययौ।

३०. अग्रे प्रतापः ततः शब्दः तदनन्तरम् परागः पश्चाद् रथादि इति सा चमूः चतुस्कन्धा इव ययौ।

३१. सः शक्तिमत्त्वात् मरुपृष्ठानि उदम्भांसि नाव्याः नदीः सुप्रतरा विपिनानि प्रकाशानि चकार।

३२. सः पूर्वसागरगामिनीम् महतीम् सेनाम् कर्षन् हरजटाभ्रष्टाम् गङ्गाम् इव बभौ।

३३. फलम् त्याजितैः उत्खातैः बहुधा भग्नैः नृपैः च पादपैः दन्तिनः इव तस्थ मार्गः उत्बणः आसीत्।

३४. जयी एवम् तान् तान् पौरस्यान् जनपदान् आक्रामन् (सन्) तालीवनश्याममम् महोदधेः उपकण्ठम् प्राप।

३५. सुहैः वैतसीम् वृत्तिम् आश्रित्य अनम्राणाम् समुद्धर्तुम् तस्मात् सिन्धुरयात् इव आत्मा संरक्षितः।

३६. नेतासः नौसाधनोद्यतान् बङ्गान् उत्खाय गङ्गास्रोतोऽन्तरेषु जयस्तम्भान् निचखान् स्थापितवानित्यर्थम्।

३७. आपादपद्मप्रणताः उत्खातप्रतिरोपिताः ते कलमाः इव रघुम् फलैः संवर्धयामासुः।

३८. सः बद्धद्विरदसेतुभिः सैन्यैः कपिशाम् तीर्त्वा उत्कलादर्शितपथः कलिङ्गाभिमुखः ययौ।

३९. सः महेन्द्रस्य मूर्ध्नि तीक्ष्णम् प्रतापम् यन्ता गम्भीरवेदिनः द्विरदस्य तीक्ष्णम् अङ्कुशम्

इव न्यवेशयत्।

४०. गजसाधनः कालिङ्गः अस्त्रैः तम् पक्षच्छेददोद्यतम् शक्रम् शिलावर्षी पर्वतः इव प्रतिजग्राह।

४१. काकुस्थः तत्र द्विषाम् नाराचदुर्दिनम् विषह्य सन्मङ्गलस्नात् इव जयश्रियम् प्रतिपेदे।

४२. तत्र योधाः रचितापानभूमयः सन्त ताम्बूलीनाम् दलैः नारिकेलासवम् यशः च पपुः।

४३. धर्मविजयी सः नृपः गृहीतप्रतिमुक्तस्य महेन्द्रनाथस्य श्रियं जहार मेदिनीम् तु न जहार।

४४. ततः अनाशास्यजयः फलवूगमालिना वेलातटेन एव अगस्याचरिताम् आशाम् ययौ।

४५. सः गजदानसुगन्धिना सैन्यपरिभोगेण कावेरीम् सरिता पत्युः शङ्कनीयाम् इव अकरोत्।

४६. विजिगीषोः गताध्वनः तस्य बलैः मारीचोद्भ्रान्तहारीताः मलयाद्रेः उपत्यकाः अध्युषिताः।

४७. अश्वक्षुण्णानाम् एलानाम् उतिष्णवः फलरेणवः तुल्यगन्धिषु मत्तेभटकेषु ससञ्जुः।

४८. चन्दनानाम् भोगिवेष्टनमार्गेषु समर्पितम् त्रिपदीछेदीनाम् अपि करिणाम् ग्रैवम् न अस्रसत्।

४९. दक्षिणस्याम् दिशि रवेः अपि तेजः मन्दायते पाण्ड्याः तस्याम् एव रघोः प्रतापम् न विषेहिरे।

५०. ते निपत्य तस्मै सञ्चितम् स्वम् यशः इव ताम्रपर्णीसमेतस्य महोदधेः मुक्तासारम् ददुः।

८.४.२ श्लोकानाम् अर्थः

२६. सः रघुः प्रथमं निजराष्ट्रदुर्गाणां सर्वतोभावेन रक्षणार्थं रक्षकान् नियुज्य यात्राकालयोग्यमखिलं मङ्गलञ्च विधाय मौलं भृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलम् इति षड्विधं बलमादाय दिशां जेतुमिच्छया प्रस्थानमकरोत्।

२७. समुद्रमन्थनसमये क्षीरोदधेस्तरङ्गपङ्क्तयः मन्दराचलमथनोत्थापितैर्जलबिन्दुभिः विष्णुं यथा व्याप्नुवत्यः तथैव रघोः विजयप्रयाणसमयेऽपि वृद्धाः नागरिकस्त्रियः मङ्गलार्थकलाजाः तस्योपरिवर्षन्तिस्म।

२८. इन्द्रसदृशः रघुः स्वकीयैः चमूध्वजैः अरिन् र्भयन् इव पूर्वदिशं गतवान्।

२९. धर्मनीतिमर्मज्ञरघुः स्वसेनागजैरभुवितलसंयुक्तं व्योमेव तथा स्यन्दनोत्थापितधूलिभिः व्योमधूलियुक्तं महितलमिव कुर्वन् अगच्छत्।

३०. दिग्विजयार्थं चलितस्य रघोः प्रतापमाहात्म्यं पुरश्चचाल अनन्तरं सैनिककलकलः

ततः रथोत्थापिता धूलिः तदनु तस्य सेना इत्थं सा कृतचतुर्विभागेव ययौ।

३१. सः शक्तिशालित्वात् जलरहितां भूमिं (मरूभूमिं) सजलां नावा तरणयोग्यां नदीं चरणतरणयोग्यां वृक्षाबाहुल्यात् दुर्गमाणि वनानि निर्वृक्षकरणेन सुगमानि चकार।

३२. भगीरथो यथा पूर्वपुरूषाणामुद्धारणार्थं शङ्करजटाजूटपतितां गङ्गाम् अनुगच्छन् शुशोभ तथैवायमपि रघुः दिग्विजयाय सेनां नयन् बभौ।

३३. महाबलोऽरण्यगजः गमनसमये पथि स्थितान् पादपान् स्वस्थानादुन्मूलितान् इतस्ततश्छिन्नभिन्नाँश्च कृत्वा वर्त्म यथा सर्वतः कण्टकरहितं करोति तथैव रघुरपि शत्रून् स्वपदपरिभ्रष्टान् बहुशः प्रनष्टांश्च कृत्वा निजं मार्गं सर्वथा कण्टकरहितम् अकरोत्।

३४. इत्थं प्रबलप्रतापाः सः रघुः पूर्वदिग्भवान्देशान् स्वायत्तीकुर्वन् तालवृक्षसमूहैः श्यामवर्णां महासागरस्य सीमां प्राप।

३५. यथा वेतसा नदीवेगेन प्रणताः सन्तः आत्मानं रक्षन्ति स च प्रणतान् तान् न उन्मूलयति तथैव रिपुसमुन्मूलयितुः प्रबलप्रतापस्य तस्य रघोरागमने सुह्मदेशीया राजानश्चरणप्रणता जाताः स च प्रणतान् तान् नोादयामास।

३६. वङ्गदेशीया राजानः रणनौकाः सज्जीकृत्य युद्धप्रवृत्ताः बभूवुः। रघुरपि तान् सकलान् बलेनोन्मूल्य तेषु प्रदेशेषु विजयस्तम्भान् निचखान।

३७. यथा धान्यविशेषाः कृषकेण स्वस्थानादुाट्य अन्यत्र रोपिताः सन्तः फलरभारेण तं पूरयन्ति तथैव बङ्गदेशीया अपि राजानः राज्ञा रघुणा प्राक् स्वपदाद्भ्रष्टा भूयोऽपि स्वपदे स्थापिताः सन्तश्चरणपर्यन्तं रघोः प्रणतमस्तका भूत्वा धनादिभिस्तं संवर्द्धयामासुः।

३८. ससैन्यः सः निजगजपरम्पराभिः सेतुं निर्माय कपिशानदीमुत्तीर्य उत्कलदेशीयैर्नृपैः प्रदर्शितमार्गः सन् कलिङ्गदेशं जेतुञ्जगाम।

३९. हस्तिपको यथा मदोन्मत्तस्य दुष्टगजस्य शिरसि तीक्ष्णं अङ्कुशं गाढं निवेशयन् तं दमयति तथैव रघुरपि स्वकीयं प्रबलं प्रतापं महेन्द्रस्य मूर्ध्नि न्यवेशयत्।

४०. यथा पर्वतः पक्षच्छेदे प्रवृत्ते महेन्द्रं शिलावृष्ट्या प्रतिरूणद्धिस्म तथैव गजारूढः कलिङ्गभूपतिरपि उदायुधं रघुम् अस्त्राणां वर्षणेन प्रतिजग्राह।

४१. यथा कश्चन नृपतिः प्रथमं पुण्यतीर्थसलिलैः अभिषिक्तो भूत्वा पश्चाद्राज्यलक्ष्मीं गृह्णाति तथैव अयमपि प्रथमं सपत्नास्त्रधाराभिः अभिषिक्तो भूत्वा अनन्तरं विजयलक्ष्मीं लेभे।

४२. शूरा योधाः महेन्द्राद्रौ पानयोग्यं स्थानं संविधाय ताम्बूलपत्ररचितैः पात्रैः अच्छं नारिकेलासवं स्वच्छं शत्रुयशश्च पीतवन्तः।

४३. धर्मविजयी रघुः प्राग् उन्मत्तभावेन आगतं संग्रामोद्यतं कलिङ्गनाथं निर्जित्य (वन्दीकृत्य) पश्चात् मोचयित्वा केवलं तस्य श्रियमेवाऽपहरत् न तु शरणागतस्य

तस्य राज्याधिकारम्।

४४. प्रबलप्रतापः स एवं पूर्वां दिशं निर्जित्य फलपरिपूर्णपूगतरूपङ्क्तिभिः सुशोभितेन समुद्रतटेन दक्षिणां दिशं जगाम।

४५. यथा काचन कामिनी परपुरुषसम्भोगलिङ्गैर्नखक्षतादिभिः स्वकान्तस्य मनसि पुरुषेतरोपभोगशङ्कामुदयति तथैव रघुसैनिकानां जलक्रीडादिभिः क्षुब्धसलिला एवं रघुगजानां दानजलैः सुगन्धीकृता सती सा कावेरी स्वभर्तुः समुद्रस्य सम्भोगलिङ्गदर्शनात् अविश्वसनीया जाता।

४६. विजयाभिलाषिणः रघोः सैनिकाः शुकपक्षिविशिष्टमारीचवृक्षवतो मलयाचलस्य मनोरमासु आसन्नभूमिषु ऊषुः।

४७. भूमौ निपतितानि अश्वखुरसञ्चूर्णितानि एलालतानां फलरजांसि स्वसदृशगन्धिषु मदोन्मत्तानां गजानां कुम्भस्थलेषु वायुवशात् संसक्तानि बभूवुः।

४८. चन्दनपादपेषु यत्र यत्र सर्पवेष्टनात् रेखाः सञ्जाताः तत्र तत्र पादबन्धनच्छेदनसमर्थानामपि गजानां ग्रीवाबन्धनं स्त्रस्तं नाभूत्।

४९. प्रखरप्रतापस्यापि सूर्यस्य तेजः दक्षिणस्यान्दिशि मन्दं भवति परन्तु तस्यामेव दिशि तद्देशीया एव राजानः पाण्डुदेशीयाः रघोः तेजः सोढुं समर्थो न बभूवुः एतदतीवाश्चर्यकरं यत् सूरविजयिनोऽपि असौ विजितवानिति रघोर्महानुत्कर्षो गम्यते।

५०. ते पाण्डुदेशीया राजानः ताम्रपर्णीनदीमिलितस्य समुद्रस्य 'सम्बन्धि' सञ्चितं मुक्तासारं, स्वकीयं सञ्चितं यश इव तस्मै रघवे प्रणामपूर्वकमुपायनी कृतवन्तः।

८.४.३ श्लोकानाम् असमीयानुवादः

- তেওঁ (ৰঘুই) প্ৰান্ত দুৰ্গ আৰু নিবাস দুৰ্গসমূহ সুৰক্ষিত কৰি আৰু পৃষ্ঠশত্ৰুক নিৰ্মূল কৰি অনুকূল দৈৱযুক্ত হৈ ছয়প্ৰকাৰ সৈন্য লৈ দিগ্বিজয়ৰ বাবে প্ৰস্থান কৰিলে।
- বয়োবৃদ্ধ পুৰনাৰীসকলে তেওঁক আখৈৰ মুঠিৰে ঢাকি পেলালে, ধাৰণা হ'ল যেন মন্দৰ পৰ্বতত উৎক্ষিপ্ত পানীৰ কণিকাৰে ক্ষীৰ সমুদ্ৰৰ তৰঙ্গমালাই ভগৱান বিষ্ণুক ঢাকি পেলাইছে।
- ইন্দ্ৰতুল্য ৰঘুৱে বায়ুকম্পিত পতাকাৰে শত্ৰুবিলাকক যেন তৰ্জন কৰি প্ৰথমে পূৱপিনে গমন কৰিলে।
- ৰথত উৰা ধূলিৰ কনিকা আৰু বৰণ আৰু আকাৰত মেঘ সদৃশ হাতীবোৰেৰে তেওঁ (যথাক্ৰমে) যেন আকাশক ভূতলত আৰু ভূতলক আকাশত পৰিণত কৰালে।
- সকলোতকৈ আগত প্ৰতাপ। তাৰ পাছত সৈন্য কোলাহল। সেইবোৰৰ পিছত ধূলি আৰু তাৰ পিছত ৰথ আদি এইদৰে তেওঁৰ সৈন্য চাৰিভাগত বিভক্ত হৈ যাবলৈ ধৰিলে।

- তেওঁ (ৰঘুই) শক্তিৰ প্ৰভাৱত মৰুপৃষ্ঠক জলময়, নাওঁৰে পাৰ হব পৰা নদীবোৰক সুচল আৰু অৰণ্যসমূহক বৃক্ষহীন কৰিলে।
- তেওঁ (ৰঘুই) সেই বিশাল সৈন্যবাহিনীক পূৱসাগৰৰ দিশে পৰিচালিত কৰাত এনে বোধ হৈছিল যেন ভগীৰথে হৰজটাভ্ৰষ্টা গংগাক আকৰ্ষণ কৰি পূৱসাগৰৰ পিনে লৈ গৈছে।
- যিদৰে বনৰীয়া হাতীয়ে গছবোৰক ফলহীন, উন্মূলিত আৰু ছিন্ন ভিন্ন কৰি গন্তব্য পথ উলিয়াই লয়, সেইদৰে ৰঘুয়ো ৰজাবিলাকক ধনহীন, ৰাজ্যচ্যুত আৰু পৰাভূত কৰি গন্তব্যপথ নিষ্কণ্টক কৰিলে।
- এইদৰে পূৱ দিশৰ সকলো ৰাজ্য আক্ৰমণ কৰি বিজয়ী ৰঘু মহাসাগৰৰ তালীবনশ্যামল উপকূলত উপস্থিত হ'ল।
- যিদৰে বেতগছে অৱনত হৈ নদীৰ বেগৰ পৰা আত্মৰক্ষা কৰে, সেইদৰে সুহ্মদেশীয় ৰজাসকলো অৱনত হৈ উদ্ধত ৰজাসকলৰ উচ্ছেদকাৰী ৰঘুৰ পৰা আত্মৰক্ষা কৰিলে।
- সেনা নায়ক ৰঘুই নৌবাহিনীৰ সহায়ত যুদ্ধলৈ উদ্যত পূৰ্ববংগীয় ৰজাসকলক উন্মুলিত কৰি গংগা নদীৰ মাজৰ দ্বীপবোৰত বিজয়স্তম্ভ স্থাপন কৰিলে।
- শালিধান প্ৰথমে উভালি আৰু পিছত পুনৰ ৰুলে প্ৰচুৰ শস্য প্ৰদান কৰে সেইদৰে বংগীয় ৰজাসকলে প্ৰথমে উন্মুলিত আৰু পাছত স্বপদত স্থাপিত হোৱাত, ৰঘুৰ পাদপদ্মত নত হৈ প্ৰচুৰ ধনদানপূৰ্বক তেওঁক সংবৰ্দ্ধিত কৰিলে।
- তেওঁ সৈন্যবিলাকৰ দ্বাৰা গজসেতু নিৰ্মাণ কৰি কপিশা নদী পাৰ হৈ উৎকল দেশীয় ৰজাসকলে দেখুৱাই দিয়া পথেৰে কলিংগ দেশৰ অভিমুখে প্ৰস্থান কৰিলে।
- মাউতে যিদৰে গম্ভীৰবেদী হাতীৰ মূৰত সুতীক্ষ্ণ অংকুশ নিক্ষেপ কৰে, সেইদৰে তেঁৱো (ৰঘুৱে) মহেন্দ্ৰ পৰ্বতৰ শিখৰত নিজৰ দুঃসহ প্ৰতাপ নিৱেশিত কৰিলে।
- পৰ্বতে যিদৰে পক্ষচ্ছেদনত উদ্যত ইন্দ্ৰক শিলাবৰ্ষণৰ দ্বাৰা প্ৰতিৰোধ কৰিবলৈ প্ৰবৃত্ত হৈছিল, সেইদৰে গজাৰোহী সৈন্য লৈ কলিংগৰাজেও স্বপক্ষবিনাশোদ্যত ৰঘুক অস্ত্ৰবৰ্ষণৰ দ্বাৰা আক্ৰমণ কৰিছিল।
- কাকুৎস্থ ৰঘুই তাত শত্ৰুসকলৰ অসংখ্য শৰবৰ্ষণ সহ্য কৰি, যেন বিধিমতে মঙ্গল স্নান কৰি জয়শ্ৰী লাভ কৰিলে।
- তাতেই (মহেন্দ্ৰ পৰ্বতত) তেওঁৰ সৈন্যসকলে পানভূমি ৰচনা কৰি তামোলৰ পাতত নাৰিকলৰ মদৰ ছলেৰে শত্ৰুৰ শুভ্ৰ যশ পান কৰিলে।
- ধৰ্মবিজয়ী সেই ৰজাই (ৰঘুই) মহেন্দ্ৰ নাথক আগতে বন্দী কৰি আৰু পিছত মুক্ত কৰি তেওঁৰ ৰাজ্যশ্ৰী অপহৰণ কৰিলে কিন্তু ৰাজ্য আত্মসাৎ নকৰিলে।
- জয়লাভ অনায়াসলভ্য বুলি ৰঘু জয়লাভৰ বাবে আৰু উৎসুক নহৈ ফলশালী তামোল গছৰে সুশোভিত সাগৰৰ পাৰৰ পৰাই যিদিশত অগস্ত্য উদিত হয় সেই দক্ষিণ দিশলৈ যাত্ৰা কৰিলে।

- তেওঁৰ সৈন্যবিলাকে স্বচ্ছন্দে বিহাৰ কৰি হাতীবিলাকৰ মদজলেৰে কাবেৰী নদীক সুবাসিত কৰি তুলি তেওঁক যেন সৰিৎপতি সমুদ্রৰ ওচৰত সন্দেহৰ পাত্র কৰি তুলিছিল।
- জয়লাভত ইচ্ছুক ৰঘুই বহুপথ অতিক্রম কৰি মৰীচবনত বিচৰণশীল হাৰিৎপক্ষিশোভিত মলয় পর্বতৰ উপত্যকাত বিশ্রাম ললে।
- ঘোঁৰাৰ খুৰাৰে চুর্ণীকৃত এলালতাৰ ফলৰেণু আহি তুল্যগন্ধশালী মত্তহাতীৰ গণ্ডস্থলত লগ লাগিল।
- হাতীবিলাকৰ ভৰিৰ শিকলি ছিণ্ডিলেও, চন্দন গছৰ সর্পবেষ্টন ঠাইত আৰোপিত ডিণ্ডিৰ বন্ধন ছিণ্ডিব নোৱাৰিলে।
- দক্ষিণ দিশে গমন কৰিলে সূর্যৰো তেজ কমি আহে। কিন্তু ৰঘু দক্ষিণ দিশে গমন কৰাত পাণ্ডুদেশীয় ৰজাসকলে ৰঘুৰ প্রতাপ সহ্য কৰিব নোৱাৰিলে।
- তেওঁলোকে ৰঘুৰ চৰণত প্রণিপাত কৰি তেওঁক তাম্রপর্ণী নদী আৰু মহাসাগৰৰ সংগমকূলৰ পৰা সঞ্চিত উৎকৃষ্ট মুক্তা প্রদান কৰি যেন নিজৰ সঞ্চিত যশৰাজি প্রদান কৰিলে।

৮.৪.৪ श्लोकानाम् व्याख्या

२६. गुप्तमूलप्रत्यन्तः= रक्षितस्वनिवासस्थानप्रान्तदुर्गः, शुद्धपार्ष्णिः= उद्धृतपृष्टशत्रुः, अयान्वितः= युक्तः, सः= रघुः, षड्विधम्= मौलभृत्यादिषट्प्रकारकम्, सैन्यम्=बलम्, आदाय= गृहीत्वा, दिग्जिगीषया= जयकरणाभिलाषः, प्रतस्थे= प्रचचाल।

२७. वयोवृद्धाः=आयुजीर्णाः, पौरयोषितः=स्त्रियः, लाजैः= भृष्टधान्यविशेषैः, पृषतैः= बिन्दुभिः, क्षीरोर्मयः= क्षीरसागरवीचयः, अच्युतम्= भगवन्तं विष्णुमिव, तं= रघुम्, अवाकिरन्= ववृषुः।

२८. प्राचीनबर्हिषा= इन्द्रेण, तुल्यः= समः, सः= रघुः, अनिलोद्धूतैः= पवनेनानुकूलवातिनोत्क्षिप्तः, केतुभिः= ध्वजैः, अहितान्= शत्रून्, तर्जयन्= र्भयन्, इव= यथा, प्रथमम् = प्राक्, प्राचीम्, दिशम्, ययौ=चचाल।

२९. स्यन्दनोद्धूतैः= पतत्- उत्थापितैः, रजोभिः=धूलिभिः, घनसन्निभिः = मेघतुल्यैः, गजैः = सेनाहस्तिभिश्च, व्योम= आकाशम्, भुवः = पृथिव्याः, तलम् = पृष्ठभागम्, भूतलम् = पृथिवीतलम् च, कुर्वन्= सम्पादयन्, ययौ= चचाल।

३०. अग्रे= सर्वतोऽग्रे, प्रतापः= तेजः, ततः= पश्चात्, शब्दः= सेनाध्वनिः, तदनन्तरम्= पश्चात्, परागः= धूलिः, पश्चाद्= तदग्रे, रथादि= स्यन्दनादि, इति= इत्थम्, सा चमूः= सेना, चतुस्कन्धाः = चतुःसङ्ख्यकाः स्कन्धाः, इव= यथा, ययौ= जगाम।

३१. सः= रघुः, शक्तिमत्त्वात्= सामर्थ्यशालित्वात्, मरुपृष्ठानि= सुमेरूप्रदेशात्, उदम्भांसि=

उन्नजलानि, नाव्याः= नौकाद्वारा तरणयोग्याः, नदीः= सरितः, सुप्रतरा= सुखेन तर्तुं शक्याः, विपिनानि= वनानि, प्रकाशानि= कान्तियुक्तानि, चकार= अकरोत्।

३२. सः= रघुः, पूर्वसागरगामिनीम्= पूर्वस्यां दिशि वर्तमानः,सागरः = समुद्रः, तं गच्छति याति तच्छीलाम्। महतीम्= बृहतीम्, सेनाम्= चमूम्, कर्षन्= नयन्, हरजटाभ्रष्टाम्= शिवकेशनिर्गलिताम्, गङ्गाम्= भागीरथीम्, इव= यथा, बभौ= शुशुभे।

३३. फलम्= लाभं प्रसवं वा, त्याजितैः= विसर्जितैः, उत्खातैः= उाटितैः, बहुधा= बहुप्रकारेण, भग्नैः= छिन्नैः पक्षे रणे जितैः च, नृपैः=राजभिः, पादपैः= वृक्षैः, दन्तिनः= हरिणस्य, इव= यथा, मार्गः= पन्थाः, उल्बणः= स्पष्ट, आसीत्= अभूत्।

३४. जयी= जयनशीलः, रघुः। एवम्= इत्थम्, तान्, तान्, पौरस्त्यान्= प्राच्यान् पूर्वदिग्भवान्, जनपदान्= देशान्, आक्रामन्= स्वायत्तीकुर्वन्, तालीवनश्यामम्= तालवृक्षकृष्णम्, महोदधेः=सागरस्य, उपकण्ठम्= समीपम्, प्राप= प्राप्नोत्।

३५. सुह्मैः = सुह्मदेशीयैः , वैतसीम्= वेतससम्बन्धीम्, वृत्तिम्= व्यवहारम्, आश्रित्य= अवलम्ब्य, अनम्राणाम्= उद्धतानाम्, समुद्धर्तुम्= समुाटयितुम्, तस्मात्= रघोः, सिन्धुरयात्= समुद्रस्य यो रथो वेगस्तस्मात्, इव= यथा, आत्मा= देहः, संरक्षितः= परापालितः।

३६. नेता= नायकः, सः= रघुः, नौसाधनोद्यतान्= नौका एव साधनानि उपायास्तैरुद्यतान्, सन्नद्धान्, बङ्गान्= बङ्गदेशीयान्, उत्खाय= उाट्य उन्मूलनं कृत्वेत्यर्थः, जयस्तम्भान्= विजयस्तम्भान्, निचखान्= स्थापितवानित्यर्थम्।

३७. आपादपप्रणताः= चरणकमलपर्यन्तनम्राः, उत्खातप्रतिरोपिताः= उन्मूलितस्थापिताः, ते= बङ्गीयाः, कलमाः= शालिविशेषाः, इव= यथा, रघुम्, फलैः= घनैः सस्यैश्च, संवर्धयामासुः= समवर्धयन्।

३८. सः=रघुः, बद्धद्विरदसेतुभिः= पङ्क्तिरूपेणगजालयैः, सैन्यैः= सेनापुरूषैः, कपिशाम्= तन्नाम्नीम् नदीम्, तीर्त्वा= समुत्तीर्य, उत्कलादर्शितः = उत्कलदेशीयनिवेदितः, कलिङ्गाभिमुखः= कलिङ्गदेशं लक्ष्यीकृत्य, ययौ= जगाम।

३९. सः= रघुः, महेन्द्रस्य= कुलपर्वतविशेषस्य, मूर्ध्नि= मस्तके शिखरे च, तीक्ष्णम्= तीव्रम्, प्रतापम्= तेजः, यन्ता= हस्तिपकः, गम्भीरवेदिनः= गजविशेषस्य, द्विरदस्य= गजस्य, तीक्ष्णम्= तीव्रम्, अङ्कुशम्= सृणिमिव, न्यवेशयत्= निवेशयामास।

४०. गजसाधनः= हस्तियुद्धसाधनः, कालिङ्गः= कालिङ्गस्थो नृपः, अस्त्रैः= आयुधैः, तम्=रघुम्, पक्षच्छेददोद्यतम्= मरूतकर्तनोद्युक्तशक्रम्, शिलावर्षी= प्रस्तरवर्षणकारी, पर्वतः= गिरिः इव, प्रतिजग्राह= प्रत्यभियुक्तवान्।

४१. काकुस्थः= रघुः, तत्र= महेन्द्राद्रौ, द्विषाम्= शत्रूणाम्, नाराचानाम् = बाणानाम्, दुर्दिनम् नाराचदुर्दिनम् = वर्षणदिवसम्, विषह्य= क्षान्त्वा, सन्मङ्गलस्नात्= सच्च

तन्मङ्गलम् इव, जयश्रियम्= विजयलक्ष्मीम्, प्रतिपेदे= प्राप।

४२. तत्र=महेन्द्राद्रौ, योधाः= भटाः, रचितापानभूमयः= संपादितसुरापानभूमयः, ताम्बूलीनाम्= नागवल्लीनाम्, दलैः= पत्रैः, नारिकेलासवम्= मद्यं नारिकेलासवः, यशः= कीर्तिम्, पपुः=पिबन्ति स्म।

४३. धर्मविजयी= पुण्यजयनशीलः, सः नृपः= राजारघुः, गृहीतप्रतिमुक्तस्य= पूर्वं गृहीत प्रतिबद्धः पश्चात् प्रतिमुक्तः परित्यक्तः तस्य गृहीतप्रतिमुक्तस्य, महेन्द्रनाथस्य= महेन्द्राधिपस्य, श्रियम् = राज्यलक्ष्मीम्, जहार= अहरत्, मेदिनीम्= पृथिवीम्, तु नैव जहार।

४४. ततः= तदनन्तरम्, फलवतां = फलितानाम्, पूगानाम् = क्रमुकाणाम्, माला = श्रेणी विद्यते यस्य तादृशेन फलवूगमालिना। वेलायास्तटेन = समुद्रकूलभागेन एव। अगस्त्येन = कम्भसम्भवेन, आचरिता = अधिष्ठिता इति अगस्त्याचरिता, ताम् अगस्त्याचरिताम्। आशाम् = दिशम्, दक्षिणां दिशमित्यर्थः। न आशास्यः = प्रार्थनीयः, जयः यस्य सः अनाशास्यजयः, सन् ययौ = जगाम।

४५. सः=रघुः, गजदानसुगन्धिना=हस्तिदानसुरभिः तेन, सैन्यपरिभोगेण=सैनिकोपभोगेन, कावेरीम्= तदाख्यां नदीम्, सरिताम् = नदीनाम्, पत्युः= स्वामिनः, शङ्कनीयाम्= अविश्वसनीयाम्, इव= यथा, अकरोत्= चकार।

४६. विजिगीषोः=विजेतुमिच्छति तस्य विजिगीषोः, यातः अध्वा मार्गः येन गताध्वा तस्य गताध्वनः= रघोः, बलैः= सेनापुरूषैः,मारीचानां वनानि, तेषूद्भ्रान्तहारीता उड्डीयमानाः हारीताः= पक्षीविशेषा यासु ताः मारीचोद्भ्रान्तहारीताः। मलयाद्रेः=मलयपर्वतस्य, उपत्यकाः= अद्रेरासन्नभूमयः, अध्युषिताः= अधिष्ठिता।

४७. अश्वक्षुण्णानाम्=घोटकचूर्णितानाम्, एलानाम्= एलालतानाम्, उतिष्णवः= ऊर्ध्वगमनशीलाः, फलरेणवः= प्रसवधूलिकणाः, तुल्यगन्धिषु= समसुगन्धिषु, मत्तेभकटेषु= प्रमत्तगजगण्डस्थलेषु, ससञ्जुः= संसक्ताः।

४८. चन्दनानाम्= मलयजानाम्, भोगः अस्ति येषां ते भोगिनः तेषां यानि वेष्टनानि, तेषां मार्गाः = स्थानानि, तेषु भोगिवेष्टनमार्गेषु, समर्पितम्= दत्तम्, त्रिपदीछेदीनाम्= पादबन्धनच्छेदकानामपि, करिणाम्= गजानाम्, ग्रैवम्= कण्ठबन्धनम्, न= नैव, अस्त्रसत्= शिथिलं बभूव।

४९. दक्षिणस्याम्=अवाच्याम्, दिशि= काष्ठायाम्, रवेः= सूर्यस्यापि, तेजः= प्रतापः, मन्दायते= मन्दं भवति, पाण्ड्याः= पाण्डुदेशाधीशाः, तस्याम् = दक्षिणस्याम्, एव, रघोः= दिलीपपुत्रस्य, प्रतापम्= तेजः, न, विषेहिरे= सोढवन्तः।

५०. ते= पाण्ड्याः, ताम्रपर्ण्या = नद्या, समेतस्य = संगतस्य। महोदधे = महासागरस्य सम्बन्धि। सञ्चितम् = सङ्कलितम्, मुक्तासारम् = मौक्तिकवरम्, स्वम् = स्वकीयम्, सञ्चितम् = सङ्कलितम्,यशः = कीर्तिम्, इव। तस्मै = रघवे, प्रणिपत्य = नमस्कृत्य, ददुः = समर्पितवन्तः।

८.५ श्लोकानां व्याकरणांशाः प्रकृतिप्रत्ययसमाससहितम्

१. प्रतस्थे - प्र (स्था) धातुः लिट् प्रथमपुरुषे एकवचनम्।
जिगीषा - जेतुमिच्छा जिगीषा।
२. ववृषुः - वृषुँ (सेचनहिंसासङ्क्लेशनेषु धातुः) लिट् प्रथमपुरुषे बहुवचनम्।
३. ययौ - या (प्रापणे धातुः), लिट् प्रथमपुरुषे द्वितीया एकवचनम्।
४. कुर्वन् - (डुकृञ् करणे धातुः), शतृप्रत्यान्तम्।
५. चमूः - चमति भक्षयति शत्रून् नाशयति इति। चम्+ क्वषिचमितनीति उणादिसूत्रेण ऊप्रत्ययः।
६. चकार - डुकृञ् (करणे), लिट् प्रथमपुरुषे एकवचनम्।
सुप्रतराः - सुखेन प्रतर्तुं शक्याः सुप्रतराः। (तृतीयातत्पुरूषः)
७. बभौ - भा (दीप्तौ), लिट् प्रथमपुरुषे एकवचनम्।
८. उल्बणः - प्रकाश इत्यर्थः।
९. प्राप - पा (रक्षणे) लिट् प्रथमपुरुषे एकवचनम्।
२०. आश्रित्य - आङ्+ श्रिञ+ ल्यप्।
११. तरसा - बलेन इत्यर्थः
१२. कलमा - धान्यविशेषाः। तर्जयन् - $\sqrt{}$तर्ज् + शवृ
१३. तीर्त्वा - तॄ (प्लवनतरणयोः) + क्त्वाच्।
१४. द्विरदः - द्वौ रदौ दन्तौ प्रधानतया यस्य सः गजः(बहुव्रीहिसमासः)
१५. प्रतिजग्राह - प्रति (ग्रहँ उपादाने)+ लिट् प्रथमपुरुषे एकवचनम्।
१६. प्रतिकपेदे - प्रति पदँ(गतौ) लिट् प्रथमपुरुषे एकवचनम्।
१७. पपुः - पै (शोषणे) + लिट्प्रथमपुरुषे बहुवचनम्।
१८. जहार - हृञ् (हरणे) + लिट्प्रथमपुरुषे एकवचनम्।
१९. ततः - तस्मात् इति।
२०. अकरोत् - डुकृञ् (करणे) + लङ्प्रथमपुरुषे एकवचनम्।
२१. उपत्यका - अर्देरधस्थोर्ध्वासन्नभूमिः(अमरकोशः)।
विजिगीषा - विजेतुमिच्छा, वि +जि+ सन्+ अः+ टाप्।
२२. ससञ्जुः - षन्जँ (सङ्गे) + लिट्प्रथमपुरुषे एकवचनम्।
२३. अस्रसत् - स्रन्सुँ (अवस्रंसने)+ लिट्प्रथमपुरुषे एकवचनम्।
२४. विषेहिरे - सोढवन्तः इत्यर्थः।
२५. ददुः - दा (दाने) + लिट्प्रथमपुरुषे बहुवचनम्।



८.६ अध्यायात् किमवगतम्

- व्याकरणांशानां ज्ञानम्।
- राजाधर्मनीत्यापि शासनं कर्तुं शक्नोति।
- विशेषतया लिट्लकारस्य धातुरूपाणां ज्ञानम्।
- प्रतिश्लोकस्यार्थः अन्वयसहितम्।
- राजारघोः उत्तमानुशासनम्, पराक्रमस्य वर्णनम् च।



८.७ ज्ञानाधिक्यम्

१) काले, एम. आर.(सम्पा.) रघुवंशम् अव् कालिदासः(१-५), दिल्ली; मोतीलाल बनारसीदास पब्लिक प्राईवेट लिमिटेड।
२) गोस्वामी, डॉ मालिनी (२००९) रघुरपि काव्यम्, गुवाहाटी चन्द्रप्रकाशः।
३) संस्कृतसाहित्यसम्भारः(VOL- X) (१९८१) नवपत्रप्रकाशनम्।



८.९ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : अक्षतः।
प्रश्नः २ : उत्तरम् : इन्द्रः।
प्रश्नः ३ : उत्तरम् : रक्षितस्वनिवासस्थानप्रान्तदुर्गः।
प्रश्नः ४ : उत्तरम् : रघुः।
प्रश्नः ५ : उत्तरम् : ब्रह्मपुत्र पद्मानद्याः च मध्यबर्ती देशः।



८.१० अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः १ : चेन्नैनगरस्य प्राचीनमण्डलद्वयस्य नाम लिखतु।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० -३०० शब्देषु लिखन्तु)।

प्रश्नः १ : व्याकरणगतटोका लिखतु - प्राप, महोदधेः।

प्रश्नः २ : राजादिलीपस्य राजशासनविषये एकं निबन्धं लिखन्तु ?

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः १ : रघोः दिग्विजयस्य पूर्वदिशि अभियानस्य विषये लिखतु।

*** ***** ***

अध्यायः ९ : रघुवंशम् - चतुर्थसर्गः (श्लोकाः ५१-८०)

अध्यायस्य संरचना

९.१ उद्देश्यम्

९.२ परिचयः

९.३ श्लोकानां सारांशः (५२-८०)

९.४ श्लोकाना सस्कृतपाठः (५२-८०)

- ९.४.१ श्लोकानाम् अन्वयः
- ९.४.२ श्लोकानाम् अर्थः
- ९.४.३ श्लोकानाम् असमीयानुवादः

९.५ श्लोकानां व्याख्या

९.६ श्लोकानां व्याकरणांशाः (प्रकृतिप्रत्ययसमाससहितम्)

९.७ अध्यायात् किमवगतम्

९.८ ज्ञानाधिक्यम्

९.९ अग्रगत्याः निरूपणम्

९.१० अभ्यासप्रश्नाः

९.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- महाकाव्यं किं तस्य स्वरूपम् इति विषये ज्ञानं प्राप्यते।
- कालिदासरचितस्य महाकाव्यस्य ज्ञानम्।
- अस्य महाकाव्यस्याध्ययनेन महाकविकालिदासस्य रघुवंशमहाकाव्यस्य ज्ञानं प्राप्स्यामः।
- अस्य महाकाव्यस्यान्तर्निहितस्य अंशस्य राज्ञः रघोः कीदृशः पराक्रमोऽसीत् तदपि ज्ञानं लभते।
- कुलगुरूकालिदासस्य भाषाशैलीमपि ज्ञातुं शक्नुवन्ति।

९.२ परिचयः

प्रमुखमहाकाव्येषु रघुवंशमहाकाव्यम् अन्यतमम् इति सर्वे प्रायः जानन्त्येव। यतोहि इदं काव्यं भाषासु व्याकरणशैलीसु प्राकृतिकसौन्दर्येषु च अलौकिकं वर्त्तते। सर्वादौ मङ्लाचरणे पार्वतीशिवयोः आराधनां कृत्वा अस्य महाकाव्यस्य प्रारम्भोऽभवत्। राजावैवस्वतमनुतः अग्निवर्णपर्यन्तम् अत्र सूर्यवंशीयराज्ञां वर्णनम् अस्ति। तेषां कीर्तिः अलौकिकशौर्यञ्च कीदृशम् भवति स्म। इत्येतान् विषयान् अस्मिन् काव्ये ज्ञातुं शक्नुवन्ति। सर्वेषु सर्गेषु नूतनाः कथाः प्रदर्शिताः कविकुलगुरूकालिदासेन। प्रस्तुतसर्गे राज्ञः रघोः शौर्यस्य कीर्तेश्च वर्णनम् अत्र दृश्यते।

९.३ श्लोकानां सारांशः (५२-८०)

रघोः पराक्रमस्य कीर्तिः सम्पूर्णे विश्वे प्रसारिता। यया कीर्त्या सर्वे शत्रवः भीतभीता आसन्। अस्मिन् सर्गे रघुः दिग्विजयायै दक्षिणदिशम् अगच्छत्। ततः परं सह्याद्रिपर्वते गत्वा केरलदेशं ययौ। केरलप्रान्तानां स्त्रियः तस्य पराक्रमस्य आभूषणादि परित्यजन्ति स्म। तत् पश्चात् सिन्धुनदीतटे गत्वा उत्तरदिग्मध्ये हूणशत्रून् पराजितवान्। अनन्तरं कम्बोजदेशवासिनः रघोः तेजः ज्ञात्वा हिमालयपर्वतं अगच्छत्। स्वस्य तेजः प्रसारितं रघुणा। ततः परं दिग्विजयं कृत्वा रघुः विश्वजीतयागं कृत्वा शत्रुभ्यः तेषां राज्यं धनञ्च अददात्। एवं प्रकारेण राजा रघुः स्वस्य वैभवं प्रसारितवान् सकले विश्वे।

९.४ श्लोकाना सस्कृतपाठः (५२-८०)

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ॥ ५१
असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत्॥ ५२
तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः।
रामास्त्रोत्सारितोऽप्यासीह्यलग्न इवार्णवः॥ ५३
भयोष्टविभूषाणां तेन केरलयोषिताम्।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥ ५४
मुरलामारूतोद्धूतमगमत् कैतकं रजः।
तद्योधवारबाणानामयत्नपटवासताम्॥ ५५
अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः॥ ५६
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः॥ ५७
अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ।
अपरान्तमहीपालव्याजेन रघवे करम्॥ ४८
मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम्।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः॥ ५९
पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी॥ ६०
यवनीमुखपद्मानां सेहे मधुमदं न सः।
बालातपमिवाब्जानामकालजलदोदयः॥ ६१

सङ्ग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२
भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३
अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५
ततः प्रतस्थे कावेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥ ६६
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धांल्लग्नकुंकुमकेसरान् ॥ ६७
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८
काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ६९
तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोकाः कोसलेश्वरम् ॥ ७०
ततो गौरीगुरूं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१
शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंसभ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ७२
भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७४
विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोङ्गा निषण्णमृगनाभिभिः ॥ ७४
सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५
तस्योष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ७६
तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोतितानलम् ॥ ७७
शरैरुवसङ्केतान् स कृत्वा विरतोवान् ।

जयोदारहणं बाह्वोर्गापयामास किन्नरान्॥ ७८
परस्परेण विज्ञातस्तेषूपायनपाणिषु।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा॥ ७९
तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम्॥ ८०

९.४.१ श्लोकानाम् अन्वयः

५१.- ५२.असह्यविक्रमः सः तटेषु आलीनचन्दनौ तस्याः दिशः स्तनौ इव (स्थितौ) मलयदुर्दरौ शैलौ यथाकामम् निर्विश्य दूरात् उदन्वता मुक्तम् स्रस्तांशुकम् मेदिन्याः नितम्बम् इव सह्यम् अलङ्घयत्।

५३. अपरान्तजयोद्यतैः विसर्पद्भिः तस्य, अनीकैः रामास्त्रोारितः अपि अर्णवः सह्यलग्नः इव आसीत्।

५४. तेन भयोष्टविभूषाणां केरलयोषिताम् अलकेषु चमूरेणुः चूर्णप्रतिनिधीकृतः।

५५. मुरलामारुतोद्धूतम् कैतकम् रजः तद्योधवाराणानाम् अयत्नपटवासताम् अगमत्।

५६. चरताम् वाहानाम् गात्रशिञ्जितैः वर्मभिः पवनोद्धूतराजतालीवनध्वनिः अभ्यभूयत।

५७. शिलीमुखाः पुन्नागेभ्यः खर्जूरीस्कन्धनद्धानाम् करिणाम् मदोद्गारसुगन्धिषु, कटेषु, पेतुः।

५८. उदन्वान्, अभ्यर्थितः, सन् रामाय, अवकाशम्, ददौ, किल, रघवे तु अपरान्तमहीपालव्याजेन करम् ददौ।

५९. सः तत्र मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् त्रिकूटम् एव उच्चैः जयस्तम्भम् चकार।

६०. ततः संयमी सः तत्वज्ञानेन इन्द्रियाख्यान् रिपून् इव पारसीकान् जेतुम् स्थलवर्त्मना प्रतस्थे।

६१. सः अकालजलदोदयः अब्जानाम् बालातपम् इव यवनीमुखपद्मानाम् मधुमदम् न सेहे।

६२. तस्य अश्वसाधनैः पाश्चात्यैः सह शार्ङ्गकूजितविज्ञेयप्रतियोधे रजसि तुमुलः सङ्ग्रामः अभूत्।

६३. सः सरघाव्याप्तैः क्षौद्रपटलैः इव भल्लापवर्जितैः श्मश्रुलैः तेषाम् शिरोभिः महीम् तस्तार।

६४. शेषाः अपनीतशिरस्त्राणाः तम् शरणम् ययुः हि महात्मनाम् संरम्भः प्रणिपातप्रतीकारः भवति।

६५. तद्योधाः आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु मधुभिः विजयश्रमम् विनयन्ते स्म।

६६. ततः भास्वान् इव रघुः उस्रैः इव शरैः रसान् इव उदीच्यान् उद्धरिष्यन् कौवेरीम् दिशम् प्रतस्थे।

६७. सिन्धुतीरिविचेष्टनैः विनीताध्वश्रमाः तस्य वाजिनः लग्नकुङ्कमकेसरान् स्कन्धान् दुधुवुः।

६८. तत्र भर्तृषु व्यक्तविक्रमम् रघुचेष्टितम् हूणावरोधानाम् कपोलपाटलादेशि बभूव।

६९. काम्बोजाः समरे तस्य विक्रमम् सोढुम् अनीश्वराः गजालानपरिक्लिष्टैः अक्षोटैः सार्धम् आनताः।

७०. तेषाम् सदश्वभूयिष्ठाः तुङ्गाः द्रविणराशयः उपदाः शश्वत् कोशलेश्वरम् विविशुः नोकाः न विविशुः।

७१. ततः अश्वसाधनः गौरीगुरुम् शैलम् उद्धूतैः धातुरेणुभिः तत्कूटान् वर्धयन् इव आरुरोह।

७२. तुल्यसत्वानाम् गुहाशयानाम् सिंहानाम् परिवृत्य अवलोकितम् सैन्यघोषे अपि असम्भ्रमम् शशंस।

७३. भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः गङ्गाशीकरिणः मरुतः मार्गे तम् सिषेविरे।

७४. सैनिकाः नमेरूणाम् छायासु निषण्णमृगनाभिभिः वासितोङ्गाः दृषदः अध्यास्य विशश्रमुः।

७५. सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ओषधयः नेतुः नक्तम् अस्नेहदीपिकाः आसन्।

७६. तस्य उष्टनिवासेषु कण्ठरज्जुक्षतत्वचः देवदारवः किरातेभ्यः गजवर्ष्म शशंसुः।

७७. तत्र रघोः पर्वतीयैः गणैः नाराचक्षेपणीयाश्मनिष्पेषोतितानलम् घोरम् जन्यम् अभूत्।

७८. सः शरैः उवसङ्केतान् विरतोवान् कृत्वा किन्नरान् बाह्वोः जयोदाहरणम् गापयामास।

७९. तेषु उपायनपाणिषु परस्परेण राज्ञा हिमवतः सारः हिमाद्रिणा राज्ञः सारः विज्ञातः।

८०. सः तत्र अक्षोभ्यम् यशोराशिम् निवेश्य पौलस्त्यतुलितस्य अद्रेः ह्रियम् आदधानः इव अवरुरोह।

९.४.२ श्लोकानाम् अर्थः

५१-५२. यथा कश्चन रतिलीलाविलासी कामुकः पीनोन्नतस्तनजघनायाः नायिकायाः चन्दनचर्चितं स्तनद्वयं सम्मर्द्य, वसनावरणरहितं नितम्बञ्च यथेच्छम् उपभुज्य, एव तमीपादन्यतो गच्छति तथैव अन्यपुरुषासह्यपराक्रमः सः रघुरपितस्या दिशः स्तनाविव स्थितौ मलयदर्दुरौ शैलौ, समुद्रसलिलविमुक्तं सह्यनामानं पर्वतञ्च यथेच्छमुपभुज्य ततोऽन्यतो जगाम।

५३. दक्षिणदिग्विजयार्थं समुद्रतटेन प्रचलितया रघुसेनया परशुरामास्त्रेण सह्यपर्वतात् पृथक्कतोऽपि समुद्रः सह्यपर्वसंलग्न इवासीत्।

५४. रघुणा भयेन अलङ्कारादीन् परित्यज्य पलायमानानां केरलाङ्गानां कुन्तलेषु

सैन्यपादन्यासोत्थापितरजः कुङ्कमादिसुगन्धिचूर्णस्य स्थानीयं कृतवान्।

५५. मुरलादीवायुना उत्थापितः केतकीपुष्पपरागः रघुसैनिकानां कञ्चुकेषु निपत्य प्रयासेन विनैव वसनवासनाकार्यं विदधौ।

५६. अतिवेगेन रघुसैनिकाश्वानां सञ्चालनात् अश्वारूढानां शरीरस्थलोहमयकवचेभ्यः समुद्भूतो महान् झन् झन् इति शब्दः पवनसञ्चालितताल‌ध्वनिमपि तिरस्कृतवान्।

६७. भ्रमराः खर्जूरीवृक्षेषु बद्धानां रघुगजानां मदजलगन्धेन मुग्धाः सन्तः पुन्नागकुसुमानि विहाय हस्तिनां गण्डस्थलेषु अपतन्।

५८. यमुदधिं परशुरामोऽपि प्रार्थ्य अवकाशं लेभे सोऽप्युदधिः पश्चिमदिङ्निवासिभूपालव्याजेन रघवे करं दत्तवानिति परशुरामादपि रघोरुत्कर्षः।

५९. सः रघुः मदोन्मत्तकरिरदनप्रहारेण प्रकटितपराक्रमचिह्नं त्रिकूटपर्वतमेव विजयस्तम्भरूपेण स्थापयामास।

६०. यथा किल कश्चन योगी परमतत्त्वावबोधेन दुर्जयानपि इन्द्रियरूपान् महाशत्रून् जयति तथैव असौ रघुरपि सिन्धुतटनिवासिनो म्लेच्छनृपतीञ्जेतुं स्थलमार्गेण जगाम।

६१. यथा अनवसरे घनघटाडम्बरः विकसितकमलसम्बन्धि स्वल्पमपि सौरातपं न सहते तथैव रघुरपि पारसदेशीययवनस्त्रीमुखकमलानां मदिरापानजनितां क्षीवतां न सोढवान्।

६२. तस्य रघोः वाजिसैन्यैः यवनदेशीयम्लेच्छनरपतिभिः सह भयङ्करः युद्धैः बभूव यत्र स स्वपक्षस्य परपक्षस्य वा परिचयः केवलं प्रत्यञ्चानिर्घोषेणैव जायते स्म।

६३. रघुः मधुमक्षिकायुतानि मधुसमूहैः इव श्मश्रुसहितानि यवननृपतिशिरांसि भल्लास्त्रविशेषैः छित्वा तैः पृथ्वीम् आच्छादयामास। पाश्चात्या हि श्मश्रूणि रक्षित्वा केशान्वपन्तीति तद्देशाचारोक्तिः।

६४. महानुभावानां क्रोधः प्रणत्या एव दूरीभवतीति सम्यग्विचार्य हतावशिष्टा यवनाः उष्णीषरहितमस्तकाः सन्तः प्राणसंरक्षणार्थं रघुं शरणमागताः।

६५. युद्धाश्रान्ताः रघोः सैनिकाः अजिनासनानि आस्तीर्य तत्र सुखोपविष्टाः सन्तः सरसाऽसवपानेन श्रममपनीतवन्तः।

६६. यथा सूर्यः प्रखरकिरणैः जलानि शोषयति तथैव असावपि उत्तरदिग्भवानां भूपानां निजतेजोरश्मिभिः शोषणाय उदीचीं दिशं प्रस्थितः।

६७. सिन्धुनदस्य तीरे अङ्गपरिवर्तनैः अपनीतश्रमाः सन्तः रघोरश्वाः कुङ्कमकेसरसंलग्नान् स्कन्धान् पुनः पुनः कम्पयन्ति स्म।

६८. रघुः तस्यान्दिशि हूणदेशाधिपान्तः पुरस्त्रीणां स्वामिनो निर्जित्य निजप्रचण्डं पराक्रमं प्रकटयन् तासां कपोलान् रक्तघुतीन् चकार अर्थात् हूणयोषितः कुचकपोलताडनपूर्वकम अरूदन्।

६९. कम्बोजाधिपाः रणे तस्य प्रतापम् असहमानाः सन्तो रघुगजश्रृङ्खलाकर्षणवेगेन

नम्रैः अक्षोटवृक्षैः सहैव नम्रा जाताः।

७०. विजितास्ते भूपतयः असङ्ख्यान् हस्त्यश्वादीन् सुवर्णसमूहांश्च रघवे उपहारीकृतवन्तः परन्तु रघुः अपरिमेयान् अपि तान् प्राप्य निरहङ्कार एव आसीत्।

७१. ततोऽश्वसहायो रघुः पर्वतीयान् कोलभिल्लाञ्जेतुं यदा हिमाचलमारुरोह तदा अश्वखुरन्यासोत्थापितप्रभूतगौरिकादिधातुधूलिदर्शनात् हिमाचलशिखरस्य वृद्धिभ्रमो जातः।

७२. महाबला गुहाशयाः सिंहाः भयोादकं रघुसेनाकलकलं श्रुत्वा निर्भयाः सन्तः स्वस्थानादेव ग्रीवां वक्रीकृत्य निजान्तः क्षोभशून्यत्वं प्रकटयामासुः।

७३. पथि शुष्कभूर्जपत्रेषु मर्मरशब्दं कुर्वन्तः वंशविवरेषु मधुरध्वनिम् उादयन्तः जाह्नवीजलकणाश्च सञ्चारयन्तो मान्द्यशैत्यसौगन्ध्यविशिष्टा वायवः रघोः मार्गखेदम् अपानयन्।

७४. रघुसैनिकाः नागकेसरवृक्षाणां छायासु मृगनाभिसुवासितानि पाषाणतलानि (चट्टान इति भाषा) मार्गश्रमापनयनार्थम् अधिष्ठितवन्तः।

७५. तत्र निशायां देदीप्यमाना वनौषधयः देवदारूतरूसम्बद्धगजानां कण्ठबन्धनेषु शृङ्खलादिषु प्रतिस्फुरितकान्तयः सत्यः रघोर्दीपावलीकार्यमकुर्वन्।

७६. रघुणा परित्यक्तेषु सेनानिवासेषु तस्य देवतारूवृक्षस्नकन्धेषु गजशृङ्खलाघर्षचिह्नानि मतङ्गजानां देहौन्नत्यम् अप्रकाशयन्।

७७. तत्र पर्वतीयैः भिल्लादिभिः सह रघोर्घोरं युद्धं बभूव रघुक्षिप्तानां बाणानां भिल्लादिनिक्षिप्तानां पाषाणानां च अन्योन्यसंघर्षणात् वह्नयः प्रादुरासन्।

७८. तत्र उवसङ्के तनाम्नां पर्वतवासिनां शरधारा सम्पातेन चिरमहोवान् कृतवतो रघोर्यशः किन्नराः सर्वतो जगुः।

७९. रघोः पर्वतीयानाञ्च परस्परसम्मेलनात् हिमालयवासिनः असंख्यमणिगणादिवस्तुजातानि रघवे उपहारीकृतवन्तः स च तानि अमूल्यानि रत्नानि समवलोक्य हिमाचलस्य कियद् धनबलमिति ज्ञातवान् हिमाचलोऽपि तस्य प्रचण्डं भुजदण्डपराक्रमं ज्ञातवान्।

८०. सः अनेन प्रकारेण हिमाद्रौ अचलं यशोराशिं संस्थाप्य कैलासमगत्वा तस्य लज्जां समुादयन्निव अवततार।

९.४.३ श्लोकानाम् असमीयानुवादः

তটদেশ চন্দন গছৰদ্বাৰা পৰিব্যাপ্ত দক্ষিণ দিশৰ স্তনদ্বয়ৰ নিচিনাকৈ শোভমান মলয় আৰু দর্দুৰ নামৰ পৰ্বতদ্বয় যথেচ্ছা উপভোগ কৰি দুঃসহ বিক্রমশালী ৰঘুই সমুদ্র দূৰলৈ আঁতৰি যোৱাত মেদিনীৰ নিতম্বৰ নিচিনা দৃশ্যমান সহ্য পর্বত অতিক্রম কৰিলে।

) অপৰান্ত অর্থাৎ পশ্চিমদেশ জয় কৰিবলৈ উদ্যত হৈ তেওঁৰ (ৰঘুৰ) সৈন্যদল যেতিয়া গমন কৰিব ধৰিলে, তেতিয়া বোধ হ'ল যেন সমুদ্র পৰশুৰামৰ অস্ত্রত দূৰলৈ অপসাৰিত হ'লেও পুনৰ যেন সহ্য পর্বতত লগ লাগিছে।

) কেৰল ৰমনীসকলে ভয়ত বেশভূষা পৰিত্যাগ কৰিলেও ৰঘুই তেওঁলোকৰ চূর্ণকুন্তলত সৈন্যৰ দ্বাৰা উৰা ধূলিকেই কুঙ্কুমাদিচূর্ণৰ প্রতিনিধি কৰাইছিল।

) মুৰলা নদীৰ বায়ুবেগে উত্থিত কেতেকীফুলৰ পৰাগে ৰঘুৰ সৈন্যৰ বর্মৰ ওপৰত স্বাভাৱিক সুগন্ধি চূর্ণৰ কার্য সম্পাদন কৰিলে।

) ধাৱমান ঘোঁৰাবিলাকৰ দেহ আৱৰণ বর্মৰ ধ্বনিত পৱনকম্পিত তালগছৰ মর্মৰ ধ্বনি আভিভূত হ'ল।

) ভোমো�ৰাবিলাকে নাগকেশৰ ফুল পৰিত্যাগ কৰি খেজুৰ গছৰ কাণ্ডত বন্ধা হাতীবোৰৰ মদধাৰা সুবাসিত গণ্ডস্থলত পৰিব ধৰিলে।

) সমুদ্রই পৰশুৰামৰ প্রার্থনানুসাৰেই তেওঁক বাসস্থান দিছিল। সেই সমুদ্রই পাশ্চাত্য ৰজাসকলৰ ছলেৰে মহাৰাজ ৰঘুক কৰদান কৰিলে।

) তেওঁ (ৰঘুৰে) তাত ত্রিকূট পর্বতকেই নিজৰ উচ্চ জয়স্তম্ভত পৰিণত কৰিলে। তেওঁৰ মদমত্ত হাতীবোৰৰ দন্তক্ষতবোৰেই সেই পর্বতৰ গাত সুব্যক্ত বিজয়লিপিৰূপে প্রতীত হ'ল।

) তাৰ পিছত সংযমী ব্যক্তিয়ে যিদৰে ইন্দ্রয়ৰূপ ৰিপুবিলাকক জয় কৰিবৰ বাবে তত্বজ্ঞান অৱলম্বন কৰে, ৰঘুৱেও তেনেকৈ পাৰসীকসকলক জয় কৰিবলৈ স্থলপথেৰে অগ্রসৰ হ'ল।

) অকালত মেঘৰ উদয়ে যিদৰে পদুমফুলৰ ওপৰত পৰা প্রভাতসূর্যৰ প্রভা নষ্ট কৰে। সেইদৰে তেৱেঁ (ৰঘুই) যৱন ৰমনীসকলৰ মদ্যপানজনিত ৰক্তিম আভা দূৰ কৰিলে।

) তেতিয়া অশ্বসৈন্যসম্পন্ন যৱনসকলৰ সৈতে তেওঁৰ (ৰঘুৰ) তুমুল সংগ্রাম হ'ল। ধূলিয়ে ৰণস্থল আচ্ছন্ন কৰি পেলোৱাত প্রতিপক্ষীয় যোদ্ধাৰ উপস্থিতি ধনুৰ শব্দৰ দ্বাৰাই অনুমান কৰি ল'লে।

) তেওঁ (ৰঘুৰে) ভল্লনামৰ অস্ত্রৰ দ্বাৰা যৱনসকলৰ মুণ্ডচ্ছিন্ন কৰি ভূতল আচ্ছন্ন কৰাত এনে লাগিল যেন মৌমাখি পৰিব্যাপ্ত মৌচাকেৰে তেওঁ পৃথিৰী আচ্ছাদিত কৰিলে।

) অৱশিষ্ট যৱনসকলে শিৰস্ত্রাণ উন্মোচন কৰি তেওঁৰ শৰণাপন্ন হ'ল। কিয়নো মহাত্মাসকলৰ ক্রোধ প্রণতিৰ দ্বাৰাই উপশম হয়।

) তেওঁৰ (ৰঘুৰ) সৈন্যবিলাকে দ্রাক্ষালতাপৰিবেষ্টিত ভূমিত উৎকৃষ্ট চর্মাসন পৰিবেষ্টিত কৰি সুৰাপানৰ দ্বাৰা যুদ্ধশ্রম দূৰ কৰিলে।

) ইয়াৰ পিছত সূর্যই যিদৰে নিজৰ কিৰণৰ দ্বাৰা পৃথিৰীৰ ৰস শোষণ কৰিবলৈ

উত্তৰায়ন অৱলম্বণ কৰে। সেইদৰে ৰঘুয়ো শৰৰ দ্বাৰা উত্তৰ দিশৰ ৰজাসকলক উন্মুলিত কৰিবৰ বাবে উত্তৰ দিশ অভিমুখে যাত্রা কৰিলে।

 তেওঁৰ (ৰঘুৰ) ঘোঁৰাবিলাক সিন্ধু নদীৰ পাৰত পার্শ্বপৰিবর্তন কৰি পথশ্রম দূৰ কৰি কুংকুমফুলৰ কেশৰ সংযুক্ত স্কন্ধদেশ কঁপাব ধৰিলে।

 তাত ৰঘুৰ পৰাক্রম হুন ৰজাসকলৰ ওপৰত এনেভাৱে পৰিল যে তেওঁলোকৰ অন্তঃপুৰচাৰিণী ৰমণীসকলৰ কপাল পর্যন্ত ৰঙা হ'ল।

 কম্বোজদেশীয় ৰজাসকলে ৰণক্ষেত্রত তেওঁৰ বিক্রম সহ্য কৰিব নোৱাৰি হাতী বান্ধোতে ভঙা অক্ষোট গছৰ সৈতে অৱনত হৈ পৰিল।

 তেওঁলোকৰ উৎকৃষ্ট ঘোঁৰাসমূহ আৰু পর্য্যাপ্ত ধনৰাশি উপহাৰৰূপে পালেও কোসলেশ্বৰ ৰঘু অলপো গর্বিত নহ'ল।

 তাৰ পিছত ৰঘুই অশ্বাৰোহী সৈন্য লৈ ঘোঁৰাৰ খুৰাত ওপৰলৈ উঠা গৈৰিকাদি ধাতুৰ ৰেনুৰ দ্বাৰা শৃংগসমূহক যেন আৰু বর্দ্ধিত কৰি হিমালয় পর্বতত আৰোহন কৰিলে।

 তুল্যবলশালী গুহাশায়ী সিংহবিলাকে সৈন্যকোলাহল শুনিও ভীত নহ'ল কেৱল ডিঙি ঘূৰাই সেইফালে অৱলোকন কৰিলে।

 ভুর্জপত্রত মর্মৰ ধ্বনিযুক্ত আৰু বংশবিশেষে শব্দ উৎপাদক গংগাশীকৰবাহী সমীৰণে বাটত তেওঁক (ৰঘুক) সেৱা কৰিব ধৰিলে।

 তেওঁৰ (ৰঘুৰ) সৈন্যসকলে নমেৰুগছৰ ছায়াত মৃগবিলাকৰ কস্তুৰী গন্ধত সুবাসিত শিলত উপবেশন কৰি বিশ্রাম কৰিব ধৰিলে।

 দেৱদাৰু গছত বন্ধা হাতীবিলাকৰ ডিঙিত থকা ঔষধিসমূহৰ জ্যোতি প্রতিফলিত হৈ ৰাতি অধিনায়কৰ (ৰঘুৰ) তৈলহীন প্রদীপৰ কাম কৰিছিল।


 তেওঁ (ৰঘুৰে) যি ঠাইৰ পৰা শিবিৰ উঠাই লৈ যায়, তাতে দেবদাৰু গছবিলাকত হাতীবিলাকৰ ডিঙিৰ ৰচীৰ ঘঁহনিৰ চিনৰ দ্বাৰা ৰাজহস্তীৰ উচ্চতাৰ পৰিচয় দিছিল।

 সেই ঠাইত ৰঘুৰ পার্বত্যসকলৰ লগত নাৰাচ, ভিন্দিপাল আদি অস্ত্র আৰু শিলাবর্ষণৰ সংঘর্ষত অগ্নি প্রজ্জ্বলিত হৈ ভয়ানক যুদ্ধ হ'ল।

 তেওঁ (ৰঘুৰে) শৰেৰে সেই উৎসৱ সংকেত নামৰ পার্বত্যজাতিক পৰাজয় কৰি কিন্নৰসকলক বাহুবলেৰে জয়গানত নিযুক্ত কৰিলে।

 তেওঁলোকে (অর্থাৎ পার্বত্য জাতিসমূহে) উপহাৰ লৈ উপস্থিত হোৱাত মহাৰাজ ৰঘুই যেনেকৈ হিমালয়ৰ ৰত্নসমৃদ্ধি বুজিব পাৰিলে, হিমালয়েও তেনেকৈ ৰঘুৰ বীর্য্যবত্তা বুজিব পাৰিলে।

 হিমালয়ে নিজৰ স্থিৰ যশোৰাশি স্থাপন কৰি আৰু ৰাৱণে উত্তোলিত কৈলাসপর্বতক যেন লজ্জিত কৰি তেওঁ (ৰঘুই) অৱতৰণ কৰিলে।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: मुरलानद्याः वर्तमानं नाम किम्?

.....

प्रश्नः २: पश्चिमे दिशि रघुजितं पर्वतं नाम लिखतु?

.....

प्रश्नः ३: रघुः कस्मिन् दिशि विजयार्थं गतवान् आसीत्।

.....

प्रश्नः ४: कम्बोजदेशस्य वर्तमानं स्थानं कुत्र अस्ति।

.....

प्रश्नः ५: उत्सव संकेत किमस्ति?

.....

९.५ श्लोकानां व्याख्या

५१-५२- असह्यविक्रमः =असह्यपराक्रमः, सः = रघुः तटेषु = तीरेषु, आलीनचन्दनौ = चन्दनाचर्चितौ, तस्याः = दक्षिणस्याः दिशः, स्तनाविव = कुचाविव मलयदर्दुरौ = मलयदर्दुरनामकौ शैलौ = पर्वतौ यथाकामम् = यथेच्छम् निर्विश्य = उपभुज्य दूरात् = विप्रकृष्टात् उदन्वता = समुद्रेण मुक्तम् = त्यक्तम् स्रस्तांशुकम् = विगलितवसनम् मेदिन्याः = भूमेः नितम्बम् = श्रेणीतटम् इव 'स्थितं' सह्यम् = सह्यनामाचलम् अलङ्घयत् = अतिक्रान्तवान्।

५३. अपरान्तजयोन्द्यतैः = कौङ्कणदेशविजयोद्युक्तैः (कौङ्कणस्तु पाश्चात्यदेशविशेषः) अपरान्तास्तु पाश्चात्याः इति यादवः विसर्पद्भिः = प्रसरणशीलैः तस्य = रघोः अनीयकैः = सैन्यः सैन्यञ्चानीकमस्त्रियाम् इत्यमरः अर्णवः = सागरः रामास्त्रोारितः = जामदग्न्यास्त्रापसारितोऽपि सह्यलग्नः = सह्याख्यपर्वतसंलग्नः इव आसीत् = अभूत्।

५४. तेन= रघुणा भयोदृष्टविभूषाणां= भीतिपरिहृतालङ्काराणाम् 'भूषा तु स्यादलङ्क्रिया' इत्यमरः केरलयोषिताम्= केरलदेशोद्भवाङ्गानाम् अलकेषु= कुन्तलेषु चमूरेणुः= सेनाधूलिः चूर्णप्रतिनिधीकृतः= कुङ्कमादिरजःस्थानापन्नीकृतः।

५५. मुरलामारुतोद्धूतम्=मुरलानदीवायूत्थापितम् कैतकम्= केतकीकुसुमसम्बन्धि रजः= परागः तद्योधवाराणानाम्= रघुभटकञ्चुकानाम् 'कञ्चुको वारबाणोऽस्त्री' इत्यमरः अयत्नपटवासताम्= अप्रयासवसनसुगन्धिचूर्णत्वम् अगमत्= जगाम।

५६. चरताम्= गच्छताम् वाहानाम्= अश्वानाम् गात्रशिञ्जितैः= सत्वरगमनवशाद् ग्रैवेयादिभूषणयोगेन शब्दायमानैः वर्मभिः= कवचैः पवनोद्धूतराजतालीवनध्वनिः= वायुकम्पिततालवृक्षपत्रध्वनेः अभ्यभूयत= तिरस्कृतः।

६७. शिलीमुखाः= अलयः पुन्नागेभ्यः= नागकेशरेभ्यः खर्जूरीस्कन्धनद्धानाम्= तृणद्रुमप्रकाण्डबद्धानाम् करिणाम्= गजानाम् मदोद्गारसुगन्धिषु= मदस्रावसुगन्धिषु कटेषु= गण्डेषु पेतुः= पेताः।

५८. उदन्वान्= उदधिः अभ्यर्थितः= प्रार्थितः सन् रामाय= परशुरामाय अवकाशम्= स्थानम् ददौ किल= दत्तवानिति प्रसिद्धिर्वर्तते रघवे= राज्ञे दिलीपसूनवे तु अपरान्तमहीपालव्याजेन= पाश्चात्यभूपच्छद्मना करम्= बलिम् ददौ= अददात्।

५९. सः=रघुः तत्र= केरलदेशे मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम्= मदोन्मत्तगजदन्तक्षतस्पष्टपराक्रमचिह्नम् त्रिकूटम्= त्रिकूटाचलम् एव उच्चैः= उच्छ्रितम् जयस्तम्भम्= विजयसूचकं स्तम्भम् चकार= विदधौ।

६०. ततः= त्रिकूटपर्वतरूपजयस्तम्भस्थापनानन्तरम् संयमी= योगी सः= रघुः तत्वज्ञानेन= परमतत्वावबोधेन इन्द्रियाख्यान्=इन्द्रियाभिधान् रिपून्= शत्रून् इव पारसीकान्= पारसदेशभूमिपान् जेतुम्= वशीकर्तुम् स्थलवर्त्मना= स्थलमार्गेण प्रतस्थे= चलितः।

६१. सः= रघुः, अकालजलदोदयः= असमयमेघोदयः, अब्जानाम्=कमलानाम्, बालातपम्= कोमलातपम् इव, यवनीमुखपद्मानाम्= यवनदेशीयकामिनीमुखकमलानाम्, मधुमदम्= मदिरापानजनितां क्षीबताम्, न सेहे= न चक्षमे।

६२. तस्य= रघोः अश्वसाधनैः= तुरङ्गसाधनैः पाश्चात्त्यैः= यवनैः सह= सार्धम् शार्ङ्गकूजितविज्ञेयप्रतियोधे= चापटङ्कारानुमेयप्रतिभटे रजसि= धूलौ तुमुलः= सङ्कुलः सङ्ग्रामः= युद्धम् अभूत्= बभूव।

६३. सः=रघुः सरघाव्यातैः= मधुमक्षिकावेष्टितैः क्षौद्रपटलैः= मधुसमूहैः इवभल्लापवर्जितैः= अर्धचन्द्राकृतिबाणविशेषकृत्तैः श्मश्रुलैः= श्मश्रुव्याप्तैः तेषाम्= पाश्चात्यादेशवासिनम् शिरोभिः= मस्तकैः महीम्= पृथ्वीम् तस्तार= आच्छादयामास।

५४. शेषाः= हतावशेषाः अपनीतशिरस्त्राणाः= अपसारितशीर्षण्याः तम्= रघुम् शरणम्= रक्षकम् ययुः= प्रापुः हि= यतः महात्मनाम्= महानुभावानाम् संरम्भः= कोपः प्रणिपातप्रतीकारः= प्रणत्यपनेयः भवति।

६५. तद्योधाः=रघुभटाः आस्तीर्णाजिनरत्नासु= प्रसारितचर्मश्रेष्ठासु द्राक्षावलयभूमिषु= द्राक्षावेष्टितमण्डपेषु मधुभिः= द्राक्षाफलप्रकृतिकैः विजयश्रमम्= विजयखेदम् (सङ्ग्रामखेदमित्यर्थः) विनयन्ते स्म= दूरीकुर्वन्ति स्म।

६६. ततः=पाश्चात्यविजयानन्तरम्, भास्वान्= सूर्यः, इव, रघुः, उस्रैः= किरणैः, इव, शरैः= बाणैः, रसान्= उदकान्, इव, उदीच्यान्= उदद्रिग्भवान्, उद्धरिष्यन्= उन्मूलयिष्यन्, कौवेरीम्= कुबेरसम्बन्धिनीम्, दिशम्= काष्ठाम्, प्रतस्थे= चलितः।

६७. सिन्धुतीरविचेष्टनैः=सिन्धुनदतटाङ्गपरिवर्तनैः, विनीताध्वश्रमाः=अपनीतमार्गखेदाः, तस्य= रघोः, वाजिनः= अश्वाः, लग्नकुङ्कमकेसरान्= संलग्नकुङ्कमकिञ्जल्कान्, स्कन्धान्= कायान्, दुधुवुः= कम्पयन्ति स्म।

६८. तत्र= उत्तरस्यान्दिशि भर्तृषु= स्वामिषु व्यक्तविक्रमम्= प्रकटपराक्रमम् रघुचेष्टितम्= रघुव्यापारः हूणावरोधानाम्= हूणान्तः पुरस्त्रीणाम् कपोलपाटलादेशि= कपोलरक्तवर्णसूचकम् बभूव= आसीत्।

६९. काम्बोजाः= कम्बोजदेशवासिनो राजानः समरे= युद्धे तस्य= रघोः विक्रमम्= पराक्रमम् सोढुम्= मर्षितुम् अनीश्वराः= असमर्थाः गजालानपरिक्लिष्टैः= करिबन्धनपरिक्षतैः अक्षोटैः= अक्षोटवृक्षैः सार्धम्= सह आनताः= बभूवुः (नम्रा जाताः)।

७०. तेषाम् = कम्बोजाधिपानाम् सदश्वभूयिष्ठाः= उत्तमतुरङ्गबहुलाः तुङ्गाः= उच्चाः द्रविणराशयः= हिरण्यराशयः उपदाः= उपहाराः कोशलेश्वरम्= कोशलदेशाधिपम् विविशुः= प्राप्तवन्तः नोकाः= अहङ्काराः न विविशुः।

७१. ततः= तदनन्तरम्, अश्वसाधनः= तुरङ्गमात्रसहायः, सन् गौरीगुरुम्= उमापितरम्, शैलम्= हिमाचलम्, उद्धूतैः=अश्वखुरोत्थापितैः, धातुरेणुभिः= गैरिकादिधातुधूलिभिः, तत्कूटान्= हिमाद्रिश्रृङ्गाणि, वर्धयन्= संवर्धयन्, इव, आरुरोह= अध्यारूढवान्।

७२. तुल्यसत्वानाम्=सैन्यसमानबलानाम् गुहाशयानाम्= कन्दरानिद्रितानाम् सिंहानाम्= मृगेन्द्राणाम् परिवृत्य= ग्रीवां वक्रीकृत्य अवलोकितम्= अवलोकनम् सैन्यघोषे= सैन्यगर्जने अपि असम्भ्रमम्= अन्तःक्षोभशून्यत्वम् शशंस= कथयामास।

७३. भूर्जेषु=भूर्जपत्रेषु मर्मरीभूताः= मर्मरशब्दकारिणः कीचकध्वनिहेतवः= वेणुविशेषशब्दकारणीभूताः गङ्गाशीकरिणः= गङ्गाम्बुकणवाहिनः मरुतः= वायवः मार्गे= पथि तम्= रघुम् सिषेविरे= सेवितवन्तः।

७४. सैनिकाः= सैन्याः नमेरूणाम्= देवनागकेसरवृक्षाणाम् छायासु= अनातपेषु निषण्णमृगनाभिभिः= पाषाणोपविष्टकस्तूरीमृगनाभिभिः वासितोङ्गाः= सुगन्धिततलाः दृषदः= पाषाणान् अध्यास्य= अधिष्ठाय विशश्रमुः= श्रममपनीतवन्त।

७५. सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः= देवदारूसंसक्तकरिकण्ठश्रृङ्खलास्फुरितभासः ओषधयः= ज्वलज्ज्योतिर्लताविशेषाः नेतुः= रघोः नक्तम्= रात्रौ अस्नेहदीपिकाः= तैलरहितप्रदीपाः आसन्= अभूवन्।

७६. तस्य= रघोः उष्टनिवासेषु= त्यक्तसेनानिवेशेषु कण्ठरज्जुक्षतत्वचः= श्रृङ्खलाक्षोपरिभागाः देवदारवः= सरलवृक्षाः किरातेभ्यः= पुलिन्देभ्यः गजवर्ष्म= गजदेहप्रमाणम् शशंसुः= कथयामासुः।

७७. तत्र= हिमाचले, रघोः, पर्वतीयैः= पर्वतनिवासिभिः, गणैः= उवसङ्केताख्यैः, नाराचक्षेपणीयाश्मनिष्पेषोतितानलम्= लोहबाणपाषाणशकलसङ्घर्षोत्थितवह्निम्, घोरम्= भयङ्करम्, जन्यम्= युद्धम्, अभूत्= बभूव।

७८. सः= रघुः शरैः= बाणैः उवसङ्केतान्= उवसङ्कताभिधसप्तगणान् विरतोवान्= नष्टयुद्धोहान् कृत्वा= विधाय किन्नरान्= तदाख्यदेवयोनिविशेषान् बाह्वोः= निजभुजयोः जयोदाहरणम्= जयख्यापकम् गापयामास।

७९. तेषुगणेषु = उवसङ्केताभिधेषु उपायनपाणिषु= गृहीतोपहारहस्तेषु परस्परेण= अन्योन्येन राज्ञा= रघुणा हिमवतः= हिमाद्रेः सारः= बालः हिमाद्रिणा च राज्ञः= रघोः सारः= बलरूपम् विज्ञातः= अवगतः।

८०. सः= रघुः तत्र= हिमाद्रौ अक्षोभ्यम्= अधृष्यम् यशोराशिम्= कीर्तिसमूहम् निवेश्य= स्थापयित्वा पौलस्त्यतुलितस्य= रावणचालितस्य अद्रेः= कैलासस्य ह्रियम्= ह्रियम् आदधानः= उादयन् इव अवरुरोह= अवततार।

९.६ श्लोकानां व्याकरणांशाः (प्रकृतिप्रत्ययसमाससहितम्)

५१. निर्विश्य - निर्विश् + ल्यप्।
स्तनाविव = स्तनौ + इव, दिशस्तस्याः = दिशः + तस्याः।

५२. अलङ्घयत्- लघिँ (गतौ भोजननिवृत्तौ च घातुः) लङ्लकारस्य प्रथमपुरुषैकवचनम्।

५३. अनीकः - नास्ति नीः स्वर्गप्रापको यस्मात् इति। (युद्धसैन्यम्)
अर्णवः - अर्णांसि जलानि सन्त्यस्मिन् इति। समुद्र इत्यर्थः।
समुद्रोऽब्धिरकूपारः पारावारः सरितिः।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः॥ (अमरकोशे)

५४. चमूः - सेना इत्यर्थः।

५५. कैतकम् - केतक्या इदम्। केतकीपुष्पम् इत्यर्थः।
रजः - रञ्जयतीति। √रन्ज् + अच् प्रत्ययः। (परागः इत्यर्थः)।

५६. वाहः - वह् + घञ् । (घोटकः)
वर्म्म - वर्म्मन् नपुंसकलिङ्गशब्दः, वृ + मनिन् प्रत्ययः।

५८. करः - राजग्राह्यो भागः।

५९. चकार - √कृ + लिट्लकारस्य प्रथमपुरुषैकवचनम्।

६०. जेतुम् - जि (जये) + तुमुन्।

६१. मुखपद्मानाम् - मुखानि पद्मानि इवेति मुखपद्मानि, यवनीनां मुखपद्मानि, तेषाम् मुखपद्मानाम्।

६२. तस्तार - स्तृञ् (आच्छादने) + लिट्लकारैकवचनम्।

६६. प्रतस्थे - प्र + स्था लिट्लकारस्य प्रथमपुरुषैकवचनम्।

६७. दुधुवुः - धुञ् (कम्पने) लिट्लकारस्य प्रथमपुरुषस्य बहुवचनम्।

६८. बभूव - भू + लिट्लकारस्य प्रथमपुरुषैकवचनम्।

६९. सोढुम् - सह् (षंह) मर्षणे + तुमुन्।

७०. विविशुः - विशं (प्रवेशने) लिट्लकारस्य प्रथमपुरुषस्य बहुवचनम्।

७१. आरुरोह - आङ् √रुहं लिट्लकारस्य प्रथमपुरुषस्य एकवचनम्।

७२. शशंस - शन्सुँ (स्तुतौ) लिट्लकारस्य प्रथपुरुषैकवचनम्।

७३. सिषेविरे - षेवृँ (सेवने) लिट्लकारस्य प्रथमपुरुषस्य बहुवचनम्।

७४. विशश्रमुः - वि (श्रमुँ तपसि खेदे च)+लिट्लकारस्य प्रथमपुरुषस्य बहुवचनम्।

७५. आसन् - √अस् + लङ्लकारस्य प्रथमपुरुषस्य बहुवचनम्।

७८. गापयामास -√गै (शब्दे) + णिच् लिट्लकारस्य प्रथमपुरुषस्यैकवचनम्।

७९. विज्ञातः - वि+ ज्ञा + क्त प्रत्ययः।

८०. अवरुरोह -अव + √रुहं (बीजजन्मनि प्रादुर्भावे च) लिट्लकारस्य प्रथमपुरुषस्यैकवचनम्।
परिवृत्य-परि- √वृत् + ल्यप्।



९.७ अध्यायात् किमवगतम्

वयं सर्वे सर्वादौ अस्य महाकाव्यस्य वैशिष्ट्यं ज्ञातवन्त। तत् पश्चात् कथं रघोः तेज आसीत् येन सर्वे तस्य भीता आसन्। ततः अनेकदेशानां ज्ञानं वयं प्राप्तवन्तः। यत्र रघुः स्वस्य विजयपताका कीर्तिपताका च प्रसारितवान्। अन्यच्च अत्र अनेकव्याकरणजटिलशब्दानां ज्ञानं लब्धम्।



९.८ ज्ञानाधिक्यम्

१) काले, एम्.आर.(सम्पादनम्) रघुवंशम् अक् कालिदासः(१-५),दिल्ली,मतिलाल वनारसीदास पब्लिक प्राईवेट लिमिटेड।

२) गोस्वामी, डॉ. मालिनी (२००९) रघुरपि काव्यम्, गुवाहाटी चन्द्रप्रकाशः।

३) महाकविकालिदासप्रणीत-रघुवंशमहाकाव्य-सम्पूर्ण (मोतीलाल बनारसीदास, दिल्ली, वाराणसी, पटना, मद्रास। प्रथमसंस्करण- १९७४, द्वितीय परिवर्धित संस्करण- १९८७)



१२.१० अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : नर्मदा।

प्रश्नः २ : उत्तरम् : सह्यपर्वतः।

प्रश्नः ३ : उत्तरम् : उत्तरदिशः।

प्रश्नः ४ : आफगानिस्तानस्य उत्तरांश।

प्रश्नः ५ : उत्तरम् : एका पार्वत्या जाति इति अस्ति।



९.१२ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् ५० शब्देषु लिखन्तु)

प्रश्नः १- रघुदिग्विजयं कथं कृतवान्? स्वमत्या निरूप्यताम्?

प्रश्नः २- 'केरल' विषये संक्षिप्तं लिखतु।

ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरम् १५० शब्देषु लिखन्तु)

प्रश्नः १- व्याकरणगतटोका लिखतु - अभ्यभुयत्, शिलीमुखाः, संरम्भः।

प्रश्नः २- मङ्गलश्लोकस्य व्याख्यां कुर्वन्तु?

ग) नातिदीर्घाः प्रश्नाः- (प्रत्येकानां प्रश्नानाम् उत्तरम् ३००-५०० शब्देषु लिखन्तु)

प्रश्नः १. रघोः पश्चिमदिशि अभियानस्य विषये टोका लिखतु।

प्रश्नः २. रघोः उत्तरयात्रायाः विवरणं ददातु।

*** ***** ***

अध्यायः १० : रघुवंशम्-चतुर्थसर्गः (श्लोकाः ८१-८८)

अध्यायस्य संरचना

१०.१ उद्देश्यम्

१०.२ परिचयः

१०.३ चतुर्थसर्गस्य संस्कृतपद्यानि(८१-८८)

- १०.३.१ श्लोकानाम् अन्वयः
- १०.३.२ श्लोकानाम् अर्थः
- १०.३.३ श्लोकानाम् असमीयानुवादः
- १०.३.४ श्लोकानां मूलविषयः

१०.४ व्याकरणात्मकटिप्पणी

१०.५ महाकवि कालिदासस्य रचनाशैली

१०.६ उपमा कालिदासस्य

१०.७ चतुर्थसर्गस्य केषाञ्चन पद्यानां व्याख्या

१०.८ चतुर्थसर्गस्य महत्वपूर्णवाक्यानां भावार्थः

१०.९ अध्यायात् किमवगतम्

१०.१० ज्ञानाधिक्यम्

१०.११ अग्रगत्याः निरूपणम्

१०.१२ अभ्यासप्रश्नाः

३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- रघुवंशम् महाकाव्यस्य मूलविषयस्य सारांशः ज्ञास्यामः।
- चतुर्थसर्गस्य पद्यसंख्या (८१-८८) पर्यन्तं संस्कृतपाठं पठामः, पद्यानां गद्यपाठं शब्दार्थश्च ज्ञास्यामः।
- पद्यानां वैय्याकरणविश्लेषणं ज्ञास्यामः।
- महाकविकालिदासस्य रचनाशैलीम् अवगच्छामः।
- महाकविकालिदासस्य रचनासु उपमादि अलङ्कारप्रयोगविषये ज्ञास्यामः।
- रघुवंशम् महाकाव्यस्य चतुर्थसर्गस्य केषांचन पद्यानां व्याख्या जानीमः।

१०.२ परिचयः

संस्कृतसाहित्ये कालिदासः अत्यन्तं प्रसिद्धः अस्ति। रघुवंशम् महाकाव्यम् तस्य अन्यकाव्येषु प्रसिद्धमस्ति। इतः पूर्वं भवद्भिः रघुवंशमहाकाव्यस्य चतुर्थसर्गस्य (८१-८८) पर्यन्तं

पद्यानि अपठन् अस्य अध्यायस्य पठनेन कालिदासस्य रचनाशैलीम् अवगन्तुं शक्नुवन्ति। पाठेऽस्मिन् केषांचन पद्यानां संस्कृतगद्यपाठम्, शब्दार्थान् च पठिष्यन्ति।

१०.३ चतुर्थसर्गस्य संस्कृतपद्यानि (८१-८८)

चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः॥ ८१
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम्।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम्॥ ८२
तमीशः कामरूपाणामत्याखण्डलविक्रमम्।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः॥ ८३
कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम्।
रत्नपुष्पोपहारेण छायामानर्च पादयोः॥ ८४
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम्।
रजो विश्रामयन्नाज्ञां छत्रशून्येषु मौलिषु॥ ८५
स विश्वजिमाजह्रे यज्ञं सर्वस्वदक्षिणाम्।
आदानं हि विसर्गाय सतां वारिमुचामिव॥ ८६
सत्रान्ते सचिवसखः पुरस्क्रियाभि-
र्गुर्वीभिः शमितपराजयव्यलीकान्।
काकुत्स्थश्चिरविरहोत्कावरोधान्
राजन्यान्स्वपुरनिवृत्तयेऽनुमेने॥ ८७
ते रेखाध्वजकुलिशातपत्रचिह्नं,
सम्राजश्चरणयुगं प्रसादलभ्यम्।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम्॥ ८८

१०.३.१ श्लोकानाम् अन्वयः

८१. तस्मिन्, तीर्णलौहित्ये, सति प्राग्ज्यौतिषेश्वरः, तद्गजालानताम्, प्राप्तैः, कालागुरूद्रुमैः, सह, चकम्पे।

८२. सः, रुद्धार्कम्, अधारावर्षदुर्दिनम्, अस्य, रथवर्त्मरजः, अपि, न, प्रसेहे, पताकिनीम्, तु कुतः, एव, प्रसेहे।

८३. कामरूपाणाम्, ईशः, यैः, अन्यान्, उपरुरोधः, भिन्नकटैः, तैः, नागैः, अत्याखण्डलविक्रमम्, तम्, भेजे।

८४. कामरूपेश्वरः, हेमपीठाधिदेवताम्, तस्य, पादयोः, छायाम्, रत्नपुष्पोपहारेण, आनर्च।

८५. जिष्णुः, सः, इति दिशः, जित्वा, रथोद्धतम्, रजः, छत्रशून्येषु, राज्ञाम्, मौलिषु, विश्रामयन्, न्यवर्तत।

८६. सः, सर्वस्वदक्षिणम्, विश्वजितम्, यज्ञम्, आजह्रे, हि, वारिमुचाम्, इव, सताम्, आदानम्, विसर्गाय भवति।

८७. काकुत्स्थः, सत्रान्ते, सचिवसखः, गुर्वोभिः, पुरस्क्रियाभिः, शमितपराजयव्यलीकान्, चिरविरहोकावरोधान्, राजन्यान् स्वपुरनिवृत्तये, अनुमेने।

८८. ते, रेखाध्वजकुलिशातपत्रचिह्नम्, प्रसादलभ्यम्, सम्राजः, चरणयुगम्, प्रस्थानप्रणतिभिः, अङ्गुलीषु, मौलिस्रकच्युतमकरन्दरेणुगौरम्, चक्रुः।

१०.३.२ श्लोकानाम् अर्थः

८१. तस्मिन् = रघौ, तीर्णलौहित्ये = अतिक्रान्तब्रह्मपुत्रे, सति प्राग्ज्यौतिषेश्वरः = कामरूपजनपदेश्वरः, तद्गजालानताम् = रघुकरिबन्धनस्तम्भताम्, प्राप्तैः = सम्प्राप्तैः, कालागुरूद्गमैः = कृष्णागुरूपादपैः, सह = साकम्, चकम्पे = कम्पितवान्।

८२. सः = प्राग्ज्यौतिषेश्वरः, रुद्धार्कम् = आच्छान्नसूर्यम्, अधारावर्षदुर्दिनम् = धारावृष्टिम्, अस्य = रघोः, रथवर्त्मरजः = रथमार्गधूलिः, अपि न प्रसेहे = न शेके, पताकिनीम् = सेनाम्, तु कुतः, एव प्रसेहे न कथमसहिष्ट।

८३. कामरूपाणाम् = कामरूपजनपदानाम्, ईशः = अधिपः, यैः = नागैः न , अन्यान् = रघुव्यतिरिक्तान् वैरिभूतान् नृपान्, उपरुरोधः = निराचकार, भिन्नकटैः = प्रस्रवन्मदगण्डैः, तैः, नागैः = गजैः, अत्याखण्डलविक्रमम् = अतिक्रान्तेन्द्रपराक्रमम्, तम् = रघुम्, भेजे = सिषेवे।

८४. कामरूपेश्वरः = कामरूपदेशाधिपः, हेमपीठाधिदेवताम् =सुवर्णपीठाधिष्ठातृदेवताम्, तस्य = रघोः, पादयोः = चरणयोः, छायाम् = सुवर्णमयपादपीठप्रतिबिम्बितां कान्तिम्, रत्नपुष्पोपहारेण = रत्नकुसुमोपायनेन, आनर्च = पूजयामास।

८५. जिष्णुः = विजयशीलः, सः = रघुः इति, दिशः = ककुभः, जित्वा = स्वायत्तीकृत्य, रथोद्धतम् = रथोत्थापितम्, रजः = धूलिम्, छत्रशून्येषु = छत्ररहितेषु, राज्ञाम् = नृपाणाम्, मौलिषु = किरीटेषु, विश्रामयन् = सङ्क्रामयन्, न्यवर्तत = परावृत्तः।

८६. सः = रघुः, सर्वस्वदक्षिणम् = समस्तवित्तदक्षिणम्, विश्वजितम् = विश्वजितम्, यज्ञम् = यागम्, आजह्रे = चक्रे, हि= यतः, वारिमुचाम् = मेघानाम्, इव = यथा, सताम् = सज्जनानाम्, आदानम् = उपार्जनम्, विसर्गाथ = त्यागायभवति।

८७. काकुत्स्थः = रघुः, सत्रान्ते = यज्ञावसाने, सचिवसखः = मन्त्रिसहायः, गुर्वोभिः = महतीभिः, पुरस्क्रियाभिः = अर्चाभिः, शमितपराजयव्यलीकान् = दूरीकृतपराभवजनितदुःखान्, चिरविरहोत्सुकावरोधान् = चिरवियोगोत्कण्ठितान्तः

पुरान्, राजन्यान् = क्षत्रियान्नृपान्, स्वपुरनिवृत्तये = निजनगरम्प्रति गमनाय, अनुमेने = ज्ञातवान्।

८८. ते = राजानः, रेखाध्वजकुलिशातपत्रचिह्नम् = ध्वजवज्रच्छत्राकाररेखाचिह्नितम्, प्रसादलभ्यम् = प्रसन्नतया प्राप्यम्, सम्राजः = चक्रवर्तिनः रघोः, चरणयुगम् = पादयुग्मम्, प्रस्थानप्रणतिभिः = प्रयाणकालीननमस्कारैः, अङ्गुलीषु = करशाखासु, मौलिस्रक्च्युतमकरन्दरेणुगौरम् = मौलिमाल्यगलितपुष्परसपरागगौरवर्णम्, चक्रुः = कृतवन्तः।

१०.३.३ श्लोकानाम् असमीयानुवादः

- তেওঁ লৌহিত্যনদী পাৰ হোৱাত হাতীবিলাকৰ বন্ধন স্তম্ভৰূপে গৃহীত হোকলা অগৰু গছ যিদৰে কম্পিত হ'ল, সেইদৰে সেইদেশৰ ৰজায়ো সন্তুষ্ট হৈ উঠিছিল।
- তেওঁ ৰঘুৰ সৈন্যবিলাকৰ প্রতাপ সহ্য কৰাটো দূৰৰ কথা। তেওঁৰ সেই বৃষ্টিহীন মেঘাচ্ছন্ন দিনৰ নিচিনা সূর্যৰকিৰন ৰুদ্ধকাৰী ৰথৰ বাটৰ ধূলিবোৰো সহ্য কৰিব নোৱাৰিলে।
- কামৰূপৰ ৰজাই মদস্রাবী হাতীবোৰ উপহাৰস্বৰূপে দি সেই ইন্দ্রতকৈও পৰাক্রমী ৰঘুৰ শৰণাপন্ন হ'ল,— যিবোৰ হাতীৰ সহায়ত তেওঁ আন ৰজাসকলক পৰাস্ত কৰিছিল।
- কামৰূপৰ অধিপতিয়ে ৰত্নৰূপ পুষ্প উপহাৰেৰে স্বর্ণময় পাদপীঠৰ অধিষ্ঠাত্রী দেৱতাস্বৰূপ তেওঁৰ চৰণছায়াৰ অর্চনা কৰিলে।
- জয়শীল ৰঘুৱে এইদৰে আটাইবোৰ দিশ জয় কৰি বিজিত ৰজাসকলৰ ছত্রশূন্য মূৰত নিজৰ ৰথেৰে উৰা ধূলিবোৰ নিক্ষেপ কৰি প্রত্যাৱর্তন কৰিলে।
- ৰঘুই, বিশ্বজিৎ নামৰ যজ্ঞৰ অনুষ্ঠান কৰি দক্ষিণাস্বৰূপে সর্বস্ব দান কৰিলে। কাৰণ মেঘে যিদৰে বর্ষণৰ বাবেই বাৰি সঞ্চয় কৰে। সাধুপুৰুষসকলেও দানৰ বাবেই ধন সঞ্চয় কৰে।
- যজ্ঞৰ শেষত ৰঘুই মন্ত্রীসকলক লগত মিলিত হৈ প্রচুৰ সন্মান প্রদর্শনত পৰাজিত ৰজাসকলৰ পৰাভৱজনিত বেজাৰ উপশম কৰিলে।। সেই ৰজাসকলৰ দীর্ঘকাল অদর্শনত তেওঁলোকৰ অন্তঃ পুৰবাসিনী উৎকণ্ঠিত আছিল বুলি তেওঁলোকক ৰাজধানীলৈ উভটি যাৱলৈ অনুমতি দিলে।
- প্রস্থান কৰাৰ সময়ত ৰঘুৰ ধ্বজ, বজ্র আৰু ছত্রৰেখাঙ্কিত অনুগ্রহলভ্য চৰনযুগলত প্রণাম কৰিলে। তেওঁলোকৰ মৌলিমালাৰ পৰা মকৰন্দ আৰু পৰাগ পৰি সম্রাটৰ আঙুলিবোৰ বগা কৰি তুলিলে।

१०.३.४ श्लोकानां मूलविषयः

रघुः दिग्विजययात्रायां हिमालयविजयपश्चात् लौहित्यनामकनदीम् उत्तीर्य प्राग्ज्योतिषपुरे प्रवेशम् अकरोत्। रघोः प्रवेशवेलायां कालागुरूवृक्षेषु बन्धनमानाः गजाः यथा कम्पिताः सन् तथैव प्राग्ज्योतिषपुरस्याधिपतिरपि रघोः विभेति स्म। (८१) कामरूपदेशस्य नृपः सूर्यमण्डलावरणाकारिणी वृष्टिः विना दुर्दिनं कुर्वतीं रघुसेनाः धूलिमपि दूरतः दृष्टा न सहनं चकार। सेनाः तु कृत एव इत्यर्थः। (८२) कामरूपदेशस्य अधिपतिः इन्द्राधिकपराक्रमं रघुं तान् गजानुपायनीयकृत्य शरणं गतः यैः पूर्वम् अन्यशत्रून् जघान। (८३) कामरूपाधिपतिः सुवर्णसिंहासनाधिष्ठात्रीं रघुपादच्छायां रत्नपुष्पहारैः पूजयामास। (८४) एवं रघुः सर्वाः अपि दिशः जित्वा पराजितेषु छत्ररहितराजशिरःसु निजसेनोत्यापितां धूलिं सङ्क्रामयन् दिग्विजयान् विववृते। (८५) दिग्विजयानन्तरं रघुः विश्वजित् नामकं यज्ञं कर्तुम् आरब्धवान्। यथा मेघाः समुद्रात् जलम् आदाय तत् वर्षणेन विश्वहितं कुर्वन्ति तथैव सज्जनानामपि द्रव्यसञ्चयः परहिताय एव भवन्ति। (८६) रघुः विश्वजित् नामकयज्ञानन्तरम् अमात्यानुमत्यापराजयखिन्नान् विरहितान्तः पुरान् राज्ञः पुरस्कारादिना विशेषसम्मानितान् कृत्वा स्वनगरगमनाय अनुमतिं प्रददाति। (८७) यज्ञावसाने लब्धगृहगमनानुमतयः राजानः प्रस्थानकालिकप्रणतिभिः रघोः चरणयुगलं शिरोभिः पस्पृशुः। तदा च तेषां मुकुटस्थमालाभ्यः निपतितैः पुष्परसैः परागैः च रघुपादाङ्गुलयः गौरवर्णाः सञ्जाता। (८८)

१०.४ व्याकरणात्मकटिप्पणी

८१. व्युत्पत्तिः

चकम्पे =√कम्प् + लिट् च

समासः- तीर्णलोहित्ये = तीर्णः लोहित्यः येन (बहुव्रीहिः) तस्मिन्

कालागुरूद्रुमैः - कालाः अगरूः (कर्मधारयः)ते च इमे द्रुमाः(कर्मधारयः)तैः। सहार्थे तृतीया

८२. व्युत्पत्तिः- प्रसेहे = प्र- √सह + लिट् लकारस्यप्रथमपुरुषस्य एकवचनम्

समासः- रूद्धार्कम्- रूद्धःअर्कः येन (बहुव्रीहिः), तम्, अधारावर्षदुर्दिनम् धारणां वर्षः(षष्ठीतुरुषः)न धारावर्षः, (सुपसुपा)

पताकिनाम् = पताका अस्याः अस्तीति,

सन्धिः- पताकिनी = पताका+ इनि

८३. व्युत्तिः- भेजे = √भज + लिट् (आत्मनेपदम्) प्रथम फुरुषः

उपरुरोध = उप-√रूध् +लिट्

समासः- अत्याखण्डलविक्रमम् आखण्डलस्य विक्रमः(षष्ठीतत्पुरुषः)

अतिक्रान्तः = आखण्डलविक्रमः येन (बहुव्रीहिः) तम्।

८४. व्युत्तिः - आनर्च -√अच् + लिट् तम्

समासः - हेमपीठाधिदेवताम् - हेममयं पीठम् (शाकपार्थिवादिवत् समासः) तस्य अधिदेवता (षष्ठी तत्पुरुषः) ताम्।

रत्नपुष्पोपहारेण - रत्नानि एव पुष्पानि (रुपककर्मधारयः) तेषाम् उपहारः(षष्ठी तुरुषः) करणे तृतीया कारकम्।

८५. व्युत्तिः - जित्वा - √जि + क्त्वाच्।

विश्वामयन् - वि-√श्रम् + णिच् + शतृ, प्रथमैकवचनम्।

न्यवर्तत = नि - √वृत् + लङ्, प्रथमपुरुषैकवचनम्।

८६. व्युत्तिः - आजह्रे= आ-√जह् + लिट् एकवचनम्

आदानम्=आ-√दा+ ल्युट्

सताम्= √अस् + शतृ षष्ठी एकवचनम्- शेषे षष्ठी।

समासः- सर्वस्वदक्षिणम् - सर्वस्वं दक्षिणा यस्मिन् (बहुव्रीहिः) तम्।

वारिमुचाम् - वारि मुञ्चति इति वारिमुच्+ क्विप् वारिमुच्, तेषाम्।

८७. व्युत्तिः - अनुमेने= अनु-√मन् + लिट् एकवचनम्

सत्रान्ते - भावे सप्तमी।

समासः -

चिरविरहोकावरोधान् - चिरं विरहुः (सुप्सुपा), तेन उकः (तृतीया तत्पुरूषः) तादृशाः अवरोधाः येषाम् (बहुव्रीहिः) तान्।

८८. व्युत्पत्तिः -

चक्रुः= √कृ + लिट् उस

समासः - रेखाध्वजकुलिशातपत्रचिह्नम्- ध्वजश्च कुलिशश्च आतपत्रश्च (द्वन्द्वः), ध्वजकुलिशात् पत्राणि रेखा एव ध्वजकुलिशातपत्राणि (कर्मधारयः) तानि चिह्नानि यस्मिन् (बहुव्रीहिः) तम्। चरणयुवाम्- चरणयोः युगम्(षष्ठी तत्पुरुषः)

प्रस्थानप्रणतिभिः - प्रस्थानकालीनाः प्रणतमः (मध्यमपदयोगी कर्मधारयः) ताभिः, मौलिस्रक्च्युतमकरन्दरेणुगौरम् - मौलिनां स्रजः (षष्ठीतत्पुरूषः) ताभ्यः च्युताः(पञ्चमीतत्पुरूषः), मकरन्दाश्च चरणवशः (द्वन्दः) मौलिस्रकच्युतः मकरन्दरेणवः(कर्मधारयः) तैः गौरम् (तृतीयातत्पुरूषः)।

विभक्तिनिर्णयः -

सम्राजः - शेषे षष्ठी

अङ्गुलीषु - अधिकारणे सप्तमी

प्रस्थान प्रणतिभिः - करणे तृतीया।

प्रकृति प्रत्ययः

चकम्पे - √कपिं (चलने), लिट्लकारस्यैकवचनम्।

भेजे - √भजं (सेवायाम्), लिट्लकारस्यैकवचनम्।

आनर्च - √अर्चं (पूजायाम्), लिट्लकारस्यैकवचनम्।

अनुमेने - अनु - √मनं (ज्ञाने), लिट्लकारस्यैकवचनम्।

चक्रुः - √डुकृञ् (करणे), लिट्लकारस्य बहुवचनम्।

१०.५ महाकवि कालिदासस्य रचनाशैली

महाकविकालिदासेन विरचितेषु ग्रन्थेषु 'रघुवंशम्' अन्यतमावहति। 'रघुवंशम्' एकं महाकाव्यम् अस्ति। अस्य कथासारः वायुपुराण-विष्णुपुराण-रामायणतः सङ्गृहीतोऽस्ति। यद्यपि कथासारः प्राचीनग्रन्थेभ्यः स्वीकरोति तथापि महाकाव्येऽस्मिन् कालिदासः स्वकीयप्रतिभां प्रदर्शयति। अस्य महाकाव्यस्य घटनावैचित्र्यकारणात् सहृदयानां मध्ये अतीव प्रसिद्ध अस्ति। प्रथमसर्गे रघोः वंशीयनृपाणां गुणाः दिलीपस्य शासनं तथा दिलीपस्य वशिष्ठाश्रमं प्रति यात्रादिविषये अतीव सुन्दरतया वर्णमस्ति। तथैव चतुर्थे सर्गे रघोः दिग्विजयवर्णनाऽवसरे प्राचीनभारतस्य प्रधानांशानां वर्णनं सुन्दररूपेण उपलभ्यन्ते। यथा -

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः।
मारीयोद्भान्तहारिता मलयाद्रेरूपत्यकाः॥

अथवा-

विनीताध्वश्रास्तस्य सिन्धुतीरविचेष्टनः।
युधुवुर्वाजिनः स्कन्धालग्नकुङ्कमकेसरान्॥

कालिदासः तदीयकाव्ये सर्वजनबोधगम्यसरलभाषाया; प्रयोगं करोति अतः सः श्रेष्ठः। कालिदासस्य एतां रीतिं पश्चात् आलङ्कारिणः 'वैदर्भी रीतिः' इत्यभिधीयन्ते। तस्य काव्ये शब्दचातुर्यस्य प्रादूर्भावः नोपलभ्यते। सः उपमा, अर्थान्तरन्यासादि अलङ्कारान् उत्तमरूपेण प्रयोगं करोति।

कालिदासस्य प्रकृतिचित्रणमपि अतुलनीयमस्ति प्रकृतेः मानवीकरणमर्थात् प्रकृतेः घटनया सह मानवजीवनस्य घटनाः अपि सुन्दरेण प्रकाश्यते। तस्योदाहरणम् अस्यमहाकाव्यस्यप्रत्येकस्मिन् सर्गेऽपि उपलभ्यते। चतुर्थसर्गे शरत्कालस्य तथा रघोःच गुणावलीः सुन्दररूपेण सरसधर्मरूपेण च प्रकाशं करोति। न केवलं कवित्वशक्तिः अपि तु व्याकरणशास्त्रम्, अलङ्कारशास्त्रम्, छन्दशास्त्रम्, दण्डनीतिः, राजनीतिश्च कालिदासेन तदीय काव्ये यथायथं प्रयोगः क्रियते। तस्य साहित्यव्यञ्जनायाः अपि प्रयोगः क्रियते। तदीय साहित्ये वाच्यार्थस्य नूनं महत्वं ध्वन्यार्थस्य प्राचुर्यता अस्ति। तदीयसाहित्ये पदविन्यासम्, भाववैचित्र्यम्, प्रसादगुणप्राचुर्यं दृष्ट्वा कवयः वदन्ति यत्-

निर्गतासु न वा कस्य कालिदासस्य मुक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीस्विव जायते॥

अर्थात् आम्रफलस्य मुकुलसदृशः रसपूर्णः तथा मधुरां वाणीं श्रुत्वा कस्य वा मनसि आनन्दः न जायते ?

१०.६ उपमा कालिदासस्य

महाकविकालिदासस्य विषये पूर्वं पठितम्। अधुना उपमा कालिदासस्य विषये पठामः।

संस्कृतसाहित्ये कालिदासस्य उपमाप्रयोगसम्बन्धे महती ख्यातिर्जायते। अतः उपमा कालिदासस्य इति पङ्क्तिः प्रसिद्धा वर्त्तते। यतो हि कालिदासः उपमाप्रयोगे सिद्धहस्तः आसीत्।

कालिदासः उपमालङ्कारं भावप्रकाशार्थरूपेण प्रयोगं करोति। तत् उपमानोपमेययोः सादृश्यं सम्यग्रूपेण विधाय अनुपमतयाउपमालङ्कारस्य प्रयोगं सः करोति स्म। तस्योदाहरणं रघुवंशम् इति महाकाव्यस्य इन्दुमतीस्वयम्बरस्य वर्णनाप्रसंगे इन्दुमतीं सञ्चारिणी दीपशिखेव तथा राज्ञः अट्टः इव तुलनां करोति। यथा-

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीताय पतिम्बरा सा।
नरेन्द्रमार्गट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥ (६/६७)

अर्थात् पतिम्बरा सा इन्दुमती रात्री सञ्चारिणी दीपशिखेव यं यं व्यतीताय अतिक्रम्य गच्छति, स स भूमिपालः नरेन्द्रमार्गट्ट इव विवर्णभावं प्रपेदे।

अतः संस्कृतसाहित्ये कालिदासः 'दीपशिखा कालिदासः' इति प्रसिद्धिर्जायते।

भावमूर्तिं वस्तुरूपेण प्रकाशस्य कल्पना कालिदासस्य ग्रन्थे प्रकाश्यमाना उपमायाः उज्ज्वलतमं निदर्शनमस्ति। रघुवंशस्य द्वितीयसर्गे (२/६९), सप्तमसर्गे (७/६३), इत्यादिश्लोकेषु तस्य उदाहरणानि दरिदृश्यते। चतुर्थे सर्गे अपि रघोः विजयीयोद्धारः नारिकेलवने आम्रफलरसं पानं कुर्वन्ति यथा शत्रूणां यशमेव पिबन्ति। (४/४२)

कालिदासः तदीयकाव्ये शुद्धोपमायाः प्रयोगं करोति। न केवलम् उपमाप्रयोगे, अन्यान् अलङ्कारान् अपि तेन सुन्दरेण प्रयोगः क्रियते। उपमानापेक्षया उपमेयस्याधिक्य-न्यूनता वा भवति चेत् व्यतिरेक- अलङ्कारो भवति। कालिदासेन तदीय रघुवंशमहाकाव्ये व्यतिरेकालङ्कारस्य प्रयोगः एवं क्रियते-

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे॥ (४/४९)

अनेन पद्येन सूर्यस्य तेजः ह्रासमानः दक्षिणदिशि रघोः प्रतापं न सह्यते। अतः उपमानः सूर्यस्य तेजात् उपमेयः रघोः तेजाधिकं प्रदर्शनेन व्यतिरेकालङ्कारो सिद्धयति। तथैव अन्यस्मिन् श्लोके हेतुरभावात् कार्योत्तिः जायते, तत्र विभावनालङ्कारस्य प्रयोगः दृश्यते। तस्योदाहरणं यथा-

सरलासक्तमातङ्गैवथस्फुरितत्विषः।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः॥ (४/७५)

इत्थम् अन्येऽपि पद्ये उपमा तथा उपमागर्भालङ्काराः अनेकाः सन्ति। अतः कोऽपि अज्ञातपण्डितः वदति-

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥

१०.१० चतुर्थसर्गस्य केचाञ्चन श्लोकानां व्याख्या

१. **स विश्वजितमासह्ये यज्ञं सर्वस्वदक्षिणाम्।**
आदानं हि विसर्गाय सतां वारिमुचामिव।।
= पद्यमिदं महाकवि कालिदासविरचितम् 'रघुवंशम्' इति महाकाव्यस्यान्तर्गतः चतुर्थसर्गादुद्धृतिर्जायते।
महाकविकालिदासः रघोः दिग्विजयस्य वर्णनवेलायां रघुणा आयोजितस्य विश्वजितयज्ञस्य वर्णनं पद्येऽस्मिन् करोति।

अन्वयः - सः सर्वस्वदक्षिणः विश्वजित् यज्ञः आजहत्ते आदानेन भूयते।

व्याख्या - सः रघुः सर्वदिशः विजयं प्राप्य स्वदेशं प्रति प्रत्यागच्छत्। ततः पश्चात् विश्वजितनामकयज्ञः कर्तुं तेन वाञ्छितः। कः यज्ञः ? विश्वजितनामकयज्ञः। विश्वजितयज्ञः एकस्य समुदायस्य मानवसमुदायस्य वा स्वविशालश्रद्धाशक्तिप्रदर्शनाय च राज्ञा क्रियते। अनेन यज्ञेन सम्पूर्णे विश्वे स्वाधिपत्यं कामयते। तथैव यज्ञकर्ता सर्वस्वं यज्ञेऽस्मिन् दानं करोति। यतो हि काकुत्स्थः रघुः सर्वस्वदक्षिणाम् आजह्रे विश्वजिनामकयज्ञे। यथा मेघः समुद्रात् जलमादाय वृष्ट्या सम्पूर्णं जगत् प्रसन्नं करोति, विश्वहितं करोति तथैव सज्जनाः अपि विश्वहिताय विश्वजितयज्ञं सम्पादयति। यतो हि यज्ञस्य प्रकारत्रयं वर्त्तते- देवपूजा, सङ्गतिकरणम्, दानञ्चेति।

पद्येऽस्मिन् उपमालङ्कारो विद्यते। साहित्यदर्पणकारः विश्वनाथः उपमालङ्कारस्य संज्ञा एवं विधीयते-
साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।
व्याकरणम् - आजह्रे - आ -√जह् + लिट् एकवचनम्
आदानम् - आ-√दा + ल्युट्
समासः - वारिमुचाम् - वारि मुञ्चति इति वारिमुच् + क्विप्, वारिमुचः, ताम्

२. **पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः।**
नवे तस्मिन् महीपाले सर्वं नवभिवाभवत्।।
= पद्यमिदं महाकविकालिदासविरचितं 'रघुवंशम्' इति महाकाव्यस्य चतुर्थात् सर्गादुद्धृति जायते।
महाधिपतिदिलीपस्य पश्चात् रघुः सिंहासने आरोहणं करोति। तस्य नृपत्वेन राज्ये समृद्धिः जायते। नवीननृपस्यागमने समग्रजगति नूतनत्वम् आगतम्। अनेन श्लोकेन तदेव वर्णनं करोति।

अन्वयः - पञ्चानामपि भूतानां गुणाः उत्कर्षं पुपुषुः, तस्मिन् नवे महीपाले सति सर्वं नवम् इव अभवत्।

व्याख्या - यदैव रघुः राजा अभवत् तदैव पञ्च-महाभूतामपि उत्कर्षसाधनम् अजायत्। क्षिति-अप-तेज्-व्युम-मरूत्-एते जगन्निर्माणस्य उपादानानि सन्ति। एतेषां पञ्चमहाभूतानां गुणाः गन्ध-रस-रूप-स्पर्श-शब्दाख्या उत्कर्षमासुः। नवीने राज्ञि सर्वमपि वस्तु नवीनम् इवाभवत्। अर्थात् जगति सर्वाणि वस्तुनि रघोः शासनकाले उत्कर्षमलभत्। इह संसारस्य चेतनाचेतनादि सर्वेऽपि रघोः अभ्युदये अपरूपसौन्दर्यं धृत्वा प्रजानां मनसि हर्षमजनयत्।

पद्येऽस्मिन् उपमालङ्कारस्य प्रयोगः दृश्यते। तस्य लक्षणं यथा -

'साम्यं वाच्यमेवधम्यं वाक्यैस्य उपमा द्वयोः'

व्याकरणम्:

उत्कर्षम्= उत् -$\sqrt{}$कृष् + अच्

महापालः= मही -$\sqrt{}$पा +णिच् + अन्, महीं पालयति इति महीपालः, (उपपदसमासः)।

३. **स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः।**
षड्विधं बलमादाय प्रसस्थे दिग्जिगीषया।।

= पद्यमिदं कविराजकालिदासेन विरचितं 'रघुवंशम्' इति महाकाव्यस्य चतुर्थसर्गादुद्धृतिर्जायते।

रघुः कथं दिग्विजयस्य कृते अग्रसरो भवति तदेव श्लोकोऽस्मिन् वर्णनं प्राप्यते।

अन्वयः - गुप्तमूलप्रत्यन्तः युद्धपार्ष्णिः अयान्वितः सः रघुः षड्विधं बलम् आदाय दिग्जिगीषया प्रतस्थे।

व्याख्या - रघुः दिग्विजयार्थं प्रतस्थे। ततः पूर्वं स्वराज्यसुरक्षितार्थं व्यवस्था कल्पिता। स्वराष्ट्रप्रबन्धं सम्पाद्य पृष्टशत्रून् च व्यापाद्य शुभावहविधियुक्तः रघुः दिग्विजयार्थं प्रस्थितः। सः दिग्विजयार्थं षड् विधं सैन्यबलं नयति स्म। ते यथा - मौल-भृत्य-सुहृद-श्रेणी-द्विषद-आटरीकाश्चेति। एतान् सर्वान् सैन्यान् स्वीकृत्य रघुः दिग्विजयाय यात्रां प्रारथत्।

व्याकरणम् = गुप्तमूलप्रत्यन्तः - मूलञ्च प्रत्यञ्च(द्वन्द्वः) मूलप्रत्यन्तौ। गुप्तौ मूलप्रत्यन्तौ येन सः (बहुव्रीहिः)

शुद्धपार्ष्णिः = शुद्धः पार्ष्णिः यस्य सः (बहुव्रीहिः)

दिग्जीगीषया = दिशां जिगीषा (षष्ठी तुरषः) तया, (हेतौ तृतीया)।

१०.८ चतुर्थसर्गस्य महत्वपूर्णवाक्यानां भावार्थः

१. आददे नाभिशीतष्णो नभम्वानिव दक्षिणः।

दक्षिणदिशेः वायुः समशीतोष्णः। अर्थात् न अत्युष्णवायुः , न वा शीतयुक्तः। एषः वायुः सर्वेषां प्राणां तृप्तिप्रदायकः भवति। तथैव दक्षिणदिशातः प्रवहमानः वायुः सादृश्यमेव रघौ गुणद्वयं

वर्तते। राजारूपेण रघुः नीति कठिनः, न वा अति कोमलः आसीत्। अपराधानुसारेण सः रघुः दण्डेन दण्डयित्वा प्रजावर्गस्य मनः जयति स्म। गुरु अपराधे गुरुदण्डः लघ्वपराधे लघुदण्डः इत्येवं तस्य शासनकाले प्रचलति स्म।

२. राजा प्रकृति रञ्जना -

यथा लोकानाम् आह्लादकारकत्वात् चन्द्रः चन्द्रपदवाच्यः। यथा चन्दयति आह्लादयति इति चन्द्रः। तथैव सन्तापजननात् तपनः तपनशब्दवाच्यः। तपतीति तपनः सूर्यः वा। तथैव स राजा प्रकृतिरञ्जनात् सार्थकराजा अभूत्। सः रघुः प्रजायाः स्वस्मिन् अनुरागजननात् राजेतिशब्दवाच्योऽनुगतार्थम् एवाभूत्। महाभारतस्य शान्तिपर्वणि उल्लेखोऽस्ति-रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते। रघोः अपि सर्वगुणाः विराजन्ते, अतः राजेति शब्दप्रयोगाय यर्थार्थतास्ति।

३. इन्द्रियाख्यानिवरिपुंसतत्वज्ञानेन संयमी।

इन्द्रियानि मानवशरीरे स्थित्वा मानवानां मनांसि अशुद्धमार्गेण परिचालिताः भवन्ति। अतः इन्द्रियानि मानवानां परमरिपवः। इन्द्रियानां वशीकरणाय एक एव उपायः, तत्वज्ञानम् अथवा आत्माज्ञानम्।

एतदेव तत्वज्ञानं मानवाय आसक्तेः मुक्तिं प्रददाति। मौक्षप्राप्तिरपि इन्द्रियरूपाणि शत्रून् वशीकृत्य तत्वज्ञाने उचितमार्गस्य अनुसरणं कुर्वन्ति। तथैव राजा रघुरपि संयमी योगी तत्वज्ञानेन इन्द्रियनामकरिपुन् जेतुं स्थलवर्त्मना प्रतस्थे। अयमेवार्थः।

४. प्रणिपात प्रतीकारः संरम्भो हि महात्मनाम्।

महात्मनः इन्द्रियान् नियन्त्रणं कुर्वन्ति। अतः कोपादि तेषां चिरस्थायी न भवति। महात्मनां शत्रून् प्रति कोपादि अपि अधिककालप्रयन्तं न तिष्ठिन्ति। यदि अपनीतं शिरस्त्राणां शत्रवः रघोः समीपम् आगच्छन्ति ते मुक्ताः भवन्ति। ये मृतेभ्यः अवशिष्टाः आसन् ते स्वशिरस्त्राणामुत्तार्य रघोः शरणं आगताः, ते मुक्ताः। यतो हि महात्मनां क्रोधः प्रणिपातावधिः भवति। पारस्यदेशीयाः रघोः शरणागताः सन्, रघोः क्रोधः अपसारितः। एतदेव महात्मनां लक्षणम्।

५. आदानं हि विसर्गाय सतां वारिमुचामिव।

ग्रीष्मकाले पृथिव्याः मेघाः जलशोषणं कुर्वन्ति। तस्मात् मेघस्य सृष्टिः जायते। वर्षाकाले तदेव मेघाः अविच्छिन्नजलवर्षणेन पुनः पृथिव्यां जलम् अर्पयन्ति। पृथिवी सस्यश्यामला भवति। तथैव सुरुषाणां स्वभावोऽपि मेघवदेव। अन्यस्मात् ग्रहणं कृत्वा जनकल्याणाय सर्वेषां कृते ते अर्पयन्ति। राजा रघुरपि दिग्विजयकाले अनेकान् देशान् विजयं प्राप्य विश्वजित् यज्ञं सम्पादयति।

विश्वजित् यज्ञं सम्पाद्य सर्वस्वं दक्षिणारूपेण सर्वान् प्रत्यार्पितवान्। यथा मेघाः समुद्रात् जलम् आदाय तद् वर्षेण विश्वहितं कुर्वन्ति तथैव सज्जनानामपि द्रव्यसञ्चयः परहिताय एव भवति।



ज्ञातव्यम्

दण्डनीतिः - दण्डप्रणयनसम्पर्कीयं नीतिशास्त्रम्।

वैदर्भी रीतिः - काव्यरचनायाः एका रीतिः। अस्याः संज्ञा कविराजविश्वनाथेन एवम् उक्तम्-

माधुर्यव्यञ्जनैः रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिका वैदर्भी रीतिरिष्यते॥

बाणभट्टः - एकः प्रसिद्धः गद्यकारः।

- उपमा - एकः अलङ्कारः। विश्वनाथकविराजः तदीयसाहित्येदर्पणे तस्य संज्ञा एवम् उल्लेखं करोति-

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः'।

उपमागर्भः - यत्र सादृश्यं वर्त्तते।

प्रकृतिरञ्जनम् - प्रकृतिः अर्थात् प्रजा। रञ्जयति इति राजा। प्रजाः रञ्जयति इति नृपाः राजेति अभिहितो भवति।



अग्रगत्याः निरूपणम्

प्रश्नः १: 'लोहित्य' इत्युक्ते किमस्ति?

.....

प्रश्नः २: रघुः कं यज्ञं सम्पादितवान्?

.....

प्रश्नः ३: काकुत्स्थः कः?

.....

प्रश्नः ४: कामरूपस्य राजारघुं किम् उपायनम् अयाचत्?

.....

प्रश्नः ५: रघुः उत्तरदिशं विजित्य कुत्र प्रवेशमकरोत्?

.....

प्रश्नः ६: तस्य स्थानस्य अपरं किमभिधानेन कालिदासः उल्लेखं करोति?

.....

प्रश्नः ७: कालिदासः कां रीतिम् अनुसरति?

.....

प्रश्नः ८: का उपमा?

.....

प्रश्नः ९: उपमाविहायकालिदासेन प्रयुक्तः एकस्यालङ्कारस्य नाम लिखत ?

.....

प्रश्नः १०: कालिदासः किम् अपरनाम्ना प्रसिद्धिर्जायते ?

.....

प्रश्नः ११: भगीरथः कः ?

.....

प्रश्नः १२: कः पर्वताम् पक्षच्छेदम् अकरोत् ?

.....

प्रश्नः १३: मेघस्य वृत्तं केन अनुसरणं क्रियते ?

.....



१०.९ अध्यायात् किमवगतम्

१. 'रघुवंशम्' महाकाव्यं महाकविकालिदासस्य प्रसिद्धः ग्रन्थः।
२. अध्यायोऽयं पठित्वा कालिदासस्य रचनाशैलीम् अजानन्।
३. महाकविकालिदासस्य 'उपमा कालिदास्य' इति विषयम् अधीतवन्तः।
४. रघोः दिग्विजयविषये ज्ञानम्।
५. श्लोकानाम् अन्वयः, शब्दार्थाः च विषये ज्ञानम्।
६. केषाञ्चन श्लोकानां संस्कृतव्याख्या तथा महत्वपूर्णवाक्यानां भावार्थाः च अजानन्।
७. अध्यायेऽस्मिन् कालिदासस्य काव्यगतसमालोचनां अपठन्।



१०.१० ज्ञानाधिकम्

१) काले, एम्.आर.(सम्पादनम्) रघुवंशम् अक् कालिदासः(१-५),दिल्ली,मतिलाल वनारसीदास पब्लिक प्राईवेट लिमिटेड।
२) गोस्वामी, डॉ. मालिनी (२००९) रघुरपि काव्यम्, गुवाहाटी चन्द्रप्रकाशः।
३) भद्र, सुधेन्दु, मोहनः, रघुवंशम्, गुवाहाटी चन्द्रप्रकाशः।
४) संस्कृत-साहित्य-सम्भारः (१९८१) नव-पत्र-प्रकाशनम्।



१०.११ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : ब्रह्मपुत्रनदी।

प्रश्नः २ : उत्तरम् : विश्वजित् यज्ञः।

प्रश्नः ३ : उत्तरम् : रघुः।

प्रश्नः ४ : उत्तरम् : गजः।

प्रश्नः ५ : उत्तरम् : प्राग्ज्योतिषपुरः।

प्रश्नः ६ : उत्तरम् : कामरूपः।

प्रश्नः ७ : उत्तरम् : वैदर्भी रीतिः।

प्रश्नः ८ : उत्तरम् : एकः अलङ्कारः।

प्रश्नः ९ : उत्तरम् : अर्थान्तरन्यासः।

प्रश्नः १० : उत्तरम् : दीपशिखा कालिदासः।

प्रश्नः ११ : उत्तरम् : सूर्यवंशीय राजा।

प्रश्नः १२ : उत्तरम् : इन्द्रः।

प्रश्नः १३ : उत्तरम् : रघुः।



१०.१२ अभ्यासप्रश्नाः

प्रश्नः १: संक्षेपेणलिखत -

वैदर्भी रीतिः, कालिदासः, उपमालङ्कारः।

प्रश्नः २: रघोः कामरूपविजयवर्णानां लिखत।

प्रश्नः ३: कालिदासस्य रचनाशैलीविषयकम् एकं प्रबन्धं लिखत।

प्रश्नः ४: 'उपमा कालिदासस्य' अस्य वाक्यस्य तात्पर्यं व्याख्ययताम्।

*** ***** ***

अध्यायः ११ : किरातार्जुनीयम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

११.१ उद्देश्यम्

११.२ परिचयः

११.३ महाकाव्यस्य लक्षणम्

११.४ किरातार्जुनीयम् महाकाव्यस्य परिचयः

११.४ शीर्षकस्य तात्पर्यम्

११.५ किरातार्जुनीयम् महाकाव्यस्य सर्गाणां सारांशः

११.५.१ किरातार्जुनीयम् महाकाव्यस्य सर्गाणां सारांशः (असमीया)

११.६ महाकविभारवेः परिचयः

११.७ महाकविभारवेः कालः

११.८ अध्यायात् किमवगतम्

११.९ ज्ञानाधिक्यम्

११.१० अग्रगत्याः निरूपणम्

११.११ अभ्यासप्रश्नाः

११.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- किरातार्जुनीयम् महाकाव्यस्य विषये ज्ञातुं शक्ष्यामः।
- महाकविभारवेः विषये ज्ञातुं शक्ष्यामः।
- किरातार्जुनीयम् महाकाव्यस्य प्रत्येकानां सर्गाणां विषये सम्यक् ज्ञानं प्राप्स्यामः।

११.२ परिचयः

अधुनापर्यन्तं भवद्भिः रघुवंशमहाकाव्यं पठितम्। अधुना वयं भारविविरचितं किरातार्जुनीयम् इतिमहाकाव्यं पठामः। अनेन किरातार्जुनीयम् महाकाव्यस्य शीर्षकस्यतात्पर्यं मूलविषयादि ज्ञानं भवति।

११.३ महाकाव्यम् लक्षणम्

विश्वनाथकविराजेन तदीय 'साहित्य-दर्पणः'नामके ग्रन्थे महाकाव्यस्य लक्षणानि उल्लिखितानि सन्ति। ते यथा -

सर्गबन्धो महाकाव्यं तत्रैक नायकः सुरः।

सद्वंशः क्षत्रियो वापिधीरोदात्तगुणान्वितः।।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।।
शृङ्गारवीरशान्तनामकोऽङ्गी रस इष्यते।।
अङ्गानि सर्वेपि रसाः सर्वेनाटकसन्धयः।।
इतिहासोद्भवं वृत्तमन्यद् वासज्जनाश्रयम्।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं चफलं भवेद्।।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव च।।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्।।
एकवृत्तमयैः पद्यैरवसानेन्यवृत्तकैः।।
नास्ति स्वल्पा नास्ति दीर्घाः सर्गा अष्टाधिका इह।।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।।
प्रातर्मध्याह्नमृगयारात्रिवनसागराः।।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।।
रणप्रयाणो यज्ञमन्त्रपुत्रोदयादयः।।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।।
कवेर्वृत्तस्य वा नाम्ना नायकस्यान्यतरस्य वा।।
नामास्य सर्गोपादेयकथया सर्गनाम तु।।

अर्थात् - महाकाव्यस्य कथा सर्गेषु विभक्ता भवति, नायकः अनेके देवाः अथवा धीरोदात्तगुणसम्पन्नाः, अनेके उच्चकुलोत्पन्नाः क्षत्रियाः च भवन्ति। एकस्मिन् वंशेसमुद्भूताः अनेके नायकाः भवितुम् अर्हन्ति। महाकाव्ये श्रृंगारः, वीरः, शान्तः, इत्येतेषु त्रिषु कश्चन एकः अङ्गीरसः प्रधानरसश्च भवितुम् अर्हन्ति। अन्ये चरसाः मुख्यरसस्यसहायकाः रसाः भवेयुः।

११.४ 'किरातार्जुनीयम्' महाकाव्यस्य परिचयः

किरातार्जुनीयं महाकविभारविणा विरचितम् एकमात्रं महाकाव्यम् वर्तते। महाकाव्यमिदं महाभारतकथामाश्रित्य विरचितमस्ति। महाकाव्यमिदं महाभारतस्य वनपर्वणः अन्तर्गते महाकाव्येऽस्मिन् अष्टादशसर्गाः सन्ति। वीररसप्रधानम् अर्थगाम्भीर्ययुक्तं बृहत्त्रय्यां प्रथमपरिगणितं किरातार्जुनीयम् अतीव प्रसिद्धमस्ति। अस्य ग्रन्थस्य शुभारम्भः 'श्री' शब्देन जायते, तथा 'लक्ष्मी' शब्देन सर्गान्तः समाप्तिः वा भवति। अस्य ग्रन्थस्य नायकः अर्जुनः नायिका च द्रौपदी अस्ति। वनवासवेलायां पाण्डवाः कानिचन दिनानिद्वैतवने निवसन्तिस्म। तस्मिन् समये ऋषिः वेदव्यासः तत्र समागच्छत्। सः अर्जुनं भगवतः शिवात् अस्त्रलाभाय इन्द्रकीलपर्वतं गत्वा तपस्यार्थं निर्देशयत्।

व्यासदेवस्य निर्देशानुसारम् अर्जुनोऽपि इन्द्रकीलपर्वतं गत्वा कठोरतपस्यां कर्तुं प्रारभत्। तस्य तपस्यां दृष्ट्वा सर्वे देवाः शिवस्य शरणापन्नाः जाताः। देवानां प्रार्थनां श्रुत्वा भगवान् शिवः किरातस्य वेशं धृत्वा अर्जुनस्य समीपम् अगच्छत्। तत्र वराहहनन्विषयमाधृत्य द्वयोः मध्येयुद्धं जातम्। युद्धे अर्जुनस्य वीरत्वं ज्ञात्वा शिवः प्रसन्नः जातः। किरातरूपिशिवः अर्जुनाय 'पाशुपात' अस्त्रं प्राददत्। एष एव 'किरातार्जुनीयम्' महाकाव्यस्य मूलविषयोऽस्ति।

११.५ शीर्षकस्य तात्पर्यम्

अस्य ग्रन्थस्य शीर्षकमतीव महत्वपूर्णमावहति। अतः महाकविः भारविः अपि 'किरातार्जुनीयम्' इति नामकरणं विशेषरूपेण कृतम्। महाकाव्येऽस्मिन् अर्जुनस्य किरातवेशधारिणा शिवेन सहयुद्धं वर्णितमस्ति। अत एव ग्रन्थस्य नामकरणं 'किरातार्जुनीयम्' इति कृतम्। अर्थात् किरातश्च अर्जुनश्चकिरातार्जुनौ (द्वन्दः), किरातार्जुनौ अधिकृत्य कृतं काव्यं 'किरातार्जुनीयम्'। किरातार्जुन् +छ ('ईय' आदेशः) अर्जुनाय दिव्यास्त्राणां प्राप्तिरेव महाकाव्यस्य मुख्यफलमस्ति। अत्र अर्जुनं धीरोदात्तनायकरूपेण तथा किरातवेशभूषायुक्तं शिवं प्रतिनायकरूपेण चित्रितं करोति। ग्रन्थेऽस्मिन् शिवेन सह अर्जुनस्य युद्धं वर्णितमस्ति तथा अर्जुनस्य वीरत्वं दृष्ट्वा शिवः प्रसन्नो भवति, पाशुपातनामकम् अस्त्रम् अर्जुनाय ददाति। यतोहि ग्रन्थस्य मूलकथासारेण सह गभीरः सम्बन्धः अस्ति, अतः अस्य शीर्षकं यथार्थोऽस्ति।

११.६ 'किरातार्जुनीयम्' महाकाव्यस्य सर्गाणां सारांशः

'किरातार्जुनीयम्' महाकाव्ये अष्टादशसर्गाः सन्ति। तेषां सरलसारांशः अध आलोच्यते –

- प्रथमः सर्गः – युधिष्ठिरः दुर्योधनस्य शासनव्यवस्थाविषये ज्ञातुं वनेचरं दूतरूपेण हस्तिनापुरं प्रेषितवान्। सः वनेचरः द्वैतवनं प्रत्यागत्य दुर्योधनस्य राज्यशासनविषये सम्पूर्णं तथ्यम् उवाच। सर्वेषां वार्तालापं श्रुत्वाद्रौपदीक्रोधिता भवति स्म। द्रौपदी युधिष्ठिरं युद्धाय प्रस्तोतुं निरादेशत्। सा अग्निगर्भवाच्या प्रोत्साहयति।
- द्वितीयः सर्गः – द्वितीयः पाण्डवः भीमः सर्गेऽस्मिन् द्रौपदीं समर्थनं करोति। परन्तु युधिष्ठिरः सर्वे धैर्ययुक्ताः सहनशीलाः च भवन्तु इति परामर्शं करोति। तस्मिन्काले ऋषिः व्यासदेवः तत्र समागच्छति।
- तृतीयः सर्गः – व्यासदेवः अर्जुनाय महाविद्यां यच्छति। सः अर्जुनम् इन्द्रकीलपर्वतं गमनाय आदेशति। तथा भगवन्तं शिवं तपसा आराधयितुं परामर्शं ददाति।
- चतुर्थः सर्गः – अर्जुनः इन्द्रकीलपर्वतं गच्छति। तपस्यार्थम् इन्द्रकीलपर्वतगमनवेलायां यात्रापथि शरत्कालस्य शोभाम् अर्जुनः अपश्यत्। तस्मिन्काले हिमालयस्य शोभाम् अपि तेन दृष्टः।

- पञ्चमः सर्गः - अर्जुनस्य इन्द्रकीलपर्वतगमनयात्रा अस्य सर्गस्य मूलविषयोऽस्ति। तत्रसः यक्षस्य उपदेशं प्राप्तवान्। हिमालयस्य शोभां दृष्ट्वा अपि प्रसन्नो जातः।
- षष्ठः सर्गः - अर्जुनः इन्द्रकीलपर्वते तपस्या प्रारभत्। तस्य कठोरतपस्यां दृष्ट्वा गुह्याः भीताः जाताः। ते अर्जुनस्य तपस्या नाशाय इन्द्रम् अनुरोधं कृतवन्तः। तेषाम् अनुरोधानुसारम् इन्द्रः अप्सरसः अर्जुनस्य समीपं गत्वा तस्य तपस्यां नाशाय प्रेषितवान्।
- सप्तमः सर्गः - इन्द्रादेशं रक्षार्थम् अप्सरसः इन्द्रकीलपर्वतं प्रति यात्रा प्रारब्धाः। अप्सरसां रक्षणाय इन्द्रः अनेकान् गजान् अश्वान् भृत्यान् च प्रेषितवान्। इन्द्रस्य राज्यात् इन्द्रकीलपर्वतपर्यन्तम् अप्सरसां गमन मनोरमवर्णनं सर्गेऽस्मिन् उपलभ्यते।
- अष्टमः सर्गः - इन्द्रकीलपर्वते अप्सरसः वनविहारजलकेलिक्रीडायाः मनोरमवर्णनं सर्गेऽस्मिन् समुपलभ्यते।
- नवमः सर्गः - सूर्यास्तस्य सुन्दरवर्णनेन सर्गस्य प्रारम्भो जायते। सर्गेऽस्मिन् चक्रवाकविहगानां विरहविधुरावस्थायाः वर्णनेन मनोमुग्धं करोति। गभीररात्रिकाले अप्सरसः मदिरापानं कुर्वन्ति तथा कामक्रीडायां मत्ताः भवन्ति। वैतालिकानां स्तुतिगीतैः प्रभातवर्णनेन च अस्य सर्गस्य समाप्तिः जायते।
- दशमः सर्गः - अप्सरसः अर्जुनस्य तपस्या नाशाय नैकाः उपायाः स्वीकृताः, परन्तु ताषां चेष्टा विफला जाताः। अतः ताः इन्द्रकीलपर्वतात् प्रस्थानम् अकुर्वन्।
- एकादशः सर्गः - ततः पश्चात् इन्द्रः एकस्य मुनेः वेशं धृत्वा अर्जुनसमीपं गच्छति। अर्जुनम् आशीर्वादान् प्रादत्त। सः अर्जुनं भगवतशिवाय तपस्यार्थम् उपादिशत्।
- द्वादशः सर्गः - अर्जुनस्य कठोरतपस्यां दृष्ट्वा मुनयः भीताः अभवन्। ते शिवस्य आराधनां कर्तुं प्रारभत्। तथा शिवः तान् आश्वासनं दत्वा अवदत् यत् सः किरातवेशं धृत्वा अर्जुनेन सहयुद्धं करिष्यति।
- त्रयोदशः सर्गः - शिवः किरातवेशं धृत्वा अर्जुनस्य समीपं गच्छति। तत्र अर्जुनस्य दिशि धावमानम् एकं वराहम् अर्जुनः शिवः उभौ समानसमये शरं निक्षेपं कुरुतः। वराहस्य मृत्युः अभवत्। अर्जुनः तस्य शरं वराहात् आनयति। तस्मिन् काले शिवोऽपि आगत्य अर्जुनं सः तं वराहं हतवान् इति अवदत्। द्वयोः मध्ये वाक्युद्धं जातम्।
- चतुर्दशः सर्गः - किरातरूपिशिवेन सह अनेकाः किराताः तत्र समागच्छन्। अर्जुनेन सह तेषां युद्धः अभवत्। युद्धे किराताः पराजिताः अभवन्।
- पञ्चदशः सर्गः - अर्जुनस्य वीरत्वं दृष्ट्वा सर्वे किराताः पलायमानाः सन् कार्तिकेयः तान् पुनः युद्धं प्रति आनयत्। अनन्तरं शिवेन सह अर्जुनस्य युद्धं प्रारब्धम्।
- षोडशः सर्गः - किरातरूपिशिवेन सह अर्जुनस्य युद्धः जातः। द्वावपि दिव्यास्त्रं प्रयोगं कुरुतः। अन्ते अर्जुनस्य पराजयं अभवत्।
- सप्तदशः सर्गः - अस्त्रैः पराजयं प्राप्य अर्जुनः शिलाखण्डेन, वृक्षस्य शाखाभिः युद्धं प्रारब्धम् अकरोत्। तत्रापि सः अर्जुनः व्यर्थः अभवत्।

- अष्टादश: सर्ग: - अनन्तरम् उभावपि मल्लयुद्धस्य प्रारब्धं कुरुत:। युद्धसमये किरातस्य उपरि एकवारं कुर्दति, परन्तु अर्जुन: तस्य पादौ गृह्णाति। तदा किरात: तस्य मूलरूपं दर्शयति। अर्जुनस्य वीरत्वं दृष्ट्वा शिव: अतीव प्रसन्नो भवति स्म। शिव: तस्मै दिव्यं 'पाशुपात' अस्त्रं ददाति। अन्ये देवा: अपि अर्जुनाय भिन्नानि अस्त्राणि ददति। अस्त्रलाभानन्तरम् अर्जुन: युधिष्ठिरसमीपं प्रत्यावर्तति। एवं 'किरातार्जुनीयम्' महाकाव्यस्य समाप्ति: भवति।

११.६.१ किरातार्जुनीयम् महाकाव्यस्य सर्गाणां सारांश: (असमीया)

"কিৰাতাৰ্জুনীয়ম্"-ত সৰ্বমুঠ টা সৰ্গ আছে। এতিয়া আপুনি প্ৰতিটো সৰ্গৰ বিষয়বস্তুৰ সাৰাংশ পঢ়িবলৈ পাব। সৰ্গসমূহৰ সাৰাংশ তলত উল্লেখ কৰা হ'ল

ম সর্গঃ-প্রথম সর্গৰ সাৰাংশ এনে ধৰণৰ - যুধিষ্ঠিৰে দুর্যোধনৰ ৰাজ্য শাসন প্রণালীৰ বিষয়ে জানিবলৈ এজন বনেচৰক দূত ৰূপে হস্তিনাপুৰলৈ পঠাইছিল। দূতৰূপে নিয়োজিত বনেচৰে দ্বৈত বনলৈ উভতি আহি দুর্যোধনৰ ৰাজ্যশাসন সম্পৰ্কীয় সকলো কথা যুধিষ্ঠিৰক জনালেহি। সকলোবোৰ কথা শুনিও যুধিষ্ঠিৰক নিৰুৎসাহ দেখি দ্রৌপদী ক্রোধিত হৈ পৰে। যুধিষ্ঠিৰক যুদ্ধৰ বাবে প্রস্তুত হ'বলৈ পৰামর্শ দি দৌপদীয়ে অগ্নিগর্ভ বাণীৰে তেওঁক উৎসাহিত কৰিবলৈ চেষ্টা কৰে।

য় সর্গঃ-দ্বিতীয় পাণ্ডৱ ভীমে পত্নী দৌপদীৰ কথা সমর্থন কৰে। কিন্তু যুধিষ্ঠিৰে সকলোকে ধৈর্য্য আৰু সহনশীল হ'বলৈ নির্দেশ দিয়ে। এনে সময়তে ঋষি ব্যাসদেৱ সেই স্থানত উপস্থিত হয়।

য় সর্গঃ- ব্যাসদেৱে অর্জুনক মহাবিদ্যা দান কৰে। লগতে শক্তি আৰু অস্ত্র লাভৰ বাবে তেওঁ অর্জুনক ইন্দ্রকীল পর্বতলৈ গৈ শিৱৰ তপস্যা কৰিবলৈ নির্দেশ দিয়ে।

র্থ সর্গঃ- অর্জুনে ইন্দ্রকীল পর্বতলৈ তপস্যা কৰিবৰ বাবে যাত্রা কৰে। যাত্রাপথত তেওঁ শৰৎকালৰ শোভা দর্শন কৰে। ভাৰৱিৰ বর্ণনাত শৰৎকালৰ শোভা অনন্য সুন্দৰ হৈ উঠিছে এই সর্গত।

ম সর্গঃ- অর্জুনৰ ইন্দ্রকীল পর্বতলৈ আগমন এই সর্গৰ মূল বিষয়বস্তু। তাতে তেওঁ যক্ষৰ উপদেশ লাভ কৰে। লগতে তেওঁ হিমালয় পর্বতমালাৰ শোভা দর্শন কৰে।

ষ্ঠ সর্গঃ-অর্জুনে তপস্যা আৰম্ভ কৰে। তেওঁৰ কঠোৰ তপস্যাত গুহ্যকসকল ভীত হৈ পৰে। তেওঁলোকে অর্জুনৰ তপস্যা ভঙ্গৰ বাবে ইন্দ্রক অনুৰোধ কৰে। সেই অনুৰোধ ৰক্ষা কৰি ইন্দ্রই অপ্সৰাসকলক অর্জুনৰ তপস্যা ভাঙিৰলৈ পঠায়।

ম সর্গঃ-ইন্দ্রৰ আদেশ ৰক্ষা কৰি অপ্সৰাসকলে ইন্দ্রকীল পর্বতলৈ যাত্রা আৰম্ভ কৰে। অপ্সৰাসকলৰ ৰক্ষণাবেক্ষণৰ কাৰণে ইন্দ্রই বহুতো হাতী, ঘোৰাৰ লগতে

ভৃত্যসকলকো পঠিয়ায়। ইন্দ্রৰ ৰাজ্যৰ পৰা ইন্দ্রকীল পর্বত পর্যন্ত অপ্সৰাসকলে কৰা যাত্রাৰ মনোৰম বর্ণনা এই সর্গত পোৱা যায়।

ম সর্গঃ-ইন্দ্রকীল পর্বতত অপ্সৰাসকলৰ বনত বিহাৰ বা বিচৰণ আৰু জলকেলি বা জলক্রীড়াৰ কথা ইয়াত সুন্দৰকৈ বর্ণনা কৰা হৈছে।

ম সর্গঃ-সূর্য্যাস্তৰ মনোমুগ্ধকৰ বর্ণনাৰে আৰম্ভ হৈছে এই সর্গ। লগতে বর্ণনা কৰা হৈছে চক্রবাক চৰাইৰ বিৰহবিধুৰ অৱস্থা। নিশা গভীৰ হৈ অহাৰ লগে লগে অপ্সৰাসকলে মদিৰাপান কৰিবলৈ ধৰে আৰু কামক্রীড়াত মত্ত হয়। বৈতালিকসকলে কৰা স্তুতিগীতেৰে মুখৰিত হোৱা প্রভাত বর্ণনাৰে এই সর্গ শেষ কৰা হৈছে।

ম সর্গঃ- অপ্সৰাসকলে বিভিন্ন উপায়েৰে অর্জুনৰ কঠোৰ তপস্যা ভঙ্গ কৰিবলৈ চেষ্টা কৰে। কিন্তু তেওঁলোকৰ সকলো চেষ্টা ব্যর্থ হয়। ফলত অপ্সৰাসকলে সেই স্থানৰ পৰা প্রস্থান কৰে।

শ সর্গঃ- ইয়াৰ পিছত ইন্দ্রই এজন মুনিৰ বেশ ধাৰণ কৰি অর্জুনৰ ওচৰলৈ আহে। অর্জুনক আশীর্বাদ দি ভগৱান শিৱৰ তপস্যা কৰিবলৈ উপদেশ দিয়ে।

শ সর্গঃ- অর্জুনৰ কঠোৰ তপস্যা দেখি ঋষিমুনিসকল ভীত হৈ পৰে। তেওঁলোকে শিৱক আৰাধনা কৰিবলৈ ধৰে। তেতিয়া শিৱই তেওঁলোকক আশ্বাস দিয়ে যে তেওঁ কিৰাত বা চিকাৰীৰ বেশ ধাৰণ কৰি অর্জুনৰ লগত যুদ্ধ কৰিব।

শ সর্গঃ- শিৱই কিৰাতৰ বেশ ধাৰণ কৰি অর্জুনৰ ওচৰলৈ যায়। তাতে অর্জুনৰ ফালে দৌৰি যোৱা এটা বৰাহ বা গাহৰিক অর্জুন আৰু কিৰাতৰূপী শিৱই একে সময়তে শৰবিদ্ধ কৰে। বৰাহটোৰ মৃত্যু হয়। অর্জুনে তেওঁৰ বান বৰাহটোৰ শৰীৰৰ পৰা উলিয়াৱলৈ লয়। সেই সময়তে কিৰাতৰূপী শিৱ আহি সেই স্থানত উপস্থিত হয় আৰু অর্জুনক ভৎর্সনা কৰে। কিৰাতৰ মতে তেওঁহে প্রথমে শৰবিদ্ধ কৰি বৰাহটো বধ কৰে।

শ সর্গঃ- কিৰাতৰূপী শিৱৰ লগত বহু কিৰাতসৈন্যও সেই স্থানলৈ আহে। অর্জুনৰ লগত সেই সৈন্যসকলৰ যুদ্ধ হয়। যুদ্ধত কিৰাত সৈন্য পৰাজিত হয়।

শ সর্গঃ- অর্জুনৰ বীৰত্বৰ আগত তিষ্ঠিব নোৱাৰি পলায়ন কৰা সৈন্যসকলক কার্তিকেয়ই পুনৰ বুজাই বঢ়াই ৰণভূমিলৈ ওভতাই আনে। পিছত ভগৱান শিৱ আৰু অর্জুনৰ প্রচণ্ড বাণযুদ্ধ হয়।

শ সর্গঃ- কিৰাতৰূপী শিৱ আৰু অর্জুনৰ মাজত যুদ্ধ হয়। যুদ্ধত দুয়োজনে দিব্য অস্ত্র প্রয়োগ কৰিবলৈ ধৰে, এইবাৰ কিৰাতৰ হাতত অর্জুন পৰাস্ত হয়।

শ সর্গঃ- অস্ত্রৰে ব্যর্থ হৈ অর্জুনে শিল, গছৰ গুৰি আদিৰে কিৰাতৰূপী শিৱৰ লগত যুদ্ধ কৰিবলৈ ধৰে। কিন্তু সেইবাৰো তেওঁ ব্যর্থ হয়।

শ সর্গঃ- এইবাৰ কিৰাত আৰু অর্জুনৰ মাজত মল্লযুদ্ধ আৰম্ভ হয়। যুঁজৰ মাজত এবাৰ কিৰাতে ওপৰলৈ জপিয়ায়। সেই মূহুর্ততে অর্জুনে তেওঁৰ ভৰিত ধৰে। তেতিয়া কিৰাতে তেওঁৰ প্রকৃত ৰূপ প্রকাশ কৰে। অর্জুনৰ বীৰত্বত ভগৱান শিৱ অতিশয় সন্তুষ্ট হয়। শিৱই তেওঁক দিব্য "পাশুপাত অস্ত্র" প্রদান কৰাৰ লগতে ধনুর্বেদো প্রদান কৰে। অন্যান্য দেৱতাসকলেও অর্জুনক বিভিন্ন দিব্যঅস্ত্র প্রদান কৰে। অস্ত্রসমূহ লাভ কৰি অর্জুন যুধিষ্ঠিৰৰ ওচৰলৈ উভতি যায়।

এইখিনিতে "কিৰাতার্জুনীয়ম্" মহাকাব্যৰ সমাপ্তি ঘটে।

११.७ महाकविभारवेः परिचयः

भारविः वीररसवर्णनकुशलः, प्रकाण्डपण्डितः, अलङ्कारशैल्ल्याः प्रवर्तकः, प्रकृतिवर्णने पटुः च आसीत्। किरातार्जुनीयमहाकाव्ये भारविणा कुत्रापि निजपरिवारस्य विषये, निवासस्थानविषये, मातरौ, गुरोर्वाविषयेउल्लेखः न कृतः।

दण्डिविरचितम् 'अवन्तिसुन्दरी कथा' इत्यत्र भारविः कुशिकगोत्रीयः ब्राह्मणः आसीदिति उल्लेखः अस्ति। तत्र उल्लेखानुसारं ते प्रथमम् आनन्दपुरे, परं वरारप्रान्तम् अचलपुरम् एलिपुरम् आगत्य निवसन्ति स्म। तस्मिन्वंशे एव नारायणस्वामी जातः। तस्य पुत्रः एव दामोदरः, यस्य अपरनाम भारविः इति प्रसिद्धिः अस्ति। भारविविषयकमेकं पद्यम् उपलभ्यते –

स मेधावी कविर्विद्वान् भारविं प्रभवां गिराम्।
अनुरुध्याकरोन्मौत्रीं नरेन्द्रे विष्णुवर्धने।। इति।।

एवं प्रकारेण ज्ञायते यत् भारविः दण्डिनः पितामहः आसीत्।

११.८ महाकविभारवेः कालः

भारवेः देशकालविषये विविधानि मतानि सन्ति। तानि अधस्तात् उपन्यस्यन्ते –

- प्रथमः – दक्षिणभारते एहोलग्रामे कविः रविकीर्तिः ६३४ ई. खीष्टाब्दे शिलालेखं लिखति। तत्र तेन लिखिते शिलालेखे 'सविजयतां रविकीर्तिः कविताश्रितकालिदास–भारविकीर्तिः' इति उपलभ्यते। इत्यनेन ज्ञायते यत् सप्तमशताब्द्याः पूर्वार्धं भारविः प्रख्यातकविः आसीदिति।
- द्वितीयः – काव्यकलादृष्टया उत्तरोत्तरप्रभावदृष्टया च कालिदासः भारवेः पूर्ववर्तीमहाकविमाघः च उत्तरवर्तीकविः आसीत्। माघस्य कालः ७०० ई. ख्रीष्टाब्द इति मन्यते। अतः भारवेः कालः षष्ठशतिकायाः उत्तरार्धे भवितुम् अर्हन्तीति केषाञ्चन मतम्।
- तृतीयः – काशिकायामपि भारवेः उदाहरणम् उपलभ्यते (किरात. ३/१४)। अतः भारवेः समयः वामनजयादित्याभ्यां परम् अर्थात् सप्तमशतिकायाः पूर्वं षष्ठशतिकायाः उत्तरार्धे भवितुमर्हन्ति इति केषाञ्चन पण्डितानां मतम्।
- चतुर्थः – अवन्तिसुन्दरीकथानुसारं दण्डिनः प्रपितामहः दामोदरः एव भारविः इति ।

तेनानुसारं भारविः विष्णुवर्धनस्य (६१५ ई.) सभापण्डितः आसीत्। अतः भारवेः कालः षष्ठशतिकायाः उत्तरार्धे भवितुमर्हन्ति। पाश्चात्य कविः कीथस्य अनुसारं भारवेः समयः ५००ई.-६०० ई. मध्ये एव आसीदिति। निष्कर्षरूपेण भारवेः स्थितिकालः षष्ठशतिकायाः उत्तरार्धे सप्तमशतिकायाः पुर्वार्धे (५५०ई.-६००ई.) एव भवितुमर्हन्ति।



ज्ञातव्यम्

संस्कृतसाहित्ये नायकस्य भेदचतुष्टयमस्ति। यथा - धीरोदात्तः धीरोद्धतः धीरललितः धीरप्रशान्तश्चेति।

'भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम्।' (दशरूपकम्)

अत्र अर्जुनः धीरोदात्तः नायकः अस्ति। अस्य लक्षणं यथा -


महासत्वोऽतिगम्भीरः क्षमावानविकत्थनः।

स्थिरो निगूढ़ाहङ्कारो धीरोदात्तो दृढवृत्तः।। (दशरूपकम्)

अर्थात् यस्य हृदयं शोक - क्रोधादितः अप्रभावितोभवति , य अतिगम्भीरस्वभावः , क्षमावान्, आत्मप्रसंशारहितः , सुख-दुःखयोः स्थिरः, निरहङ्कारः , धैर्यधारकः, कार्ये दृढः , सः नायकः धीरोदात्तो भवति।

रसाः -

- एकस्य महाकाव्यस्य आत्मारसो भवति। रसं विना काव्यं न सम्भवति। नवरसाः सन्ति। ते यथा - श्रृंगार-हास्य-करुण-रौद्र-वीर-भयानक-वीभत्स-अद्भुत-शान्ताश्चेति।
- विभावाऽनुभावसात्विकव्यभिचारिभावसमुल्लसितस्थायिभावः एवरसः।
  श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
  वीभत्सोऽद्भुत इत्यष्टौ शान्तोऽपि नवमो रसः।। (नाट्यशास्त्रम्)



अग्रगत्याः निरूपणम्

प्रश्नः १: 'किरातार्जुनीयम्' महाकाव्यस्य ग्रन्थकारः कः ?

.....

प्रश्नः २: 'किरातार्जुनीयम्' महाकाव्यस्य कथा कुतः आनीतास्ति ?

.....

प्रश्नः ३: 'किरातार्जुनीयम्' महाकाव्ये कति सर्गाः सन्ति ?

.....

प्रश्नः ४: 'किरातार्जुनीयम्' महाकाव्यस्य प्रधानरसः कः ?

.....

प्रश्न: ५: 'किरातार्जुनीयम्' महाकाव्यस्य नायक: क: ?

.....

प्रश्न: ६: 'किरातार्जुनीयम्' एकं ----------। (रिक्तस्थानं पुरयत)

प्रश्न: ७: बृहत्त्रयी इत्यस्य कोर्थ: ?

.....

प्रश्न: ८: भारवे: पितु: नाम किम् ?

.....

प्रश्न: ९: भारवे: कोऽपर अभिधानम् ?

.....

प्रश्न: १०: दण्डिविरचितम् एकस्य ग्रन्थस्य नाम लिखत ?

.....

प्रश्न: ११: एहोलशिलालेखस्य लेखक: क: ?

.....

प्रश्न: १२: भारवि: कं ग्रन्थम् अरचयत् ?

.....



११.१० अध्यायात् किमवगतम्

- 'किरातार्जुनीयम्' भारवे: एका कीर्ति:।
- 'किरातार्जुनीयम्' बृहत्त्रय्यामन्तर्गतोऽस्ति।
- महाकाव्येऽस्मिन् अष्टादशसर्गा: सन्ति।
- अस्य महाकाव्यस्य अङ्गीरस: वीर:।
- 'किरातार्जुनीयम्' महाकाव्यस्य कथासार: महाभारतस्य वनपर्वण: स्वीकरोति।
- भारवे: काल: षष्ठशतिकाया: उत्तरार्धे तथा सप्तमशतिकाया: पुर्वर्धे अस्ति।
- 'किरातार्जुनीयम्' महकाव्यस्य अष्टादशसर्गानां सारांश: अस्माभि: अधीत:।



१०.११ ज्ञानाधिकम्

१) काले, एम्.आर.(सम्पादनम्) रघुवंशम् अक् कालिदास:(१-५),दिल्ली,मतिलाल वनारसीदास पब्लिक प्राईवेट लिमिटेड।

२) गोस्वामी, डॉ. मालिनी (२००९) रघुरपि काव्यम्, गुवाहाटी चन्द्रप्रकाश:।

३) भद्र, सुधेन्दु, मोहनः, रघुवंशम्, गुवाहाटी चन्द्रप्रकाशः।

४) संस्कृत-साहित्य-सम्भारः (१९८१) नव-पत्र-प्रकाशनम्।



११.१२ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : भारविः।

प्रश्नः २ उत्तरम् : महाभारतस्य वनपर्वणः।

प्रश्नः ३ उत्तरम् : अष्टादश।

प्रश्नः ४ उत्तरम् : वीरः।

प्रश्नः ५ उत्तरम् : अर्जुनः।

प्रश्नः ६ उत्तरम् : महाकाव्यम्।

प्रश्नः ७ उत्तरम् : किरातार्जुनीयम् , शिशुपालवधम्, नैषधीयचरितम् चेति।

प्रश्नः ८ उत्तरम् : नारायणस्वामी।

प्रश्नः ९ उत्तरम् : दामोदरः।

प्रश्नः १० उत्तरम् : अवन्तिसुन्दरीकथा।

प्रश्नः ११ उत्तरम् : रविकीर्तिः।

प्रश्नः १२ उत्तरम् : 'किरातार्जुनीयम्'।



११.१३ अभ्यासप्रश्नाः

प्रश्नः १: संक्षेपेनलिखत -

क) महाकाव्यम्, ख) बृहत्त्रयी, ग) धनुर्वेदः

प्रश्नः २: 'किरातार्जुनीयम्' महाकाव्यस्य सर्गानां सारांशं लिखत।

प्रश्नः ३: भारवेः अर्थगौरवम् - व्याख्या कुरुत।

प्रश्नः ४: महाकविभारवेः विषयकम् एकं प्रबन्धं प्रस्तूयाताम्।

प्रश्नः ५: 'किरातार्जुनीयम्' महाकाव्यस्य विषये स्वभाषया एकं प्रबन्धं लिखत।

****

अध्यायः १२ : किरातार्जुनीयम्- प्रथमसर्गः (श्लोकाः १-२५)

अध्यायस्य संरचना

१२.१ उद्देश्यम्

१२.२ परिचयः

१२.३ प्रथमसर्गस्य पद्यानां (१-२५) संस्कृतपाठः

१२.४ श्लोकानाम् अन्वयः

१२.५ पद्यानां शाब्दार्थः

१२.६ व्याकरणात्मकटिप्पणी

१२.७ वनेचरस्य उक्तीनां सारांशः

१२.८ असमीया अनुवादः (१-२५)

१२.९ अध्यायात् किमवगतम्

१२.१० ज्ञानाधिक्यम्

१२.११ अग्रगत्याः निरूपणम्

१२.१२ अभ्यासप्रश्नाः

१२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- 'किरातार्जुनीयम्' इति महाकाव्यस्य प्रथमसर्गस्य मूलविषयस्य ज्ञानं भविष्यति।
- प्रथमसर्गस्य पद्यसंख्या १-२५ पर्यन्तं सस्कृतपाठः, तस्य संस्कृत-अर्थानां ज्ञानं, संस्कृतशब्दानां वैयाकरणां शब्दानां ज्ञानं भविष्यति।
- भारवेः काव्यशैल्या सह परिचयं च भविष्यति।
- वनेचरस्य उक्तीनाम् आलोचनं कर्तुं शक्ष्यन्ति।

१२.२ परिचयः

इतः पूर्वं भवन्तः सर्वे भारविविरचितस्य 'किरातार्जुनीयम्' इति महाकाव्यस्य विषये विहङ्गमदृष्टया अध्ययनम् अकुर्वन्। अस्मिन् अध्याये प्रथमसर्गस्य पद्यसंख्या १तः २५ पर्यन्तं पठिष्यामः। बृहत्त्रय्याम् अन्तर्गतं 'किरातार्जुनीयम्' महाकाव्यम् अन्येषु महाकाव्येषु अन्यतममस्ति। 'भारवेरर्थगौरवम्' इति उक्तिना भारविः प्रसिद्धोऽस्ति। 'किरातार्जुनीयम्' महाकाव्ये भारविणा अलङ्काराणां रसानाञ्च प्रौढत्वेन प्रयोगः कृतः। अस्मिन् अध्याये पद्यानां संस्कृतपाठः, शब्दानां संस्कृतशब्दार्थान् ज्ञातुं शक्नुमः। इतोऽपि शब्दानां वैयाकरणविश्लेषणं पठिष्यामः।

१२.३ प्रथमसर्गस्य श्लोकाः (१-२५)

१. श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गीविदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥ १.१।।

२. कृत प्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥ १.२।।

३. द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्य विशेषशालिनीं विनिश्चितार्थमितिवाचमादधे॥ १.३।।

४. क्रियासु युक्तैर्नृप! चारचक्षुषोन वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वाहितं मनोहारि च दुर्लभं वचः ॥ १.४॥

५. स किंसखा साधु न शास्ति योऽधिपंहितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिंनृपेष्वमात्येषु च सर्वसम्पदः ॥ १.५॥

६. निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मयानिगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ १.६॥

७. विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहतेनयेन जेतुं जगतीं सुयोधनः ॥ १.७॥

८. तथापि जिह्मः स भवज्जिगीषयातनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः ॥ १.८॥

९. कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणावितन्यते तेन नयेन पौरुषम् ॥ १.९॥

१०. सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥ १.१०॥

११. असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्नबाधतेऽस्य त्रिगणः परस्परम् ॥ १.११॥

१२. निरत्ययं साम न दानवर्जितंन भूरि दानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनीगुणानुरोधेन विना न सत्क्रिया ॥ 1.12॥

१३. वसूनि वाञ्छन्न वशी न मन्युनास्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वानिहन्ति दण्डेन स धर्मविप्लवम् ॥ १.१३॥

१४. विधाय रक्षान् परितः परेतरानशङ्कितोकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥ १.१४॥

१५. अनारतं तेन पदेषु लम्भितावभज्य सम्यग्विनियोगसत्क्रियाम्।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य सङ्घर्षमिवार्थसम्पदः ॥ १.१५॥

१६. अनेकराजन्यरथाश्वसङ्कुलं तदीयमास्थाननिकेतनाजिरम्।

नयत्ययुग्मच्छदगन्धिरार्द्रतांभृशं नृपोपायनदन्तिनां मदः ॥ १.१६ ॥

१७. सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति ॥ १.१७ ॥

१८. उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥ १.१९ ॥

१९. महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
न संहतास्तस्य नभिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १.१८ ॥

२०. महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥ १.२० ॥

२१. न तेन सज्यं क्वचिदुद्यतं धनुः कृतंन वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥ १.२१ ॥

२२. स यौवराज्ये नव यौवनोद्धतं निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥ १.२२ ॥

२३. प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥ १.२३ ॥

२४. कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्-व्यथते नताननः सदुःसहान्मन्त्रपदादिवोरगः ॥ १.२४ ॥

२५. तदाशुकर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥ १.२५ ॥

१२.४ श्लोकानाम् अन्वयः

१. करुणाम्, अधिपस्य, श्रियः, पालनीं, प्रजासु, वृत्तिं, वेदितुं, यम्, अयुङ्क्त, वर्णिलिङ्गी, सः, वनेचरः, विदितः, (सन्) द्वैतवने, युधिष्ठिरं, समाययौ।

२. कृत, प्रणामस्य, सपत्नेन, जितां, महीं, महीभुजे, निवेदयिष्यतः, तस्य, मनः, न विव्यथे। हि हितैषिणः, मृषा, प्रियं, प्रवक्तुं, न इच्छन्ति।

३. सः, रहसि, द्विषाम्, विघाताय, विधातुम्, इच्छतः, भूभुतः, अनुज्ञाम्, अधिगम्य, सौष्ठवौदार्य, विशेषशालिनीं विनिश्चितार्थाम् इति वाचम् आदधे।

४. नृप! क्रियासु, युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः नवञ्चनीयाः। अतः असाधु साधु वा क्षन्तुम् अर्हसि। हितं मनोहारि च वचः दुर्लभम्।

५. यः अधिपं साधु न शास्ति सः किं सखा यः हितात्न संशृणुते सः किंप्रभुः। हि नृपेषु अमात्येषु च अनुकूलेषु सर्वसम्पदः सदा रतिं कुर्वते।

६. निसर्ग, दुर्बोधम् भूपतीनां चरितम् क्व ? अवोधविक्लवाः जन्तवः क्व ? मया विद्विषाम्, यत् निगुढतत्त्वं नयवर्त्म अवेदि, अयंतव अनुभावः।

७. सुयोधनः नृपासनस्थः अपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः दुरोदरः छद्मजितां जगतीं नयने जेतु समीहते।

८. तथापि सः जिह्मः भवत् जिगीषया गुणसम्पदा शुभ्रं यशः तनोति। भूतिं समुन्नयन् महात्मभिः समं विरोधः अपि अनार्यसङ्गमात्वरम्।

९. कृतारिषड्वर्गजयेन अगम्य रूपां मानवीं पदवीं प्रपित्सुना अस्ततन्द्रिणा तेननक्तं दिवं विभज्यनयेन पौरूषं वितन्यते।

१०. गतस्मयः सः अनुजीविनः प्रीतियुजः सखीन् इव सुहृदः च बन्धुभिः समानमानान् इव बन्धुतां च कृताधिपत्याम् सन्ततं साधु इव दर्शयते।

११. यथायथं विभज्य समपक्षपातया भक्त्या असक्तम् आराध्यतः अस्य त्रिगणः गुणानुरागात् सख्यम् ईयिवान् इव परस्परं न बाधते।

१२. तस्य निरत्ययं साम दानवर्जितं न प्रवर्तते। भूरि दानं सत्क्रियां विरहय्य न प्रवर्तते। विशेषशालिनीं सत्क्रिया गुणानुरोधेन विना न प्रवर्तते।

१३. वशी सः वसूनि वाञ्छन् न, मन्युनान, किन्तु निवृत्तकारणः स्वधर्मः एव इति गुरुपदिष्टेन दण्डेन रिपौसुते अपि वा धर्मविप्लवं निहन्ति।

१४. शङ्कितः परितः परेतरान् रक्षान् विधाय अशङ्किताकारम् उपैति। क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः अस्यकृतज्ञतां वदन्ति।

१५. तेन पदेषु विभज्यलम्भिताः सम्यग्विनियोगसत्क्रिया उपायाः सङ्घर्षम् उपेत्य इव परिवृंहितायतीः अर्थसम्पदः अनारतं फलन्ति।

१६. अयुग्मच्छदगन्धिः नृपोपायनदन्तिनां मदः अनेकराजन्यरथाश्वसङ्कुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति।

१७. तस्मिन् चिराय क्षेमं वितन्वति अदेवमातृकाः कुरवः अकृष्टपच्या इव कृषीवलैः सुखेन लभ्याः सस्यसम्पदः दधतः चकासति।

१८. उदारकीर्तेः दयावतः अभिरक्षया प्रशान्तबाधम् उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्नुता मेदिनी स्वयं वसूनि प्रदुग्धे।

१९. महौजसः मानधना धनार्चिताः संयति लब्धकीर्तयः न संहताः न भिन्नवृत्तयः धनुर्भृतः असुभिः तस्य प्रियाणि समीहितुं वाञ्छन्ति।

२०. अशेषितक्रियः सः सञ्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद। धातुः इव तस्य ईहितं महोदयैः हितानुबन्धिभिः फलैः प्रतीयते।

२१. तेन क्वचित्सज्यं धनुः न उद्यतम् आननं वा कोपविजिह्मं न कृतम्। नराधिपैः अस्य शासनं गुणानुरागेण माल्यम् इव शिरोभिः उह्यते।

२२. इद्धशासनः सः नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः मुखेषु हव्येन हिरण्यरेतसंधिनोति।

२३. सः प्रलीनभूपालं स्थिरायति आवारिधि भुवः मण्डलं प्रशासत् अपित्वत् एष्यतीः भियः

चिन्तयति एव। अहोबलवत् विरोधिता दुरन्ता।

२४. कथा प्रसङ्गेन जनैः उदाहृतात् दुःसहात् तवाभिधानात् मन्त्रपदात् अनुस्मृताखण्डल सूनुविक्रमः नताननः उरगः इव व्यथते।

२५. तत् त्वयि जिह्मं कर्तुमत्र उद्यते। विधेयम् उत्तरम् आशु विधीयताम्। परप्रणीतानि वचांसि चिन्वतां मादृशां गिरः प्रवृत्तिसाराः खलु।

१२.५ पद्यानां शब्दार्थः

१. कुरुणाम् = कुरुदेशस्य विशेषानाम्, अधिपस्य = नृपस्प, अधिपतिः, तस्म अधिपतिः दुर्योधनस्य, श्रियः = राजलक्ष्मीः, पालनीं = रक्षाकारिणीं, सुप्रतिष्ठितकारिणीं, प्रजासु वृत्तिं = प्रजा-नीतिम्, वेदितुं - ज्ञानार्थं, यम् = वनेचरं, अयुङ्क्त = नियुक्तवान्, (गुप्तचररूपेण हस्तिनापुरं प्रेषितवान्, वर्णलिङ्गी = ब्रह्मचारीवेशधारकं, सः = वनेचरः = किरातः, वने यः विचरणं करोति सः, विदितः ज्ञात्वा, शत्रुः दुर्योधनस्य सम्पूर्णं वृत्तान्तं ज्ञात्वा, द्वैतवने = द्वैत नामक तपोवने, युधिष्ठिरं = पाण्डवस्य ज्येष्ठपुत्रं, समाययौ = समीपं प्रत्यार्पणं कृतवान्, समीपम् आगवान्।

२. कृतप्रणामस्य = नमस्कारं कृत्वा, यः प्रणामं कृत्वा (युधिष्ठिरं) तस्य, सपत्नेन = शत्रुद्वारा वैरिणा, जितां = जयतां प्राप्य, अधीनस्व, महीं = पृथ्वीं, महीभुजे = अधिपतिर्युधिष्ठिराय, निवेदयिष्यतः = निवेदनं कृत्वा, तस्य = किरातस्य, मनः न विव्यथे = चित्तव्यथितः न भवति, व्यथितः = दुःखितः, भयभीतः, विचलितः, हि हितैषिणः = हितकामिकः, कल्याणपरायणः, हितेच्छाकारकः, मृषा = मिथ्या, असत्यं, प्रियं = मधुरं, सत्यवाणीं, प्रवक्तुं = उदितुम् इच्छुकः, वक्तुकामः, न इच्छन्ति= न कामयते।

३. द्विषां =शत्रूणाम्, विघाताय = विनाशाय, विधातुम् = प्रयत्नकर्तु, इच्छतः = आकांक्षितः, भूभृतः = राजा, नृपः, रहसि = एकान्ते, अनुज्ञाम् = आज्ञां, अनुमतिं, अधिगम्य = प्राप्य, सः = वनेचरः सौष्ठवौदार्यविशेषशालिनीं = अर्थगम्भीरता, अर्थगौरवम्, अर्थसम्पत्तिः, अर्थवैभवानां विशेषा, ताम्, शालिनीं = सुशोभिनीं, विनिश्चितार्थम् = असन्दिग्धम् अर्थयुक्तं ताम्, इति = एवं, वाचम् = वाणीं, आददे = उक्तवान्, अवदत्।

४. नृप! = हे राजन्!, क्रियासु =कार्येषु, युक्तैः = नियुजितैः, नियुक्तैः, अनुजीविभिः - अनुचरैः , सेवकैः, भृत्यैः, चारचक्षुष = गुप्तचरैः दृशामानाः, प्रभवः = स्वामिनः, अधिपतयः, न वञ्चनीयाः = नछलयुक्ताः, मिथ्याभाषणरहिताः, असाधु = अप्रियः, असमीचीनः, वा =अथवा, साधु = प्रियः, समीचीनः, मधुरः, क्षन्तुम् = क्षमायोग्यः, अर्हसि = योग्यः, हितं = हितकरं, कल्याणकरं, मनोहारि = मनोहरः, मधुरः, वचः = वचनम, कथनम्, वाणी, दुर्लभम् = प्राप्तुं कठिनः, न लभते, न प्राप्यते।

५. यः अधिपं = यः राजानम्, अधिपतिं, साधु = हितकरं, कल्याणप्रदः, न शास्ति = न उपदिशति, सः = हितकरम् उपदेशं यः न ददाति, किंसखा = कुमित्रम्, कुत्सितमित्रम्,

असाधु अमात्यः, यः हितात् = यः हितैषीजनात्, कल्याणप्रदकरात्, न संशृणुते = हितकरवाचं नशृणोति, सः किंप्रभुः = कुस्वामी, असाधुनृपः, हि =यतः, नृपेषु = अधिपतिषु राजसु, अमात्येषु च = मन्त्रिषु, सचिवेषु, अनुकूलेषु अनुरक्तेषु, सर्वसम्पदः = सर्वविभूतयः, सदा =सर्वदा, रतिं कुर्वते = निरन्तरं वृद्धिः जायते।

६. निसर्गदुर्बोधं = स्वभावे एव दुर्बोधं, ज्ञातुं कठिनम्, तादृशः स्वभावः, भूपतीनां = नृपानां, चरितं = चरित्रम्, व्यवहारम्, क्व = कुत्र, अज्ञानविक्लवाः = अविवेकी, अज्ञानं, ज्ञानरहितः, येषां बुद्धिः नष्टा, ते, जन्तवः = प्राणिनः, जीवाः, क्व = कुत्र, विद्विषां = शत्रूणाम्, निगूढतत्त्वम् = अत्यन्त रहस्यात्मकम् तत्वम्, नयवर्त्म = नीतिमार्गः, राजनीतिमार्गः, यत् मया अवेदि = अहंयत् ज्ञातवान्, अयं क्व अनुभावः = भवतः प्रभावः अस्ति।

७. सुयोधनः = दुर्योधनः, धृतराष्ट्रस्य ज्येष्ठः पुत्रः, नृपासनस्थ = राजसिंहासनम् आरूढ्य, वनाधिवासिनः = वने निवासं ये कुर्वन्ति, ते, भवतः = राजायुधिष्ठिरस्य, नृपस्य, पराभवं = पराजयः, विशङ्कमानः = शङ्कासहित मनांसि, भयभीतः दुरोदरच्छद्मजितां द्युतकीडा छलेण जयतां प्राप्य, दुरोदरकपटेन जयं प्राप्य, जगतीं = पृथ्वीं, संसारं, नयेन = नीतिद्वारा, जेतुं = जयं प्राप्तुं, विजयी भवितुम्, समीहते = अभिलप्सते, प्रतीयते, प्रयासः क्रियते।

८. तथापि = पराजयस्य आशङ्कां ज्ञात्वा अपि, जिह्मः = कुटिलः, वञ्चकः, सः = दुर्योधनः, भवज्जिगीषया = तं नृपं (युधिष्ठिरं) जेतुम् इच्छया, गुणसम्पदा =दानदक्षिणादि गुणसम्पत्तिना, शुभ्रं = स्वच्छं, निर्मलं, यशः = कीर्तिः, तनोति = विस्तारं करोति, भूतिं= ऐश्वर्य, समृद्धिम्, उत्कर्षम्, समुन्नयन् = बर्धयन्, महात्मभिः = सज्जनैः, महापुरुषैः, समं = समानतया, विरोधः अपि = विद्वेषः अपि, शत्रुता अपि, अनार्यसंगमात् = दुर्जनसंसर्गात्, दुष्टेन सह मित्रता, वरम् = श्रेष्ठः।

९. कृतारिषड्वर्गजयेन = काम-क्रोध-लोभ-मोह-मद-मात्सर्यादि षड् रिपूणां जयेन, षड्रिपूणां विजयेन, अगम्यरूपां = दुष्प्राप्यस्वरूपं, अलभ्यस्वरूपम, दुर्लभस्वरूपम्, मानवीं = मनुना, मनुस्मृतौ उपदिष्टः, ताम, पदवी = प्रजापालननीति-विधिः इत्यादयः, दायित्वम्, प्रपित्सुना = प्राप्तकामा, अभिलाषायुक्तः, तेन, अस्ततन्द्रिणा = तन्द्ररहितः आलस्यविहिन, तेन दुर्योधनेन, नक्तं = रात्रिम्, दिवसं = दिनम्, विभज्य = विभाजनं, कृत्त्वा, नयेन = नीतिना, पौरषं = पुरुषार्थं, वितन्यते = निरन्तरं विस्तारं करोति।

१०. गतस्मयः = अभिमानरहितः, निरहङ्कारः, सः = दुर्योधनः अनुजीविनः = भृत्यान्, सेवकान्, प्रीतियुजः = स्नेहशीलः, श्रेमयुक्तः, सखीन् इव = मित्रमिव, सुहृदः = मित्राणि, बन्धुभिः = मित्रैः, भ्रातृभिः, समानमानान् इव = सम सम्मान समादरः इव, बन्धुतां च = मित्राणि च कृताधिपत्याम् = राज्याधिपति इव, सन्ततं = सर्वदा, निरन्तरम्, साधु = समीचीनभावं दर्शयेत् = प्रदर्शितः।

११. यथायथं = समुचितं, विभज्य = विभाजनं कृत्वा, समपक्षपातया = समानरूपेण, समदृष्टिः, भक्त्या = प्रेम्ना, अनुरागेण, असक्तम् = आसक्तिरहितः, आराधयतः = सेवमानः, अस्य =

दुर्योधनस्य, त्रिगणः = धर्म-अर्थ-कामादित्रिवर्गाः, गुणानुरागात् = दुर्योधनस्य गुणानाम् अनुरागः, प्रेम्नः, सख्यम् = मित्रतां , इयिवान् = प्राप्तवान्, परस्परं = एकेन सह एकस्य भावः, ने वाधते = न अवरोद्धयति।

१२. तस्य = दुर्योधनस्य, निरत्ययं = निर्बाधं, विघ्नरहितम्, साम = सान्त्वना, मधुरवचनम्, सामनीति (साम-दाम-दण्ड-भेदेषुप्रथमः) दानवर्जितं न = दानरहितं, भूरिदानं = प्रचुरदानम्, प्रभूतदानम्, दानं = धनस्य दानम्, धनस्य त्यागम्। सत्क्रियाम् = सत्कारम्, आदरम्, सम्मानम्, विरहय्य न = नत्यज्य, विशेषशालिनी = विशेषरूपेण सुशोभिता, गुणानुरोधेन विना = विद्या-सदाचारादि सद्गुणानाम् आदरेण विना, प्रवर्तते = प्रेरयति, आरम्भते।

१३. वशी = जितेन्द्रियः, सः = दुर्योधनः, वसूनि = धनानि, वाच्छन् न = न इच्छति, न वाञ्छति, मन्युना न = न क्रोधेन, निवृत्तकारणः = लोभ - मोहादि कारणरहितम, स्वधर्म इति एव = निजकार्यम् इति विचिन्त्य, गुरूपदिष्टेन = मनु इत्यादि धर्माचार्यैः उपदिष्टः, दण्डेन = शासनेन, रिपौ = शत्रौ, सुते अपि वा = मित्ते अपि स्थित वा, धर्मविप्लवं = कर्तव्यस्य उल्लङ्घनम्, अधर्मकरणम्, निहन्ति = नष्टं करोति, निवृत्तं करोति, इत्यर्थः।

१४. शङ्कितः = सन्देहग्रस्तः, सन्देहयुक्तः, भयभीतः, परितः = सर्वत्र, परेतरान् = आत्मीयान्, विश्वासयोग्यान्, रक्षान् = संरक्षकान् विधाय = नियुक्तिं प्रदाय, अशङ्किताकारम् = सन्देहरहितम्, भयरहितम्, उपैति = प्राप्नोति, क्रियापवर्गेषु = कार्यसमाप्तेः, पश्चात्, अनुजीविसात्कृताः = अनुचरान्, भृत्यान्, सेवकान्, प्रदाय, सम्पदः = धनादि, अस्य = दुर्योधनस्य, कृतज्ञतां = उपकारभावनां, वदन्ति = कथयन्ति।

१५. तेन = दुर्योधनेन, पदेषु = उपादेयवस्तुषु, विभज्य = विभाजनं कृत्वा, लम्भिता : = प्रयुक्ताः, सम्यग्विनियोगसत्क्रियाः = समुचितविनियोगेन सत्कारकृताः, उपायाः = साम-दाम-दण्ड-भेदादि चत्वारः उपायाः, संघर्षम् = स्पर्धाभावम्, उपेत्य इव = प्राप्य इव, परिवृंहितायतीः = स्थिरभविष्यः यस्याः अस्ति, सा, विकासशीला, अर्थसम्पदः = धनधान्यादिसम्पत्तिः, अनारतं = निरन्तरं, फलन्ति = उत्पन्नं भवन्ति, वृद्धिः जायते।

१६. नृपोपायनदन्तिनां = राजभिः प्रदत्ताः गजाः, अयुग्मच्छदगन्धिः = सप्तपर्णनामक वृक्षस्य पुष्पसमाना सुगन्धिः, मदः = मदज्जलः, (मस्तः, मत्तः), अनेकराजन्यरथाश्वसङ्कुल = अनेकानां राज्ञां रथैः आवृत्तः, तदीयम् = दुर्योधनस्य, आस्थाननिकेतनाजिरं = सभाभवनस्य अग्रभागः भृशम् = अत्यधिकम्, आर्द्रतां नयति = सिक्तां करोति।

१७. चिराय = दीर्घकालाय, तस्मिन् = दुर्योधने, क्षेम = प्रजानां कल्याणम्, वितन्वति = सम्पादनं करोति, अदेवमातृका= पर्जन्येन आश्रिता, वर्षासु न अवलम्बितः, कुरवः = कुरुदेशस्य जनाः, अकृष्टपच्या =विना कर्षनेन पक्वतां प्राप्य, कृषीवलै : = कृषकैः, सुखेन = सुखपूर्वकं, लभ्याः = प्राप्ताः, सस्यसम्पदः = सस्यसमृद्धिः, दधतः = धारयतः, चकासति = सुशोभति।

१८. उदारकीर्तेः = विशाल कीर्तेः, महा यशस्वी, दयावतः = दयालुः, अभिरक्षया = रक्षां कृत्ता, प्रशान्तबाधं = शान्तबाधम्, निर्विघ्नम, उपद्रवरहितम्, विघ्नरहितम्, उदयम् =

अभ्युदयमिदशतः = सम्पादितः, वसूपमानस्य = कुबेरसमम्, अस्य = दुर्योधनस्य, गुणैः = दया-दान- वीरता इत्यादिगुणैः, उपस्नूता = द्रवीभूता, मेदिनी = पृथ्वी, स्वयं = निजम्, वसूनि = धनानि, प्रदुग्धे = प्रददाति।

१९. महौजसः =महाबलशाली, अत्यधिक-पराक्रमी, मानधनाः = मनस्वी, अभिमानेव सम्पदः इति भावकः, सः, धनाचिताः = धनैः सम्मानिताः; सम्पद्भिः पूजिताः, संयति = संग्रामं करोति, युद्धे लब्धकीर्तयः = यशप्रापकाः, न संहताः = नृपस्य विरोधं कृत्वा न सङ्गठिताः, न भिन्नवृत्तयः = परस्परं शत्रुतां न कुर्वन्तः, धनुर्भृतः = धनुर्धारीयोद्धा, वीरः, असुभिः = निजप्राणभिः निजजीवनं समर्पयति, ताभिः, तस्य = दुर्योधनस्य, प्रियाणि = हितकरकार्याणि, अभीष्टानि, समीहितुं = समाधातुं, वाञ्छन्ति = इच्छन्ति।

२०. अशेषितक्रियः = यः कार्याणि सम्पन्नं करोति, सः, दुर्योधनः, सच्चरितैः =शुद्धचरितैः, चरैः = गुप्तचरैः, महीभृतां = नृपानां, क्रियाः = कार्याणि, निःशेषं = सम्पूर्णम्, वेद =जानाति, विज्ञाम, धातुः इव = विधाता इव, तस्य = दुर्योधनस्य, ईहितं = अभीष्टम्, चेष्टाम्, महोदयैः = अत्यधिक - उत्कर्षकैः; हितानुबन्धिभिः = हितकारकैः, फलैः = परिणामैः, प्रतीयते =जानाति, ज्ञानं भवति।

२१. तेन = दुर्योधनेन, क्वचित् = कुत्रचित्, सज्यं = प्रत्यञ्चायुक्तं, धनुः = धनुषः, न उद्यतम् = न प्रयुक्तम्, वा = अथवा, आननं = मुखम, क्रोधविजिह्मं = क्रोधवशंन कृतम्, नराधिपैः = नृपैः, अस्य = दुर्योधनस्य, शासनं = आदेशम्, आज्ञां, गुणानुरागेण = दया-दाक्षिण्यादि गुणानाम् अनुरागेण, माल्यम् इव = पुष्पमाला इव, स्रग्इव, शिरोभिः = सम्मानैः, नतमस्तकैः; उद्यते = स्वीकरोति।

२२. इद्धशासनः = प्रज्वलितशासनम्, अप्रतिहतादेशम्, नवयौवनोद्धत्तं = नवीनं युवावस्थायाः प्रगल्भम्, दुःशासनं = भ्राता दुःशासनम्, यौवराज्ये = युवराजपदं, निधाय = नियुक्तः पुरोधसा = पुरोहितेन, अनुगतः = अनुमतिं प्राप्य, अखिन्नः = आलस्यरहितं, खिन्नेन विना, मखेषु = यज्ञेषु, हव्येन = चरु-पुरोडाशादिहवनीय द्रव्येन, हिरण्यरेतसं = अग्निम्, धिनोति = प्रसन्नं करोति, हर्षयति।

२३. सः = दुर्योधनः, प्रलीनभूपालं = नष्ट नृपं, शत्रुभूताधिपतिः स्थिरायति = चिरस्थायी, निश्चित-भविष्यम् आयाति इति, आवारिधि = समुद्रपर्यन्तम्, भुवः मण्डलम् = भूमण्डलम्, पृथ्वीम्, प्रशासत् अपि = शासनं कृत्वा अपि, त्वत् = दुर्योधनात्, एष्यतीः = उत्पन्नं भवति, भियः = भयकारणम्, चिन्तयति एव = चिन्तां करोति एव, अहो = आश्चर्यभावः, बलवद्विरोधिता = बलवन्तै : शत्रुता, द्वेषादि, दुरन्ता = दुःखान्तः।

२४. कथाप्रसंगेन जनैः = वार्ता अथवा विषवैद्यः, तादृशःजनैः, श्रेष्ठ जनैः, उदाहृतात् = उच्चारितात्, दुःसहात् = असह्य अत्यन्तकठोरात्, तवाभिधानात् =तार्क्ष्य (गरुड) वासुकि (नागराज) च = तव, अभिधानात् = नाम युक्तात्, मन्त्रपदात् = विषम् अपसारणमन्त्रात्, अनुस्मृताखण्डल =सुनुविक्रमाः - आखण्डल = इन्द्रः, सुनु = पुत्रः अथवा अनुजः, वि = पक्षीः, उपेन्द्र =

विष्णुः; विष्णोः वाहनम्, अनुस्मृतः = स्मरणं कृत्वा; नताननः = अधो कणः (मुखम्) कृतः; उरग इव = सर्पसदृशः; कथाप्रसङ्गेन = वार्तालापेन; जनैः- लोकैः; उदाहृतात् = उदाहरणं ददाति, तव =दुर्योधनस्य, अभिधानात् = नाम्ना; व्यथते = व्यथितः भवति।

२५. तत् = अतः, त्वयि = युधिष्ठिरे; जिह्मं = कपटम्; कर्तुं = करणाय, उद्यते = तत्परः भवति, तत्र = दुर्योधनस्य विषये, विधेयम् = उचितम्, करणयोग्यम्; उत्तरम् = प्रतिक्रिया, आशु = शीघ्रम, विधीयताम् = कुठताम्, परप्रणीतानि = अन्यैः कृतानि कार्याणि वचांसि =कथनम्, वचनम्, चिन्वतां = सञ्चितां, एकत्रितः; मादृशां = मत्सदृशां (गुप्तचरसदृशां) गिरः = वाणी, प्रवृतिसाराः = वार्तासाराः, वृत्तान्तसाराः; सारा =तत्वम्।

१२.६ व्याकरणात्मकटिप्पणी

समासाः

१. वनेचरः = वने चरति इति वनेचरः (उपपद तत्पुरुषः)

२. चारचक्षुः = चरन्तीति चराः। चराः चक्षुंसि येषां ते, चारचक्षुषः (बहुव्रीहिः)

३. किंसखा = कुत्सितः सखा (नित्य समासः)

४. वनाधिवासिनः = वनम् अधिवसति यः (उपपद तत्पुरुषः) तस्मात्,

५. कृतज्ञताम् = कृतान् जानाति इति कृतज्ञः (उपपद तत्पुरुषः), तस्य भावः कृतज्ञता।

६. अर्थसम्पदः = अर्थानां सम्पदः (षष्ठी तत्पुरुषः)

७. उदारकीर्त्ते : = उदारा कीर्त्तिः यस्य (बहुव्रीहिः) तस्य,

८. महौजसः = महत् उजः येषां ते, (बहुव्रीहिः)

९. यौवराज्ये = युवा राजा इति युवराजः, (कर्मधारयः), युवराजस्य कर्म यौवराज्यम्, तस्मिन्।

१०. प्रलीनभूपालम् = प्रलीनाः भूपालाः यत्र, (बहुव्रीहिः)

सन्धयः, व्युत्पत्तयः

१. अधिपस्य = अधि-√पा + क इति अधिपः। तस्य

२. क्षन्तुम् = √क्षम् + तुमुन्।

३. समीहते = सम् + √ईह + लट् ते।

४. दर्शयते = √दृश + णिच् + लट् ते।

५. वाञ्छन् = √वाञ्छ् + शतृ।

६. निहन्ति = नि-√हन् + लट् ति।

७. उप्रैति = उप-√इन् + लट् ति।

८. समीहितुम् = सम-√ईह + तुमुन्।

९. प्रतीयते = प्रति- √इन् + लट्ते।

१०. वेद = √विद + लट् ति।

११. विदितः = √विद् + क्तः।

१२. उदाहृतः = उत् + आ- √हृ + क्त

१३. व्यथते = √व्यथ् + लट् प्रथमपुरुषः, एकवचनम्।

१४. विधीयताम् = वि- √धा लोट् (कर्मणि) प्रथमपुरुषः, एकवचनम्।

१५. प्रणीतानि = प्र -√नी + क्त।

१६. वेदितुम् = √विद् + तुमुन्।

१७. अयुङ्क्तः = √युज् + लङ्, प्रथमपुरुषः, एकवचनम्

१८. समाययौ = सम् - आ -√या + लिट्, प्रथमपुरुषः, एकवचनम्

१९. जितां =√जि + क्त

२०. निवेदयिष्यतः = नि -√वैद्य+ कृत्

२१. विव्यथे = √व्यथ् + लिट्, प्रथमपुरुषः, एकवचनम्

२२. प्रवक्तुम् = प्र -√वच् + तुमुन्

२३. विधातुम् = वि-√धा + तुमुन्

२४. इच्छतो = √इष् + शतृ

२५. अधिगम्य = अधि -√गम् + ल्यप

२६. आदधे = आ- √धा + लिट् प्रथमपुरुषः, एकवचनम्

२७. युक्तैः = √युज् + क्त

२८. अर्हसि= √अह् + लट्, मध्यमपुरुषः, एकवचनम्

२९. शास्ति= √शास् + लट् , प्रथमपुरुषः, एकवचनम्

३०. निगूढ = नि -√गुह् + क्त

३१. संशृणुते = सम् - √श्रु + लट् , प्रथमपुरुषः, एकवचनम्

३२. विशङ्कमानो = वि -√शङ्क + शानच

३३. तनोति =√तन् + लट् , प्रथमपुरुषः, एकवचनम्

३४. समुन्नयत् = सम् - उत् +√नी + शतृ

३५. विभज्य = वि -√भज् + ल्यप

३६. वितन्यते = वि -√तन् + लट्, प्रथमपुरुषः, एकवचनम्

३७. आराधयतो = आ- √राधय् + शतृ

३८. विराहय्य = वि -√रह्य् + ल्यप

३९. प्रवर्तते = प्र- √वृत् + लट्, प्रथमपुरुषः, एकवचनम्

४०. वाञ्छन् = √वाञ्छ् + शतृ

४१. गुरूपदिष्टः = (गुरू) उप-√दिश् + क्त

४२. विधाय = वि -√धा + ल्यप

४३. शङ्कितः = √शङ्क + क्त

४४. उपेत्य= उप-√इ + ल्यप

४५. नयति= √नी + लट् प्रथमपुरुषः एकवचनम्

४६. लभ्य = √लभ् + कृत्

४७. दधतः = √धा + शतृ

४८. वितन्वति = वि –√तन् + लट् , प्रथमपुरुषः, बहुवचनम्

४९. प्रशान्तः = प्र –√शम् + क्त

५०. उपस्तुता = उप –√स्तु + क्त

५१. अर्चिता = √अर्चय् + क्त

५२. संहता= सम् –√हन् + क्त

५३. उद्यत = उत् –√यम् + क्त

५४. उह्यते= √वह् + प्रथमपुरुषः, एकवचनम्

५५ उद्धतं = उत् – √हन् + क्त

५६. निधाय= नि –√धा + ल्यप्

५७. अनुमत = अनु –√मन् + क्त

५८. प्रलीन = प्र –√ली + क्त

५९. प्रशासत् = प्र –√शास् + प्रथमपुरुषः, एकवचनम्

६०. एष्यती= √इ + कृत्

१२.७ असमीया अनुवादः (१-२५)

ওপৰত উল্লেখ কৰা সংস্কৃত শ্লোকসমূহৰ অসমীয়া অনুবাদ যথাক্ৰমে তলত দিয়া হ'ল।

- কুৰুদেশৰ অধিপতিৰ (দুৰ্যোধনৰ) ৰাজলক্ষ্মী প্ৰতিষ্ঠাৰ কাৰণস্বৰূপ প্ৰজাসকলৰ প্ৰতি (তেওঁৰ) ব্যৱহাৰ জানিৱৰ বাবে (যুধিষ্ঠিৰে) যাক নিয়োগ কৰিছিল, সেই ব্ৰহ্মচাৰী বেশধাৰী কিৰাত (সমস্ত বৃত্যন্ত) জানি দ্বৈতবনত থকা যুধিষ্ঠিৰৰ ওচৰত উপস্থিত হ'ল।
- প্ৰণাম কৰি "শত্ৰুৰ দ্বাৰা পৃথিৰী বিজিত হৈছে" - এইকথা (যুধিষ্ঠিৰক) ৰজাক নিবেদন কৰাৰ সময়ত তেওঁৰ (কিৰাতৰ) মন দুঃখিত নহ'ল। কাৰণ শুভাকাঙ্খীসকলে মিছা প্ৰিয়বাক্য ক'বলৈ ইচ্ছা নকৰে।
- সেই কিৰাতে অকলশৰে শত্ৰুনাশৰ বাবে উপায় ল'বলৈ ইচ্ছুক ৰজাৰ (যুধিষ্ঠিৰৰ) অনুমতি লৈ সুন্দৰ শব্দযুক্ত অৰ্থবিশিষ্ট আৰু সন্দেহহীন (পৰৱৰ্তী) কথাবোৰ ক'বলৈ ধৰিলে।
- হে মহাৰাজ ! কামত নিয়োজিত অনুচৰসকলে গুপ্তচৰবিলাকেই যাৰ নয়ন তেনেকুৱা গৰাকীক প্ৰতাৰণা কৰা উচিত নহয়। গতিকে (মোৰ কথা) প্ৰিয়ই হওঁক বা অপ্ৰিয়ই হওঁক - সেয়া আপুনি ক্ষমা কৰিব। কাৰণ হিতকৰ অথচ ভাল লগা মনোহৰ বাক্য দুৰ্লভ।
- যিজনে গৰাকীক সত্য উপদেশ নিদিয়ে তেওঁ কুৎসিৎ সখা; যি গৰাকীয়ে সত্য উপদেশ নুশুনে, তেওঁ কুৎসিৎ গৰাকী। ৰজা আৰু মন্ত্ৰী পৰস্পৰে পৰস্পৰৰ প্ৰতি অনুৰক্ত হ'লেহে সকলো সম্পদো তেওঁলোকৰ প্ৰতি অনুৰক্ত হয়।

- সাধাৰণতে বুজিৰ নোৱাৰা ৰজাসকলৰ চৰিত্রই বা ক'ত আৰু অজ্ঞানতাৰে ভৰা (মোৰ দৰে) জীৱাই বা ক'ত? মই যে শত্রুসকলৰ গোপন ৰাজনীতি প্রয়োগৰ বিষয়ে জানিছো, সেয়া আপোনাৰেই মহিমা।
- দুর্যোধন ৰাজসিংহাসনত বহি থাকিলেও বনত বাস কৰা আপোনাৰ (যুধিষ্ঠিৰৰ পৰা) ওচৰত পৰাজয়ৰ আশংকা কৰে। কপট পাশাখেলৰ দ্বাৰা জয় কৰা জগতখনক (তেওঁ) নীতি প্রয়োগৰ দ্বাৰা জয় কৰিবলৈ চেষ্টা কৰিছে।
- তথাপি সেই কুটিল (দুর্যোধনে) আপোনাক জয় কৰিবলৈ ইচ্ছুক হৈ (নিজৰ) গুণ-গৰিমাৰে নির্মল যশ - খ্যাতি বিস্তাৰ কৰিছে। গতিকে শুভাকাংশী মহৎলোকৰ লগত বিৰোধ, দুষ্টলোকৰ সংগতকৈ ভাল।
- (কাম-ক্রোধ আদি) **ষড়ৰিপুক** জয় কৰি তেওঁ (দুর্যোধনে) মনুৰ দ্বাৰা নির্দেশিত অত্যন্ত দুর্লভ প্রজাপালন পদ্ধতি অৱলম্বন কৰিবলৈ ইচ্ছা কৰিছে। সেয়েহে তেওঁ নিজৰ প্রতাপক (শক্তিক) দিন আৰু ৰাতিত ভাগ কৰি নীতিৰে প্রয়োগ কৰিছে। (অর্থাৎ দিনত কি কার্য্য কৰিব আৰু ৰাতি কি কার্য্য কৰিব তাক দুর্যোধনে ভাগ কৰি লৈছে।)
- নিৰহঙ্কাৰী সেই দুর্যোধনে সদায় অনুচৰসকলক ভালকৈ প্রিয় বন্ধুৰ দৰে, বন্ধুসকলক আপোনজনৰ দৰে সন্মান সহকাৰে আৰু আপোনজনক ৰজাৰ দৰে ব্যৱহাৰ কৰে।
- দুর্যোধনে যথাযথভাৱে বিবেচনা কৰি পক্ষপাতশূন্যভাৱে আসক্তিহীন হৈ সেৱা কৰিছে। ফলত তেওঁৰ *ত্রিবর্গ* তেওঁৰ গুণৰ প্রতি অনুৰাগী হৈ যে ন বন্ধুত্ব প্রাপ্ত হৈ পৰস্পৰে পৰস্পৰক বাধা দিয়া নাই ।
- তেওঁৰ (দুর্যোধনৰ) অমায়িক সামনীতি দানশূন্য নহয়, প্রচুৰ দান আদৰশূন্য নহয় আৰু তেওঁৰ অতিশয় সমাদৰ গুণহীনজনৰ প্রতি প্রদর্শিত নহয়।
- *জিতেন্দ্রিয়* সেই দুর্যোধনে অর্থলাভৰ ইচ্ছাত বা ক্রোধ বশতঃ বা লোভৰ বশবর্তী হৈ দণ্ডনীতিৰ প্রয়োগ নকৰে। নিজৰ ধর্ম জ্ঞান কৰি শত্রুৰ ওপৰতে হওঁক বা পুত্রৰ ওপৰতে হওঁক, গুৰুৱে নির্দ্ধাৰণ কৰি দিয়া দণ্ডনীতিৰ দ্বাৰাহে অধর্মক দমন কৰে।
- তেওঁ চাৰিওদিশে আত্মীয়সকলক ৰখীয়াৰূপে নিয়োগ কৰি ভীত হৈয়ো ভয়হীনৰ দৰে ব্যৱহাৰ কৰি থাকে। কার্য সমাপ্তিৰ পাছত অনুচৰসকলক প্রদান কৰা সম্পদসমূহেই তেওঁৰ কৃতজ্ঞতা প্রকাশ কৰে।
- দুর্যোধনে উপায়সমূহক যথাযথভাৱে বিবেচনা কৰি বিষয়সমূহত প্রয়োগ কৰি সমাদৰ কৰে। সেইবাবেই যেন (উপায়সমূহে) পৰস্পৰে পৰস্পৰৰ লগত প্রতিদ্বন্দ্বিতা কৰিয়েই যেন পাছত সদায় প্রচুৰ অর্থ সম্পদ প্রসৰ কৰে। (অর্থাৎ দুর্যোধনে সকলো সমস্যাৰ সমাধানৰ উপায় জানে। সেইবাবে পিছৰ সময়ত তাৰ ভাল ফলবোৰ লাভ কৰে।)
- বহু ৰজাৰ ৰথ আৰু অশ্বৰে পৰিপূর্ণ তেওঁৰ (দুর্যোধনৰ) সভাগৃহৰ চোতাল ৰজাসকলে উপহাৰ ৰূপে দিয়া হাতীবোৰৰ *সপ্তপর্ণফুল*ৰ সুবাসবিশিষ্ট *মদজালে*ৰে তিতি থাকে।

- তেওঁ (দুর্যোধনে) বহুদিন ধৰি মঙ্গলজনক কার্য্য কৰাৰ বাবে নদীৰে পৰিপূর্ণ কুৰুদেশৰ কৃষকসকলে যেন হাল নোবোৱা ভূমিতেই সহজে উৎপন্ন শস্যসম্পদ লাভ কৰিছে।
- মহাযশস্বী, দয়ালু, সকলো বাধাক নেওঁচি সুৰক্ষাৰে বৃদ্ধি কৰিবলৈ তৎপৰ; কুবেৰ সদৃশ এই দুর্যোধনৰ গুণৰাশিৰ দ্বাৰা দ্রবীভূত হৈ পৃথিৱীয়ে যেন নিজেই ধন-ৰত্ন আদি প্রসৰ কৰিছে। (অর্থাৎ পৃথিৱী দুর্যোধনৰ গুণসমূহ দেখি অতি সন্তুষ্ট হৈছে। গতিকে পৃথিৱী নিজে নিজেই ধন-সম্পদেৰে ভৰি পৰিছে।)
- মহাশক্তিশালী, আত্মমর্য্যদাসম্পন্ন, অর্থৰ দ্বাৰা সন্মানিত, যুদ্ধত কীর্ত্তিলব্ধ, (দুর্যোধনৰ) ধনুধৰী সৈনিকসকলে পৰস্পৰ দলবদ্ধও নহয় আৰু পৰস্পৰে প্রতিকুল আচৰণো নকৰে কিন্তু প্রাণৰ বিনিময়তে (ৰজাৰ) প্রিয়কার্য্যসমূহ কৰিবলৈ ইচ্ছা কৰে।
- ফল লাভ নোহোৱালৈকে কার্য্য কৰা তেওঁ (দুর্যোধনে) শুদ্ধ চৰিত্রৰ গুপ্তচৰৰ দ্বাৰা আন ৰজাসকলৰ কাম-কাজসমূহ সম্পূর্ণৰূপে জানি থাকে। তেওঁৰ উদ্দেশ্য বিধাতাৰ কামৰ দৰেই যে উন্নতিকামী তাক শুভ ফলাফলৰ পৰাই জনা যায়।
- তেওঁ (দুর্যোধনক) কেতিয়াও গুণযুক্ত ধনু উত্তোলন কৰিবলগীয়া নহয় অথবা খণ্ডতে মুখ বিকৃতও কৰিব লগীয়া নহয়। তেওঁৰ গুণৰ প্রতি অনুৰাগী হৈ ৰজাসকলে তেওঁৰ আদেশক ফুলৰ মালাৰ দৰে শিৰত বহন কৰে।
- অপ্রতিহত দুর্যোধনে নবযৌৱনেৰে গর্বিত দুঃশাসনক যুৱৰাজৰ পদত নিয়োজিত কৰিছে। (তেওঁ) পুৰুহিতসকলে কোৱা মতে অবিৰত ভাৱে আহুতি প্রদানৰ দ্বাৰা অগ্নিক সন্তুষ্ট কৰিছে।
- প্রতিপক্ষ (বা শত্রুপক্ষত) ৰজাহীন তেওঁ (দুর্যোধনে) দীর্ঘস্থায়ী, সাগৰৰলৈকে বিস্তৃত ভূখণ্ডক শাসন কৰিলেও কিন্তু আপোনাৰ পৰা বিপদ আহিব পাৰে বুলি চিন্তা কৰি থাকে। হায়! বলবানৰ লগত বিৰোধিতাৰ পৰিণাম ভয়ঙ্কৰ।
- কথা প্রসঙ্গত মানুহে আপোনাৰ নাম উচ্চাৰণ কৰিলেও তেওঁ (দুর্যোধনে) ইন্দ্রপুত্র অর্জুনৰ পৰাক্রমৰ কথা মনত পেলাই তললৈ মুখ কৰি যন্ত্রণা ভোগ কৰে। যিদৰে বেজ-জ্ঞানীসকলে মন্ত্র উচ্চাৰণ কৰিলে গৰুড়ক মনত পেলাই সাপবোৰে যন্ত্রণা ভোগ কৰে।
- সেইবাবেই আপোনাৰ প্রতি কপট আচৰণ কৰিবলৈ বিচৰা দুর্যোধনৰ বিৰুদ্ধে শীঘ্রে যথাযোগ্য প্রতিবিধানৰ ব্যৱস্থা কৰক। আমি আনৰ কোৱা কথাবোৰ সংগ্রহ কৰো। আমাৰ কথাই একমাত্র সাৰবার্তা বা সংবাদ।

१२.८ वनेचरस्य उक्तीनां सारांशः

महाकविभारविणा विरचितं 'किरातार्जुनीयम्' इति महाकाव्ये वनेचरस्य उक्तयः उपलभ्यन्ते। युधिष्ठिरेण नियुक्तः वनेचरः। तस्य उक्तीनां सारांशः अधो आलोच्यते-

द्युतकीडायां पराजयं भूत्वा पाण्डवाः द्रौपद्या सह वनं गच्छन्ति। वनवासकालेऽस्मिन् द्वैतवने ते निवसन्ति। द्वैतवने निवासकाले युधिष्ठिरः दुर्योधनस्य राज्यशासनव्यवस्थां निरीक्षणार्थं

वनेचरं हस्तिनापुरम् अप्रेषत्। वनेचरः ब्रह्मचारीवेशं धृत्वा दुर्योधनस्य सम्पूर्णं वृत्तान्तं ज्ञात्वा युधिष्ठिरसमीपं आगच्छत्।

कर्मेषु नियुक्ताः भृत्याः अनुचराः च स्वामीं न वञ्चयेत्। अतः वनेचरानुसारं तस्य वचनं यद्यपि अप्रियं तथापि युधिष्ठिरः श्रुत्वा क्षमेयुः इति। यतोहि हितं मनोहारि दुर्लभं च वचः। यद्यपि युधिष्ठिरः वने निवसति, तथा दुर्योधनः तस्मात्भीत्वा नीतिशास्त्रानुसारेण राज्यं शासनं कुर्वनस्ति। सः काम-क्रोधादि रिपुन् वंशी कृत्वा अहर्निशं नीतिमार्गेण कार्याणि सम्पादयति। सः निरहङ्कारः भूत्वा भृत्यैः अनुचरैः सह मित्रभावं प्रदर्शयति। सम्मानेन श्रद्धया च धर्म-अर्थ-कामादित्रिवर्गाणां साधनं तेन क्रियते। दुर्योधनः अतिविचक्षणेन सामदाननीति प्रयोगं करोति। शत्रु-मित्रम् समानरूपेण भेदभावरहितं दण्डं यच्छति। कार्यसमाप्तेः पश्चात् कृतज्ञतारूपेण पुरस्कारान् उपहारान् (उपायनानि) च अनुचरेभ्यः भृत्येभ्यः ददाति। दुर्योधनः सर्वदा मङ्गलानुष्ठानं करोति अतः राज्ये शस्यसमृद्धिः भवति। महाबलवन्तः, धर्मधारिणः च तस्य गुणान् प्रति आकृष्टं भूत्वा स्वप्राणान्परित्यज्य अपि नृपस्य प्रियकार्यं कर्तुं सर्वदा तत्पराः सन्ति। सः अन्यनृपैः सह कदापि युद्धम् अर्थवाशत्रुभावं न प्रदर्शयति। सर्वे श्रद्धया तं पश्यन्ति। तादृशः दुर्योधनः स्वभ्रातरं दुःशासनम् युवराजपदम् अभिषिक्तुः अहर्निशं यज्ञादि कुर्वन् अस्ति।

परन्तु दुर्योधनः आसमुद्रं राज्यविस्तारं कृत्वा अपि युधिष्ठिरात् विभेति। कथा प्रसङ्गे यदा युधिष्ठिरस्य नाम शृणोति तदा अर्जुनस्य पराक्रमविषये चिन्तां कृत्वा कष्टमनुभवति।

इत्थं कपट-दुर्योधनं प्रति युधिष्ठिरः शीघ्रमेव यथोचितं चिन्तयेत् इति वनेचरः दुर्योधनस्य शासनव्यवस्था विषये युधिष्ठिरं सविस्तरेण उक्तवान्।




ज्ञातव्यम्

द्वैतवनम् = जलाशयेन परिवृतः एकम् अरण्यम् वनम् वा।

महाभारते उल्लेखोऽस्ति -

समाप्यन् मतं पार्थत्वया यत्समुदाहृतम्।
गच्छामः पूण्यविख्यातं महत् द्वैतवनं सरः।।
(महाभारतम्, शल्यपर्व)

वनेऽस्मिन् शोकमोहौ नस्तः। अतः अस्य नाम द्वैतवनम्।



अग्रगत्याःनिरूपणम्

प्रश्नः १: 'किरातार्जुनीयम्' काव्यस्य रचनाकारः कः ?

.....

प्रश्नः २: 'वनेचर' शब्दस्य कोऽर्थः ?

.....

प्रश्नः ३: 'किरात' इत्यस्य कोऽर्थः ?

.....

प्रश्नः ४: दुर्योधनस्य अपर नाम किम् ?

.....

प्रश्नः ५: द्वैतवनं किमर्थं द्वैतवनमिति उच्यते ?

.....

प्रश्नः ६: 'षड्रिपवः' के ?

.....

प्रश्नः ७: 'त्रिवर्ग' इत्यस्य कोऽर्थः ?

.....

प्रश्नः ८: युधिष्ठिरः गुप्तचररूपेण कं कुत्र प्रेषितवान् ?

.....

प्रश्नः ९: 'जितेन्द्रिय' इति कस्य अभिधानम् ?

.....

प्रश्नः १०: 'चारचक्षुः' इति कम् उच्यते ?

.....

प्रश्नः ११: जगति कीदृशी वाणीदुर्लभा ?

.....



१२.९ अध्यायात् किमवगतम्

- संस्कृतसाहित्यजगतः प्रख्यातं महाकाव्यम् 'किरातार्जुनीयम्' इत्यस्य प्रथमसर्गस्य (१-१५) पद्यपर्यन्तम् अभ्यासः प्रातः।
- भारवेः वचनशैल्याः एका धारणा।
- संस्कृतपद्यानां संस्कृतशब्दानां व्याख्या।
- वनेचरस्य उक्तीनां सारांशः।
- व्याकरणात्मकटिप्पणी।



१२.१० ज्ञानाधिकम्

१) काले, एम्.आर.(सम्पादनम्) रघुवंशम् अक् कालिदासः(१-५),दिल्ली,मतिलाल

वनारसीदास पब्लिक प्राईवेट लिमिटेड।

२) गोस्वामी, डॉ मालिनी (२००९) रघुरपि काव्यम्, गुवाहाटी चन्द्रप्रकाशः।

३) भद्र, सुधेन्दु, मोहनः, रघुवंशम्, गुवाहाटी चन्द्रप्रकाशः।

४) संस्कृत-साहित्य-सम्भारः (१९८१) नव-पत्र-प्रकाशनम्।



१२.११ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : महाकविः भारविः।

प्रश्नः २ उत्तरम् : वने ये निवसन्ति ते।

प्रश्नः ३ उत्तरम् : 'किरात' इत्युक्ते ये वने निवसन्ति ते।

प्रश्नः ४ उत्तरम् : सुयोधन :।

प्रश्नः ५ उत्तरम् : द्वैतवने शोकमहौ नस्तः। अतः अस्य नाम द्वैतवनम् इति।

प्रश्नः ६ उत्तरम् : षडरिपवः - काम, क्रोध, लोभ, मोह, मद, मात्सर्यः।

प्रश्नः ७ उत्तरम् : धर्म-अर्थ-काम-त्रिवर्गः इति उच्यते।

प्रश्नः ८ उत्तरम् : युधिष्ठिरः ब्रह्मचारीवेशधारीम् एकं वनेचरं द्वैतवनात् हस्तिनापुरं प्रेषितवान्।

प्रश्नः ९ उत्तरम् : दुर्योधनस्य।

प्रश्नः १० उत्तरम् : गुप्तचरः।

प्रश्नः ११ उत्तरम् : जगति मनोहारि हितकरवाणी दुर्लभः। (हितंमनोहारि च दुर्लभं वचः)।



१२.१२ अभ्यासप्रश्नाः

लघू प्रश्नाः

प्रश्नः १: 'त्रिवर्गः' इत्यस्य कोऽर्थः ?

प्रश्नः २: 'गुप्तचरः' इत्युक्ते कोऽर्थः ?

प्रश्नः ३: संक्षिप्तेन लिखत -द्वैतवनम्, जितेन्द्रियः, किरातः, अर्थगौरवम्

प्रश्नः ४: व्याकरणात्मकटिप्पणीं लिखत - वनेचरः, कृतज्ञताम्, महौजसः, चारचक्षुषः

दीर्घप्रश्नाः

प्रश्नः १: युधिष्ठिरं प्रति वनेचरस्य उक्तीनां सारांशः लिखत।

प्रश्नः २: दुर्योधनस्य राज्यशासनविषये संक्षिप्तेन लिखत।

*** ***** ***

ध्यायः १३ : किरातार्जुनीयम् - प्रथमसर्गः (श्लोकाः २६-४६)

अध्यायस्य संरचना

१३.१ उद्देश्यम्

१३.२ परिचयः

१३.३ पद्यानां संस्कृतपाठः (२६-४६)

१३.३.१ पद्यानाम् अन्वयः

१३.३.२ पद्यानां शब्दार्थः

१३.३.३ पद्यानां भावानुवादः

१३.३.४ पद्यानां व्याकरणटिप्पणी

१३.४ द्रौपद्याः उक्तेः सारांशः

१३.५ अध्यायात् किमवगतम्

१३.६ ज्ञानाधिक्यम्

१३.७ अग्रगत्याः निरूपणम्

१३.८ अभ्यासप्रश्नाः

१३.१ उद्देश्यम्

अस्य पाठस्य अध्ययनेन -

- किरातार्जुनीयम् इति महाकाव्यस्य प्रथमसर्गस्य विषयवस्तुनि ज्ञातुं शक्ष्यामः।
- कविः भारविः एतेषां पद्यानां माध्यमेन जनान् नीतिज्ञानमपि प्रददाति।
- प्रथमसर्गस्य श्लोकानाम्ं शब्दार्थम्, अन्वयम्, अनुवादं, व्याकरणटिप्पणीं च ज्ञातुं शक्ष्यामः।
- द्रौपद्याः उक्तिमाध्यमेन तस्याः चरित्रचित्रणं कर्तुं शक्ष्यामः।
- भारवेः काव्यशैलीसम्बन्धे ज्ञातुं शक्ष्यामः।

१३.२ परिचयः

किरातार्जुनीयम् इति महाकाव्यस्य प्रथमसर्गस्य १-२५ पद्यानाम् अध्ययनं भवन्तः कृतवन्तः। युधिष्ठिरं प्रति वनेचरस्य वार्ताम् अपि ज्ञातवन्तः। इदानीं प्रथमसर्गस्य परवर्तिपद्यानाम् इत्युक्ते २६ तः ४६ पद्यं यावत् अध्ययनं कर्तुं शक्नुवन्ति। एतेषां पद्यानां संस्कृतशब्दार्थान् अनुवादान् व्याख्यां व्याकरणगतटिप्पणीं च ज्ञातुं शक्नुवन्ति। तथा वनेचरात् प्राप्तवार्तानन्तरं द्रौपद्याः उक्त्याः विस्तृतं विवरणं प्राप्नुवन्ति।

१३.३ पद्यानां संस्कृतपाठः (२६-४६)

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम्।
प्रविश्य कृष्णा सदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः।। १.२६।।

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रूपदात्मजा गिरः।। १.२७।।

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।। १.२८।।

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वया स्वहस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता।। १.२९।।

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः।। १.३०।।

गुणानुरक्तां अनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्मनोरमां आत्मवधूं इव श्रियं।। १.३१।।

भवन्तं एतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कं इवाग्निरुच्छिखः।। १.३२।।

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयं एव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः।। १.३३।।

परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः।
महारथः सत्यधनस्य मानसं दुनोति ते कच्चिदयं वृकोदरः।। १.३४।।

विजित्य यः प्राज्यम् अयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन्करोति मन्युं न कथं धनंजयः।। १.३५।।

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वं एतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुं।। १.३६।।

इमाम् अहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः।। १.३७।।

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भां अधिशय्य स स्थलीं जहासि निद्राम् अशिवैः शिवारुतैः।। १.३८।।

पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः।। १.३९।।

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम्।। १.४०।।

द्विषन्निमित्ता यदियं दशा ततः समूलम् उन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम्।। १.४१।।


विहाय शान्तिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः।। १.४२।।

पुरः सरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकामीदृशम्।
भवादृशाश्चेदधिकुर्वते परान्निराश्रया हन्त हता मनस्विता।। १.४३।।

अथ क्षमां एव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम्।। १.४४।।

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि।। १.४५।।

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलबलं अगाधे मग्नं आपत्पयोधौ।
रिपुतिमिरं उदस्योदीयमानं दिनादौ दिनकृतम् इव लक्ष्मीस्त्वां समभ्येतु भूयः।। १.४६।।



अग्रगत्याःनिरूपणम्

प्रश्नः १ः द्रुपदात्मजाः कस्या नाम अस्ति?

.....

प्रश्नः २ः अर्जुनस्य दशनामानि कानि सन्ति?

.....

प्रश्नः ३ः भीमः वृकोदर इत्यनेन किमर्थम् आख्यायते?

.....

प्रश्नः ४ः कीदृशं पुरुषं मित्रत्वेन शत्रुत्वेन वा न बिभ्यते?

.....

प्रश्नः ५ः कस्य पराजयः अपि उत्सवतुल्यो भवति?

.....

१३.३.१ पद्यानाम् अन्वयः

२६. वनसन्निवासिनाम् पत्यौ इति गिरम् ईरयित्वा आत्तसत्क्रिये गते, अथ महीभुजा कृष्णासदनम् प्रविश्य अनुजसन्निधौ तत् वचः आचचक्षे।

२७. द्रुपदात्मजाद्विषताम् सिद्धिं निशम्य ततः ततस्त्याः अपाकृतीः विनियन्तुम् अक्षमा नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजहार।

२८. भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेपः इव भवति। तथापि निरस्तनारीसमयाः दुराधयः मां वक्तुं व्यवसाययन्ति।

२९. आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरम् अखण्डं धृतामही त्वया मदच्युता मतङ्गजेन स्रग् इव स्वहस्तेन अपवर्जिता।

३०. ये मायाविषु मायिनः न भवन्ति ते मूढधियः पराभवं व्रजन्ति। हि शठाः तथाविधान् असंवृताङ्गान् निशिता ईषवः ईव प्रविश्य घ्नन्ति।

३१. अनुरक्तसाधनः कुलाभिमानी त्वत् अन्य कः इव नराधिपः गुणानुरक्तां कुलजां मनोरमाम् आत्मवधूम् इव श्रियं परैः अपहारयेत्।

३२. नरदेव! एतर्हि मनस्विगर्हिते वर्त्मनि विवर्तमानम् भवन्तम् ऊदीरितः मन्युः शुष्कम् शमीतरूम् उच्छिखः अग्निः इव कथं न ज्वलयति।

३३. अवन्ध्यकोपस्य, आपदाम् विहन्तुः देहिनः स्वयमेव वश्याः भवन्ति। अमर्षशून्येन जन्तुना जातहार्देन जनस्य आदरो न, विद्विषा न।

३४. लोहितचन्दनोचितः महारथः अयं वृकोदरः रेणुरुषितः पदातिः अन्तर्गिरिः परिभ्रमन् सत्यधनस्य मानसं न दुनोति कच्चित्।

३५. वासवोपमः यः उत्तरान् कुरून् विजित्य प्राज्यम् अकुप्यं वसु अयच्च, सः धनञ्जयः अधुना वल्कवासांसि आहरन् तव मन्युं कथं न करोति?

३६. वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ अगजौ गजौ इव एतौ यमौ विलोकयन् त्वं धृतिसंयमौ वाधितुं कथं न उत्सहसे?

३७. अहं तावकीं इमां धियं न वेद। चित्तवृत्तयः विचित्ररूपाः खलु। परां भवदापदं विचिन्तयन्त्या मम चेतः आधयः प्रसभं रुजन्ति।

३८. पुरा महाधनम् शयनम् अधिरूढः यः स्तुतिगीतिमङ्गलैः विवोध्यसे, सः त्वम् अदभ्रदर्भामस्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रां जहासि।

३९. नृप! पुरा द्विजातिशेषेण अन्धसा, यत् एतत् (ते वपुः) रामणीयकम् उपनीतम्, अद्य वन्यफलाशिनः ते तत् वपुः यशसा समं परं कार्श्यम् परैति।

४०. मणिपीठशायिनौ (ते) यौ (चरणौ) अनारतं राजशिरः स्रजं रजः अरञ्जयत्, अधुना तौ ते चरणौ मृगद्विजालूनशिखेषु वर्हिषां वनेषु निषीदतः।

४१. यत् ईयं दशा द्विषन्निमित्ता, ततः मे मनः समूलम् उन्मूलयति इव। परैः

अपर्यासितवीर्य सम्पदाम् मानिनां पराभव अपि उत्सव एव।

४२. नृप! प्रसीद। शान्तिं विहाय तत् धाम विद्विषां वधाय पुनः सन्धेहि। निस्पृहाः मुनयः शत्रुन् अवधूय शमेन सिद्धिं व्रजन्ति, भूभृतः न।

४३. भवादृशाः धामवताम् पुरः यशोधनाः, ईदृशं सुदःसहं निकारं प्राप्य रतिम् अधिकुर्वते चेत्, हन्त! मनस्विता निराश्रया हता।

४४. अथ निरस्तविक्रमः चिराय क्षमाम् एव सुखस्य साधनं पर्येषि, लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः सन् इह पावकं जुहूधि।

४५. परेषु निकृतिपरेषु भूरिधाम्नः ते समय परिरक्षणं न क्षमम्। हि विजयार्थिनः क्षितीशाः अरिषु सोपधि सन्धिदूषणानि विदधति।

४६. विधिसमय नियोगात् दीप्तिसंहारः जिह्मम्, अगाधे आपत्पयोधौ मग्नं शिथिलवसुं, रिपुतिमिरम् उदस्य उदीयमानम् त्वां दिनादौ दिनकृतम् इव, लक्ष्मीः भूयः समभ्येतु।

१३.३.२ पद्यानां शब्दार्थः

२६. वनसन्निवासिनाम् पत्यौ वनचरपतिः किरातराजः वा, इति गिरम् ईरयित्वा आत्तसक्रिये गते इति उक्त्वा पारितोषकं प्राप्य गते, अथ महीभुजा कृष्णासदनम् प्रविश्य तदनन्तरं राजा द्रौपद्याः प्रकोष्ठे प्रविश्य अनुजसन्निधौ तत् वचः आचचक्षे भ्रातृणां सम्मुखं तद्वचनम् अकथयत्।

२७. द्रुपदात्मजाद्विषताम् सिद्धिं निशम्य द्रूपदराज्ञः सुता द्रौपदी शत्रूणां उन्नतिम् अवलोक्य ततः ततस्त्याः अप्राकृतीः विनियन्तुम् अक्षमा नृपस्य शत्रुपक्षतः समागतायाः मनोवेदनायाः दमनार्थं असमर्था सती राज्ञः मन्युव्यवसायदीपिनीः गिरः उदाजहार क्रोधोद्दीपककथां उवाच।

२८. भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेपः इव भवति भवत्सदृशेषु नारीप्रदत्त उपदेश तिरस्कारः इव भवति। तथापि निरस्तनारीसमयाः दुराधयः मां वक्तुं व्यवसाययन्ति तथापि उलङ्घनारीजनोचितमर्यादां असहनीयदुः खयुतां मां वक्तुं प्रेरयति।

२९. आखण्डलतुल्यधामभिः इन्द्रतुल्यपराक्रमशालिभिः स्ववंशजैः भूपतिभिः स्ववंशीयराज्ञैः चिरम् अखण्डं धृतामही बहुकालं यावत् अखण्डेन पालिता इयं धरा त्वया मदच्युता मतङ्गजेन स्रग् इव आत्महस्तेन अपवर्जिता मदमत्तगजेन माला स्वहस्तेन परित्यक्ता इव त्वमपि परित्यक्ता।

३०. ये मायाविषु मायिनः न भवन्ति ते मूढधियः पराभवं व्रजन्ति ये पुरुषाः मायाविनं प्रति मायाविनः न भवन्ति, ते बुद्धिहीनाः पराजिताः भवन्ति। हि शठाः तथाविधान् असंवृताङ्गान् निशिता ईषवः ईव प्रविश्य घ्नन्ति कुटिलाः दुष्टाः वा ते जनाः वर्महीनशरीरे प्रविश्य तीक्ष्णाः ईषव इव घ्नन्ति।

३१. अनुरक्तसाधनः अनुकूलसहायविशिष्टः कुलाभिमानी वंशयशमर्यादासम्पन्नः त्वत् अन्यः कः इव नराधिपः तं विना कः तादृशः राजा गुणानुरक्तां गुणानुरागिनीं कुलजां सत्वंशजां मनोरमम् आत्मवधूम् मनोहरां स्वपत्नीं इव श्रियं परैः अपहारयेत् इव राजलक्ष्मीं शत्रुभिः अपहरणं कारयति।

३२. नरदेव! महाराज! एतर्हि मनस्विगर्हिते वर्त्मनि अस्मिन् विपत्काले मनस्विनिन्दिते मार्गे विवर्तमानम् भ्रमन्तं भवन्तम् त्वां ऊदीरितः उद्दीपितः मन्युः शुष्कम् शमीतरूम् शुष्कशमीवृक्षं ऊच्छिखः अग्निः इव कथं न ज्वालयति उर्ध्वशिखा अग्नि इव किमर्थं न दहति।

३३. अवन्ध्यकोपस्य, यस्य क्रोधः निष्फलो न भवति तस्य आपदाम् विहन्तः यः समस्तविपत्तिं नाशयति देहिनः स्वयमेव वश्याः भवन्ति प्राणिनः आत्मेव अधीनाः भवन्ति। अमर्षशून्येन क्रोधहीनजनः जन्तुना पशुना जातहार्देन प्राप्त मित्रेण बन्धुना वा सत्यजनस्य सत्यपुरुषस्य आदरो न समादरो न, प्रेम्णा अपि विद्विषा च न शत्रुणा भयं न।

३४. लोहितचन्दनोचितः महारथः रक्तवर्णीयचन्दनेन अङ्कितः महारथः अयं वृकोदरः एषः भीमः रेणुरुषितः पदातिः अन्तर्गिरिः परिभ्रमन् धूलिधूसरितः सन् पर्वतान्तः पर्यटन् सत्यधनस्य मानसं न दुनोति कच्चित् एषा अवस्था सत्यवादिनः तव मनसि कष्टं किं नोत्पादयति।

३५. वासवोपमः यः इन्द्रतुल्यः यः उत्तरान् कुरून् विजित्य उत्तरकुरुदेशं जीत्वा प्राज्यम् अकुप्यम् वसु अयच्च अधिकपरिमाणं स्वर्णमुद्रां धनं च अददत्, सः धनञ्जयः स एव अर्जुनः अधुना तव वल्कवासांसि आहरन् इदानीं वल्कलवस्त्रं धारयन् कथं मन्युं न करोति किमर्थं दुःखं क्रोधं वा न उत्पादयति?

३६. वनान्तशय्या अरण्ये शयनं कृत्वा कठिनीकृताकृती विष्कक् कठिनशरीरस्य परितः कचाचितौ केशाव्याप्तौ अगजौ गजौ इव पर्वतीयौ हस्तिनौ इव एतौ यमौ एतौ नकुलसहदेवौ विलोकयन् अवलोक्य त्वं धृति संयमौ वाधितुं कथं न उत्सहसे युधिष्ठिरः कस्मात् कारणात् धैर्यनियमो निरोद्धुं न प्रवर्तते?

३७. अहं तावकीम् द्रौपदीं तव इमां धियं इदृशीं बुद्धिं न वेद न जानामि। चित्तवृत्तयः विचित्ररूपाः खलु चित्तस्य वृत्तयः मनोव्यापाराः भिन्नप्रकाराः भवति एव। पराम् अत्यधिकां भवदापदं भयानकविपदः विचिन्तयन्त्या विचिन्त्य मम चेतः मदीयं द्रौपद्याः मनः आधयः प्रसभं रुजन्ति मनोवेदनां बलपूर्वकं दुःखं ददाति।

३८. यः त्वम् यः भवान् पुरा पुर्वसमये महाधनम् बहुमूल्यं शयनं पर्यङ्कम् अधिरूढस्तुतिगीतमङ्गलैः आरूढः मङ्गलमयस्तुतिगीतादिभिः विवोध्यसे विनिद्रो भाव्यसे, सः त्वम् तादृशः भवान् अदभ्रदर्भामस्थलीम् बहुकुशवनादिभिः विस्तृते वनभूमौ अधिशय्य शयनं कृत्वा अशिवैः शिवारुतैः अमङ्गलशृगालध्वनिभिः

निद्रां जहासि निद्रां त्यजसि।

३९. नृप! महाराज! पुरा द्विजातिशेषेण अन्धसा प्राक् ब्राह्मणेन परित्यक्तान्नेन, यत् एतत् ते वपुः तव एतत् शरीरं रामणीयकम् उपनीतम् मनोहरत्वंशम् आप्नोति, अद्य वन्यफलाशिनः ते तत् वपुः यशसा समं कार्श्यम् परैति अधुना वन्यफलभोजनेन यशोख्यातिभिस्सहकृशताम् आप्नोति।

४०. मणिपीठशायिनौ मणिमयपीठे स्थापितौ ते यौ चरणौ तव यौ चरणकमलौ अनारतं अनवरतं सर्वदा वा राजशिरः स्रजाम्, प्रणमन्महीपालमौलीमाल्यानाम्, रजः अरञ्जयत् राज्ञः शिरसि अवस्थितस्य मालानां रेणुभिः रञ्जितौ, अधुना तौ इदानीं तौ चरणकमलौ मृगद्विजालूनशिखेषु हरिणविप्रलुञ्छिताग्रेषु वर्हिषां वनेषु च निषीदतः पशुहरिणादिभिः भुक्ताग्रभागैः कुशवनैः वने स्थापितौ।

४१. यत् ईयं दशा द्विषन्निमित्ता यतो हि इयम् अवस्था शत्रुणा विहिता, ततः मे मनः समूलम् उन्मूलयति इव तस्मात् मम चेतः अतीव पीडयति। परैः शत्रुभिः अपर्यासितवीर्य सम्पदाम् शक्तिः सम्पत्तिः च शष्टा न भवति मानिनां पराभव अपि उत्सव एव मानिजनानां विपत्तिः अपि उत्सवतुल्या एव।

४२. नृप! प्रसीद। हे महाराज युधिष्ठिर! सन्तुष्टः भव शान्तिं विहाय शान्तिं परित्यज्य तत् धाम विद्विषां वधाय पुनः सन्धेहि शत्रूणां नाशाय प्रसिद्धक्षत्रियोचिततेजः पुनः धारयतु। निस्पृहाः मुनयः निरासक्ताः ऋषयः शत्रुन् अवधूय शमेन रिपून् शान्तिना सिद्धिं व्रजन्ति सफलताम् आप्नुवन्ति, भूभृतः न राजानो न।

४३. भवादृशा धामवताम् भवत्सदृशस्य तेजस्विनाम् पुरःसराः यशोधनाः अग्रगण्याः यशस्विनः, ईदृशं सुदुः सहं निकारं प्राप्य एतादृशम् असहनीयम् असह्यं वा लाञ्छनं प्राप्य रतिम् अधिकुर्वते चेत् सन्तोषं लभते चेत्, हन्त! अहो मनस्विता निराश्रया हता तेजस्विता यशस्विता वा आश्रयहीना ध्वंसिता।

४४. अथ इदानीं निरस्तविक्रमः पराक्रमं परित्यज्य चिराय क्षमाम् एव चिरकालस्य कृते क्षमाम् एव सुखस्य साधनं पर्येषि सुखोपायः इति यदि चिन्तयसि, लक्ष्मीपतिलक्ष्म कार्मुकं विहाय राजचिह्नयुक्तं धनुः परित्यज्य जटाधरः सन् जटायाः धारकः सन् इह पावकं जुहूधि अत्र अग्नौ आहुतिं यच्छेः।

४५. परेषु निकृतिपरेषु शत्रवः प्रवञ्चकाः सत्सु भूरिधाम्नः ते महाप्रभवशालिनः तव समयपरिरक्षणं न क्षमम् प्रतिज्ञापालनं युक्तियुक्तं न भवति। हि यतो हि विजयार्थिनः विजयं ये इच्छन्ति ते, विजयाभिलाषिनः वा क्षितीशाः राजानः अरिषु सौपधि शत्रूणाम् आश्रये सन्धिदूषणानि विदधति सन्धिभङ्गं कुर्वन्ति।

४६. विधिसमय नियोगात् दैवकालनियमानुसारं दीप्तिसंहारः जिह्मम् दीप्तिक्षयस्य कृते अवसन्नं, अगाधे आपत्पयोधौ अतीव विपत्तिसमुद्रे मग्नं शिथिलवसुं निमग्नं क्षीणरश्मिं, रिपुतिमिरम् शत्रु इव अन्धकारम् उदस्य उदीयमानम् त्वां विनश्योदीयमानं

भवन्तं दिनादौ दिनकृतम् इव दिवसस्य प्रारम्भे सूर्य इव, लक्ष्मीः भूयः समभ्येतु राजलक्ष्मी पुनः समीपम् आगच्छतु।

१३.३.३ पद्यानां भावानुवादः

२६. वनचरपतिः किरातराजः वा एवम् उक्त्वा पारितोषकं प्राप्य गते, तदनन्तरं द्रौपद्याः प्रकोष्ठे प्रविश्य भ्रातृणां सम्मुखं तद्वचनम् अकथयत्।

२७. द्रुपदराज्ञः सुता द्रौपदी शत्रूणां उन्नतिम् अवलोक्य शत्रुपक्षतः समागतायाः मनोवेदनायाः दमनार्थं असमर्था सती राजानं युधिष्ठिरं क्रोधोद्दीपककथां उवाच।

